Chapter-5

# पञ्चमं प्रकरणम्

## १.५.० वसिष्ठसंहितायां ज्योतिषविचाराः

### १.५.१ तिथिस्वरूपनिरूपणम्-

वृद्धवसिष्ठसंहितायां द्वादशाध्याये ७५ श्लोकाः सम्मिलिताः। ते मुख्यत्वेन आर्याछन्दनिबद्धाः।

तत्र तिथिस्वामिनः प्रदर्शिताः। ते क्रमेण धाता(ब्रह्मा) प्रतिपदायाः, विधाता(ब्रह्मा) द्वितीयायाः, विष्णुस्तृतीयायाः, यमश्चतुर्थ्याः, इन्दुः (चन्द्रमाः) पञ्चम्याः, षड्वक्त्रः(कार्त्तिकेयः) षष्ठ्याः, शचीश्वरः (इन्द्रः) सप्तम्याः, वसुरष्टम्याः, नागो नवम्याः, धर्मो दशम्याः, शिव एकादश्यायाः,अर्को द्वादश्यायाः, कामस्त्रयोदश्यायाः, कलिश्चतुर्दश्यायाः, एवं विश्वः पूर्णिमायाः -एवं तिथिस्वामिनो भवन्ति। नष्टेन्दुतिथीश्वराः- अमावस्यातिथिस्वामिनः सदैव पितरः सन्ति। केषांचित् जनानां मतेन धनाधिपो (कुबेरो) द्वादशीतिथेस्तथा त्रयोदशीतिथेः स्वामी- इति। किन्तु द्वादशीतिथिस्वामी हरिस्तथा च त्रयोदशीतिथिस्वामी काम इति वसिष्ठमतम्। पुराणदृष्ट्या तु वह्निः, विधाता, अद्रिसुता(पार्वती), गणेशः, सर्पः, कुमारः(कार्त्तिकेयः), दिनपाः(सूर्यः), महेशः (शंकरः), दुर्गा, यमः, विश्वेदेवाः, हरिः, कामः, शिवः निशीशः(चन्द्रमाः)एवं क्रमेण प्रतिपदादितिथीनां स्वामिनः स्युः।[१५४]

नन्दा,भद्रा,जया,रिक्ता,पूर्णाः-इति- एताः प्रतिपदादितिथीनां क्रमेण संज्ञा ज्ञेयाः। अर्थात् १-६-११ तिथीनां नन्दासंज्ञा, २-७-१२ तिथीनां भद्रासंज्ञा, ३-८-१३ तिथीनां

---

१५४ व.सं. श्लो. १,२,३

जयासंज्ञा, ४-९-१४ तिथीनां रिक्तासंज्ञा तथा च ५-१०-१५ तिथीनां पूर्णासंज्ञा। एता: शुक्लपक्षेऽधम-मध्यम-उत्तमास्तथा च कृष्णपक्ष उत्तम-मध्यम-हीना: ज्ञेया:।[१५५]

**नन्दादितिथिपरत्वेन शुभाशुभकार्यम् —**

मासादितिथौ, नन्दातिथौ(१-६-११)दिने विवाह-यात्रा-उपनयन-प्रतिष्ठा-सीमन्तोनयनसंस्कार-चौलकर्म-सम्पूर्णवास्तुकर्म-गृहप्रवेशास्तथा च सम्पूर्णं मङ्गलकार्यं करणीयम्। द्वितीयादितिथौ, भद्रातिथौ (२-७-१२) तिथिदिने नृपस्य सप्ताङ्गचिह्नानि (राजा-अमात्य-दण्ड-मित्र-दुर्ग-कोषाणि) तथा गुप्तचर-वास्तुकर्म-व्रत-सुरप्रतिष्ठा-सम्पूर्णमङ्गलकार्य-यात्रा-विवाह-सम्पूर्णभूषणकार्याणि शुभावहानि। तृतीयादितिथौ, जयातिथौ ३-८-१३ तिथिदिने सङ्गीतविद्या-सम्पूर्णशिल्पकर्म-सीमन्तोनयन-चौलकर्म-अन्नप्राशन-गृहप्रवेशास्तथा च यत्कार्यं भद्रातिथावुक्तं तत्सर्वं कार्यं कृतं शुभावहम्। रिक्तासु ४-९-१४ तिथिदिने शत्रोर्वध-बन्धन-शस्त्र-विषाग्निघातादिकार्यं सिद्ध्यति। यदि मूढै: किमपि मङ्गलकार्यं कृतं तस्य नाशो भवेत्।[१५६]

सदा नागतिथ्यां (पञ्चमीतिथौ) उक्तानि-अनुक्तानि चरस्थिराणि शुभानि कार्याणि सिद्धिं प्रयान्ति। ऋणप्रदानं विना-अष्टमीतिथ्यां कृतमुत्तममित्युक्तम्। अभ्यङ्गयात्रापितृकर्मदन्तकाष्ठं विना सम्पूर्णमङ्गलकार्यं रणोपयोग्यशिल्पादिकर्म-वास्तुकर्म-वस्त्राभूषणादिकार्यं षष्ठ्यां तिथौ कारयेत्। द्वितीयायां, तृतीयायां पञ्चम्यां यानि कर्माणि कथितानि, तानि सर्वाणि कार्याणि सप्तम्यां सिद्ध्यन्ति-कर्तुं शक्यन्ते। संग्रामयोग्यखिलवास्तुशिल्पप्रभेदाखिललेखनानि स्त्रीरत्नचर्याखिलभूषणानि कार्याण्यष्टम्यां सिद्ध्यन्ति। द्वितीयायां, तृतीयायां पञ्चम्यां सप्तम्यां यानि कर्माणि कथितानि, तानि सर्वाणि

---

१५५ व.सं. श्लो. ४

१५६ व.सं. श्लो. ५ त: ८

कार्याणि दशम्यां सिद्ध्यन्ति—कर्तुं शक्यन्ते। व्रतोपवासाखिलधर्मकार्यं देवोत्सवादि-संग्रामयोग्याखिलवास्तुकर्मशिल्पकर्म-एतानि सर्वकार्याण्येकादश्यां तिथौ सिद्ध्यन्ति। यात्रा (अन्नग्रहणं विना) चरस्थिराणि कर्मपुष्टिशुभानि यानि कार्याणि पृथिव्यां सन्ति तानि सर्वाणि द्वादश्यां तिथौ सिद्ध्यन्ति। द्वितीयायां, तृतीयायां पञ्चम्यां सप्तम्यां दशम्यां यानि कर्माणि कथितानि, तानि सर्वाणि कार्याणि त्रयोदश्यां विशेषरूपेण सिद्ध्यन्ति—कर्तुं शक्यन्ते। यज्ञक्रिया पौष्टिकमङ्गलकार्यं संग्रामयोग्याखिलवास्तुकर्म, विवाहकर्म, शिल्पकर्म, भूषणादिकार्यं प्रतिष्ठाकार्यम्-एतानि कार्याणि पौर्णमास्यां सिद्ध्यन्ति। सदैवामावस्यायां पितृकर्म कारयेत्। नान्यद् विधेयम्। यदि मूढैस्तद्दिने शुभपौष्टिकादिमङ्गलकार्यं कृतं, तदा सः शीघ्रं विनाशमुपैति। कृष्णपक्षाष्टमीचतुर्दशीतिथ्योः, अमावस्यापौर्णिमातिथ्योः, तथा च सूर्यसंक्रान्तिदिनम्-एतानि पञ्चपर्वाणि पुण्यानि कथितानि। एतेषु पञ्चपर्वसु, नन्दासु (१-६-११ तिथिषु) दन्तधावनं न कुर्यात्। यदि अनादरं कृत्वा दन्तधावनं कुर्यात् तदा स नरो विधिहन्तको मनुष्यविधाननष्टकर्ता स्यात्। पर्वसु (कृष्णपक्षाष्टमी-चतुर्दशी- अमावस्या-पौर्णिमाः- एता तिथियस्तथा सूर्यसंक्रान्तिदिनम् स्त्रीसेवनं, पक्षमध्ये मांसभक्षणम्, तथा षष्ठीतिथौ तैलं वर्जयेत्। चतुर्दश्यां क्षौरकर्म विनाशयति। तथा च पुनः पुनर्यद्येतानि कर्माणि कुर्यात् तदा शीघ्रं विनाशं गच्छति।[१५७]

चतुर्दशी-अष्टमी-चतुर्थी-षष्ठी-द्वादशी-नवमी-एतास्तिथयः पक्षरन्ध्राः कथिताः। या अशुभप्रदाः स्युः। किन्तु एतासु तिथिषु क्रमेण ५-१४-८-१५ घटिकास्त्याज्याः। तत्रान्तिमा नाडी शुभप्रदा स्यात्। नवमीतिथिस्त्रिप्रकारेण ज्ञेया। यथा प्रवेशनवमी, प्रयाणनवमी तथा नवमदिननिर्गमनम्। तत्र प्रवेशनवमी विख्याता । प्रवेशाद्यतो नवमदिनं, प्रयाणनवमी तथा नवमदिनम्- एतन्नवमीत्रितयं निरन्तरं यात्रायां प्राणहानिकारकं स्यात्। यन्मङ्गलादिकं कार्यं

---

१५७ व.सं. श्लो. ९ तः २२

मासदग्धासु तिथिषु कुर्यात्, तत्सर्वं नाशकरं भवेत्, यथा ग्रीष्मे कुसरितः। एकान्तरासु तिथिषु-द्वितीयायां धनु-मीनगते सूर्ये, चतुर्थ्यां वृषकुम्भयोः स्थिते सूर्ये, षष्ठ्यां कर्कमेषयोः स्थिते सूर्ये, अष्टम्यां कन्यामिथुयोः स्थिते सूर्ये, दशम्यां सिंहवृश्चिकयोर्गते सूर्ये, तथा च द्वादश्यां तुलामकरयोः स्थिते सूर्ये मासदग्धास्तिथयः स्युः। अष्टम्यादितिथौ, लोकेषु ये जना अभीष्टमिच्छन्ति ते कथितं पुण्यकर्म वर्जयेयुः। तथा च मस्तक-कपाल-नख-चर्म-तिलादिकार्यं वर्जयेत्।[१५८]

त्रयोदशी – नवमी – द्वितीया – चतुर्थी – अमावस्यातिथौ रविवासरे एतयोस्तिथिवारयोरामलक – स्नानं सम्पत्पुत्रविनाशनं भवति। पर्वसु, पाते(वैधृति-व्यतीपाते), ग्रहणे(चन्द्रसूर्ययोः) यो नरस्तैलस्त्रीमांससेवनं करोति स नरश्चाण्डालयोनिं प्राप्नोति। पूर्णिमा यदि दिने स्यात् तदा सा राका कथ्यते । तथा च यदि रात्रौ स्यात् तदा - अनुमती कथ्यते । एवं सा द्विविधा भवेत्।[१५९]

यस्यामावस्यायां चन्द्रस्य कला दृश्येत्, सा अमावस्या सिनीवाली तथा च यस्यामावस्यायां चन्द्रस्य कला नष्टा क्षीणा वा भवेत्, सा अमावस्या कुहू कथ्यते। एतत्सर्वं तिथीनां निर्णयार्थे कथितम्।[१६०]

आश्विनशुक्लनवमी, कार्त्तिकशुक्लद्वादशी, चैत्रशुक्लतृतीया, भाद्रपदशुक्लतृतीया, श्रावण-अमावस्या, पौषशुक्ल-एकादशी, आषाढशुक्लनवमी, माघशुक्लसप्तमी, आषाढकृष्ण-अष्टमी, आषाढ-कार्त्तिक-फाल्गुन-चैत्र-ज्येष्ठमासानां पौर्णिमातिथिः- एताः सर्वास्तिथयो मन्वनतरादितिथिय उक्ताः। याः पुण्यफलं ददति। एतासु तिथिषु पितृकर्म-जप-हवन-दानादिकं कुर्यात्, अक्षय्यं फलं प्राप्नोति।[१६१]

---

१५८ व.सं. श्लो. २२ तः २७
१५९ व.सं. श्लो. २८,२९,३०
१६० व.सं. श्लो. ३१

माघ–अमावस्या, भाद्रपदकृष्णत्रयोदशी, वैशाखशुक्लतृतीया, कार्त्तिकशुक्लतृतीया–एता युगारम्भतिथयः कथ्यन्ते। यथा सत्ययुगप्रारम्भतिथिर्वैशाखशुक्लतृतीया, त्रेतायुगारम्भतिथिः कार्त्तिकशुक्लनवमी, द्वापरयुगारम्भतिथिर्भाद्रपदकृष्णत्रयोदशी तथा च कलियुगारम्भतिथिर्माघ–अमावस्या।[१६२]

यत्समये कृष्णत्रयोदशीदिने चन्द्रमाः सूर्येण सह योगं करोति तदा गजच्छायायोगः पितॄणां पुण्यदः कथितः।[१६३]

एकस्मिन्वारे तिस्रस्तिथयो भवन्ति तदा मध्यमगतिथेर्ह्रासो भवति। अतस्तिथिक्षयः कथ्यते। यदि वारत्रयेऽप्येका तिथिः स्यात्, तदा वृद्धितिथिः कथ्यते। सा त्रिद्युस्पृक्संज्ञा द्वे क्षयवृद्धितिथी अतिनिन्दितौ स्याताम्। त्रिद्युस्पृक्क्षयदिने वा यो मङ्गलकार्यं कुर्यात्, स भस्मीभवति, यथा अग्निमध्ये प्रक्षिप्तं सम्यगिन्धनम्।[१६४]

व्रतारम्भो मार्गशीर्षमासे यद्दिनेऽखण्डातिथिः स्यात् तथा च गुरुशुक्रयोरस्तो न भवेत्, तदा कुर्यात्। सूर्यास्तकाले या तिथिर्मुहूर्तत्रयवाहिनी भवति, सा तिथिः खण्डाख्या स्यात्। यदि चेत् खण्डिता न्यूना, तदा न्यूना संज्ञिता स्यात्।[१६५]

विदुषां मते माघशुक्लसप्तमीतिथिः सूर्यस्य तिथिरिति मन्यते। तद्दिने गव्येन, पयसान्नेन, मृणालैः सूर्यं सम्यगर्चयेत्। प्रतिवर्षं भक्तिपूर्वकं यो नरो जीवनपर्यन्तं पूजनं करोति स रोगरहितः स्यात्। स लक्ष्मीं प्राप्नोति तथा च रोगी रोगात् प्रमुच्यते। पूजाकर्मार्थे मध्याह्नव्यापिनी तिथिर्ग्राह्या तथा चोपवासव्रतार्थे मुहूर्तत्रयव्यापिनी ज्ञेया। नक्तव्रतेषु

---

१६१ व.सं. श्लो. ३२, ३३, ३४, ३५
१६२ व.सं. श्लो. ३६
१६३ व.सं. श्लो. ३७
१६४ व.सं. श्लो. ३८, ३९
१६५ व.सं. श्लो. ४०,४१

प्रदोषव्यापिनी तिथिर्ग्राह्या। तत्र ह्रास-वृद्धि-समत्वं विचिन्त्य निर्णयं कुर्यात्।[१६६]

यो नरो माघकृष्णचर्तुदश्यां तिथावुपवासं कृत्वा शिवं पूजयेत्, सः शिवलोकं प्राप्नोति। तथा च यो नरो भक्तिपूर्वकं जागरं करोति तस्य पुनर्जन्म नास्ति। स वै मुक्तो भवति। यदि चतुर्दशीतिथिरर्धरात्रसंयुक्ता भवेत्, तदा यच्छिवरात्रिव्रतं कथ्यते, तद्दिने नृत्यगीतादिना शिवमर्चयेत्। फाल्गुनकृष्णत्रयोदशीतिथौ कामं दग्ध्वा यो नरः शिवं पूजयेत्, तथा च त्रिदिनपर्यन्तं भस्मं धारयेत्, स तेजस्वी लक्ष्मीं प्राप्नोति। चैत्रशुक्लचतुर्दश्यां तिथौ दमनेन शिवमर्चयेत्, तदा स नरोऽब्दफलं प्राप्य धनवान् भवेत्। वैशाखशुक्लतृतीयायां यो नरो देवान् पितॄनर्चयेत्, स नरो मनसो दुःखनाशमश्नुते,स्वर्गलोकं च प्राप्नोति। वैशाखमासे तृतीयायां धर्मप्रीतिपूर्वकं ब्राह्मणेभ्यः पादुकोपानच्छत्र-दधि-अन्न-करपात्रादीन् प्रयच्छति, यो नरः सर्वप्राणिनां व्यञ्जन-गन्ध-पुष्पान्नादीनां प्रदानं करोति, स विमानच्छत्रचामरयुतस्तेजस्वी धनवान् भोगी स्यात्। नृत्यगीतादियुक्तः सर्वाभरणभूषितः स अप्सरोभिः समाकीर्णः स्वर्गलोकमश्नुते। आषाढशुक्लपञ्चमीदिने यो नरः कार्त्तिकेयपूजनं कृत्वा पिष्टान्नप्राशनं करोति, स नरो व्रणरोगान्मुक्तो भवेत्। पिष्टान्नप्राशनव्रते पूर्वविद्धायास्तिथेर्ग्रहणं करणीयम्। नृभी रात्रावेव पिष्टान्नप्राशनं विधेयम्। आषाढचतुर्दशीदिने यो नरः पवित्रेन शिवमर्चयेत्, स अब्दपूजाफलं लब्ध्वा धनवान् भवेत्।[१६७]

श्रावणमासस्य कृष्णाष्टमीतिथौ रात्रिसमये रोहिणीनक्षत्रम्, तत्समये साक्षात् विष्णुभगवानवतीर्णः। यो नरस्तस्य जन्मतिथिदिन उपवासं कृत्वा, जातकर्मादिकं कृत्वा जागरं करोति, स वैष्णवपदं प्राप्नोति। भाद्रपदमासे शुक्लचतुर्थीदिने सर्वविघ्नोपशान्तये गणनायकं मोदकैरर्चयेत्। भाद्रपदमासे यस्मिन् दिन आर्द्रानक्षत्रं भवेत्, तदा मध्याह्नकालपश्चात् ज्येष्ठायाः

---

१६६ व.सं. श्लो. ४२ तः ४५

१६७ व.सं. श्लो. ४६ तः ५६

पूजनं कर्तव्यम्। आश्विनमासे शुक्लपक्षे नवम्यां तिथौ लक्ष्मीदेवीपूजनं कृत्वार्चयेत्। तथा च सरस्वत्या आयुधानां च पूजनं कृत्वा जयमाप्नोति। सर्वकार्येषु विजयादशमी (आश्विनशुक्लदशमीतिथिः ) श्रेष्ठा उक्ता। राज्ञां यात्रायां विजयकरी तथा च सम्यक्सम्पत्तिप्रदानं करोति। कार्त्तिकमासे शुक्लपक्षे चतुर्थीदिने यो नरः क्षीर-पिष्टगुडाद्यैः सर्पाणां भक्तितः पूजनं करोति, स कदापि सर्पाद् भयं न प्राप्नोति। एकादशीतिथिमारभ्य यावत् पञ्चदिनपर्यन्तं भीष्मपञ्चकं ज्ञेयं ,तन्नृणां पापविनाशकर्तृ स्यात्। वर्षपर्यन्तं तपः कृत्वा यत् पुण्यं लभ्यते, तत्पुण्यं कार्त्तिकमासे तपः कृत्वा लभ्यते तथा च यत्पुण्यफलं कार्त्तिकमासे तपः कृत्वा लभ्यते, तत्पुण्यफलं भीष्मपञ्चके तपः कृत्वा लभ्यते। कार्त्तिकमासे पौर्णिमादिने यदि कृत्तिकानक्षत्रं भवेत्, तत्समये यो नरो विष्णुदर्शनं करोति, तस्य सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति। यो नरो विधिपूर्वकं पूजनं कृत्वा वृषमुत्सृजेत्, अथवा कार्त्तिकेयपूजनं विधिपूर्वकं करोति, सः सर्वपापात् प्रमुच्यते।[१६८]

शुद्धा, त्रेधा तथा विद्धा त्रिविधा भिन्ना तिथिर्ज्ञेया। क्षयतिथिः, विद्धातिथिस्तथा समा तिथिः। एतासु त्रिस्त्रृषु तिथिषु मध्ये यद्येका तिथिस्त्रिप्रकारेण विद्धा। या तिथिः पुनर्भिन्ना द्वादशीतो न्यूनाधिककारणेन समसंज्ञा ज्ञेया। आद्यासु षट्सु (प्रतिपत्तः षष्ठीपर्यन्तं) तिथिषु पूर्वैव द्वयोर्मध्ये व्यवस्थान्तर्गते गृहस्थीनामेव। संन्यासिनां कृते नवमी तिथेः परं ग्रहणं कर्तव्यम्। यद्यमावस्या त्रिप्रहराधिका, तदा वृद्धिगामी कथ्यते। पितृकार्यार्थे सा तिथिर्ग्राह्या । या पूर्वा तिथिः सा क्षयात्मिका स्यात्। अपराह्णकाले भवेत् सम्पूर्णा तिथिर्यदि सायंकालेऽपि स्यात्, सैव प्रत्याब्दिकी ग्राह्या न तु द्वितीया, या भिन्ना तिथिः सा पुत्रहानिदा स्यात्। क्षयतिथिदिने पूर्वतिथिशोधनकार्यं कर्तव्यम्। तथा च वृद्धितिथिदिने योग्यं कार्यं कर्तव्यम्।

---

१६८ व.सं. श्लो. ५६ तः ६७

तिथिद्वयान्तर्गते श्राद्धमेवं व्रतकार्यं कर्तव्यम्।[१६९]

तिथीनां पञ्चदश भागाः पक्ष उक्तः। तथा यत्कर्मोक्तं कार्यं तिथिपरत्वेन कथितं, तत् सम्पूर्णं कार्यं, यस्यामप्यखिलं भवेत्।[१७०]

यो दैवज्ञः स्फुटं पञ्चाङ्गं यल्लोके जानाति, सः कालरूपस्य परमेश्वरस्य कृपां संप्राप्यामृतस्य समुद्भवं करोति।[१७१]

**अथ तिथिपरत्वेन करणीयं शुभाशुभं कार्यम् –**

१. प्रतिपद् – विवाह–यात्रा–उपनयन–प्रतिष्ठा(देवप्रतिष्ठा)– सीमनतोनयन–चौलकर्म–वास्तुकर्म–गृहप्रवेश–सम्पूर्णमङ्गलकार्यमिति–एतानि सिद्ध्यन्ति। दन्तधावनं न स्यात्।

२. द्वितीया – यात्रा–विवाह–आभूषण–नृपस्य सप्ताङ्गचिह्नानि (नृप–अमात्य–दण्ड–मित्र–दुर्ग–कोष–गुप्तचर)वास्तुकर्म व्रतबन्ध(उपनयन)–आदिकं सम्पूर्णमङ्गलकार्यं सिद्ध्येत् । आमलकस्नानेन पुत्रसम्पत्तिनाशः स्यात्।

३. तृतीया – सङ्गीत–विद्या–सम्पूर्णशिल्पकर्म–सीमन्तोनयन–चौलकर्म–अन्नप्राशन–गृहप्रवेश–यात्रा–विवाह–आभूषण–वास्तुकर्म–उपनयन–नृपस्य सप्ताङ्गचिह्नानि तथा च सम्पूर्णमङ्गलकार्यं कारयेत्।

४. चतुर्थी – शत्रोर्वध–बन्धन–शस्त्र–विष–घातादिकं च सिद्धिं याति।

---

१६९ व.सं. श्लो. ६८ तः ७३

१७० व.सं. श्लो. ७४

१७१ व.सं. श्लो. ७५

SMT. HANSA MEHTA LIBRARY M. S. University of Baroda

कार्यं कुर्यात्। किन्तु माङ्गलिककार्यं कारयेत्, तदा विनाशो
आमलकस्नानेन पुत्र-सम्पत्तिनाशो भवति ।

५. पञ्चमी – ऋणप्रदानं विना नागतिथौ(पञ्चमीतिथौ) चरस्थिराणि उक्तानि-अनुक्तानि यानि च शुभानि कार्याणि तानि प्रभूतं सिद्धिं प्रयान्ति।

६. षष्ठी – अभ्यङ्ग-यात्रा-पितृकर्म तथा दन्तकाष्ठं विना पौष्टिकमङ्गलकार्यं वास्तुकर्म-वस्त्राभूषणधारणं-रणोपयोग्यशिल्पानि विधेयानि दन्तधावनं विधिहन्तकं स्यात्। तैलं वर्जयेत्।

७. सप्तमी – यात्रा-विवाह-आभूषण-नृपस्य सप्ताङ्गचिह्नानि-वास्तुकर्म-व्रतबन्ध-सम्पूर्णमङ्गलकार्य-संगीतविद्या-शिल्पकर्म-सीमन्तोनयन-चौलकर्म-अन्नप्राशन-गृहप्रवेशादिकार्यं कारयेत्।

८. अष्टमी – संग्राम-योग्य-सम्पूर्णवास्तुशिल्प-लेखनकर्म-आभूषण-स्त्री-रत्नचर्या-नृत्यप्रभेदादिकं सिद्धं भवेत् । शीर्षकपालांत्राणि नखचर्मतिलादीनि वर्जयेत् ।

९. नवमी – शत्रोर्वध-बन्धन-शस्त्र-विष-अग्निघातादिकं कार्यं सिद्धं भवेत्, किन्तु माङ्गलिकं कार्यं विनष्टं भवेत् । आमलकस्नानेन पुत्र-सम्पत्तिविनाशो भवेत् ।

१०. दशमी – यात्रा-विवाह-आभूषण-नृपस्य सप्ताङ्गचिह्नानि (नृप-अमात्य-दण्ड-मित्र-दुर्ग-कोष-गुप्तचर)वास्तुकर्म व्रतबन्ध(उपनयन) संगीतविद्या-सम्पूर्णमङ्गलकार्य-शिल्पकर्म-सीमन्तोनयन-चौलकर्म-अन्नप्राशन-गृहप्रवेशादिकं कार्यम् ।

११. एकादशी – व्रतोपवास–देवोत्सव–सम्पूर्णधर्मकार्य–वास्तुकर्म–संग्राम–शिल्पकर्मादिकं कार्यम्। दन्तधावनं विधिहन्तकं स्यात्।

१२. द्वादशी – यात्रान्नग्रहणं विना चरस्थिराणि पृथिव्यां यानि कर्मपुष्टिशुभानि कार्याणि तानि सिद्ध्यन्ति। पृथिव्यामुपरि यानि शुभकार्याणि तानि सर्वाणि कार्याणि। तथा च यात्रा–चौलकर्म–अन्नप्राशन –गृहप्रवेशं त्यक्त्वा शेषाणि कार्याणि सिद्ध्यन्ति।

१३. त्रयोदशी – द्वितीयायां–तृतीयायां–पञ्चम्यां–सप्तम्यां–दशम्यां तिथौ यानि कार्याण्युक्तानि तानि कार्याणि त्रयोदश्यां विशेषतः सिद्ध्यन्ति। यात्रा–विवाह–आभूषण–नृपस्य सप्ताङ्गचिह्नानि–वास्तुकर्म–व्रतबन्ध– संगीतविद्या– सम्पूर्णमङ्गलकार्य– शिल्पकर्म –सीमन्तोनयनं सिद्ध्येत्। आमलकस्नानं वर्जयेत्, तत्पुत्र–सम्पत्तिविनाशकम्।

१४. चतुर्दशी – शत्रोर्वध–बन्धन–शस्त्र–विष–अग्निघातादिकं कार्यं सिद्धं भवेत्। किन्तु माङ्गलिकं कार्यं कृतं विनष्टं भवेत्। क्षौरकर्म वर्जयेत् । यदि चतुर्दशी अर्धरात्रिसंयुक्ता, तदा शिवरात्रिव्रतं कुर्यात्, गीतनृत्यादिना शिवमर्चयेत् ।

१५. पूर्णिमा – यज्ञक्रिया–सम्पूर्णपौष्टिकमङ्गलकार्य–वास्तुकर्म–विवाह–शिल्प–सम्पूर्णं , आभूषणादिकार्यं कारयेत्।

१६. अमावस्यां – सदैव पितृकर्म कार्यम्, नान्यत् शुभपौष्टिकाद्यं कार्यं विधेयम्। यदि तत्र शुभोत्सवाद्यं कर्म कृतं तत् ध्रुवं विनाशमायाति। पितृकर्म कारयेत्, किन्तु शुभोत्सवादिकर्म शीघ्रं विनश्येत् ।

**मासपरत्वेन तिथीनां शुभाशुभफलम्**[१७२] —-

१. **कार्त्तिकमासे** –

तिथिः शु. ४ – गुडक्षीरपिष्टेन सर्पपूजनं सर्पभयं दूरीभवति।

तिथिः शु. ९ – युगादिः, त्रेतायुगारम्भतिथिः कथ्यते।

तिथिः शु. १२ – मन्वन्तरादितिथिः पुण्यदा भवति। पितृकर्म कुर्वन्, जप–होम–दानेन अक्षयफलं प्राप्नोति।

तिथिः शु. १५ – पूर्णिमादिने कृत्तिकानक्षत्रे विष्णुदर्शनेन सप्तजन्मकृतं पापं विनश्यति ।

२. **मार्गशीर्षमासे** —

अखण्डतिथिदिने, यद्दिने गुरुशुक्रयोरस्तो न भवेत्, तदा व्रतस्यारम्भः करणीया।

३. **पौषमासे** —

तिथिः शु ११ – मन्वन्तरादितिथिः पुण्यदा भवति। तद्दिने पितृकर्म–जप–होम–हवन–दानेनाक्षयफलं प्राप्नोति।

४. **माघमासे** —

तिथिः शु.७ सूर्यतिथिस्तद्दिने गव्येन पयसान्नेन मृणालैः सम्यक् सूर्यार्चनम्। जीवनपर्यन्तं प्रतिवर्षं तद्दिने पूजयेत्, स रोगरहितो भवेत्, रोगान् मुक्तो भवेत्। तथा च स लक्ष्मीं प्राप्नोति। या मन्वन्तरादितिथिः पितृकर्म–जप–हवन–दानेनाक्षयफलं प्राप्नोति।

तिथिः कृ. १४– शिवव्रत–पूजनेन, जागरेण शिवलोकप्राप्तिर्भवेत्।

तिथिः कृ ३० – कलियुगारम्भस्तिथिः कथ्यते।

---

१७२ व.सं. श्लो. ४१ तः ६६

५. **फाल्गुनमासे** —

तिथि: शु.१५ – मन्वन्तरादितिथि: पुण्यदा, पितृकर्म–जप–होम–हवन–दानेन अक्षयफलं प्राप्नोति।

तिथि: कृ. १३ – शिवपूजनं कृत्वा भस्मलेपनं त्रिदिनं कुर्वन् तेजस्वी भवति। तथा लक्ष्मीं प्राप्नोति।

६. **चैत्रमासे** —

तिथि:शु. ३– मन्वन्तरादितिथि: पुण्यदा, पितृकर्म–जप–होम–हवन–दानेनाक्षयफलं प्राप्नोति।

तिथि: शु.१४ –शिवार्चनम्, अब्दपूजाफलं प्राप्य धनिको भवेत्।

तिथि: शु.१५ –मन्वन्तरादितिथि: पुण्यदा, पितृकर्म–जप–होम–हवन–दानेनाक्षयफलं प्राप्नोति।

७. **वैशाखमासे** —

वैशाख्यां यो नरो विप्रमुख्येभ्यो पादुकौपानच्छत्र–दधि–अन्न–करपात्रकं धर्मप्रीत्या प्रयच्छति, तथा च समस्तप्राणिनां व्यञ्जन–गन्ध–पुष्प–अन्नप्रदानं करोति। स धनिको भोगी तेजस्वी विमान–छत्र–चामर–आभूषणैर्युतो दिव्याङ्गनासमाकीर्ण: स्वर्गलोकं प्राप्नोति।

तिथि: शु.३–सत्–युगारम्भतिथि:, पितृपूजनं मनोदु:खहरम्, स्वर्गलोकप्राप्तिकरम्।

८. **ज्येष्ठमासे** —

तिथि:शु.१५ – मन्वन्तरादितिथि:, पितृकर्म–जप–हवन–दानेनाक्षयफलम्।

९. **आषाढमासे** —

तिथि: शु.५ – कार्त्तिकेयपूजनं, पिष्टान्नप्राशनेन व्रणरोगान्मुक्ति:।

तिथि: शु ९ – मन्वन्तरादितिथि: पुण्यदा, पितृकर्म–जप–हवन–दानेनाक्षयफलम्।

तिथि: शु/कृ१४)- पवित्रेण शिवपूजनं वत्सरपर्यन्तं, धनवान् भवेत्।

तिथि: शु.१५ - मन्वन्तरादितिथि: पुण्यदा, पितृकर्म-जप-हवन-दानेनाक्षयफलम्।

१०. **श्रावणमासे** —

तिथि: कृ.८ - श्रावणमासे कृष्णपक्षेऽष्टमीतिथि: रोहिणीनक्षत्रदिने विष्णुप्रादुर्भाव: श्रीकृष्णजयन्ती। मन्वन्तरादितिथि: पुण्यदा पितृकर्म-जप-हवन-दानेनाक्षयफलम्।

तिथि: कृ.३० - मन्वन्तरादितिथि: पुण्यदा पितृकर्म-जप-हवन-दानेनाक्षयफलम्।

११. **भाद्रपदमासे** —

तिथि: शु.३ - मन्वन्तरादितिथि: पुण्यदा, पितृकर्म-जप-हवन-दानेनाक्षयफलम्।

तिथि: शु.४ - सम्पूर्णविघ्नोपशान्तये गणेशपूजनं कारयेत्।

तिथि: शु. ८ - मध्याह्नकालपश्चात् इन्द्रनक्षत्रं तदा ज्येष्ठापूजनं करणीयम्।

तिथि: कृ.१३ - द्वापरयुगारम्भतिथिर्मन्यते।

१२. **अश्विनमासे** —

तिथि: शु.९ - युद्धे विजयप्राप्त्यर्थे सरस्वती-आयुधानि पूजयेत्, लक्ष्मी-आराधना कर्तव्या।

तिथि:शु.९ - मन्वन्तरादितिथि:पुण्यदा, पितृकर्म-जप-हवन-दानेनाक्षयफलम्।

तिथि: शु.१० - विजयादशमीतिथि: सर्वकार्येषु श्रेष्ठा राज्ञां युद्धे विजयप्राप्तिदा, सम्पत्तिप्रदा च भवति।

एकादशीमारभ्य पञ्चदिनपर्यन्तं भीष्मपञ्चकं पापं विनाशयति। कृष्णत्रयोदशीदिने यदि चन्द्रमा: सूर्येण सह योगं करोति तदा गजच्छायायोग: पितॄणां पूजनेन पुण्यं प्राप्यते। त्रिद्युस्पृक्संज्ञातिथिदिने मङ्गलकार्यम्, जन्मतिथिदिन उपोषित:, जागरं कृत्वा, जातकर्मादि

करोति, स वैष्णवपदं व्रजेत्।

विशेषः – मासानां वर्णनं कार्त्तिकादिपद्धत्या कृतम्। महाराष्ट्रे चैत्रादिपद्धतिः प्रचलिता भवति। ज्येष्ठादेवीपूजनं वर्णितं भाद्रपदे। महाराष्ट्रे अनुराधानक्षत्र आवाहनं, ज्येष्ठायां पूजनं श्रवणेन विसर्जनम्। भाद्रपदे गणेशपूजनमपि प्रायेण महाराष्ट्रस्याचारः।

## १.५.२ वृद्धवसिष्ठसंहितायां वारस्वरूपविचारः-

अथ वृद्धवसिष्ठसंहितायास्त्रयोदशाध्याये वारस्वरूपविषये विंशतिश्लोकाः सम्मिलिताः। अध्याये रविवारादिवारेषु, सप्तवारेषु कृतं विविधं शुभाशुभकार्यं, ग्रहाणां स्वभावा वर्णाः, सप्तवारेषु वस्त्रधारणफलम्, वारप्रवृत्तिः, होरासाधनपद्धतिः – इत्यादयो विषया वर्णिताः। अथ रविवारादिसप्तवारेषु करणीयानि विविधकार्याणि निम्नदर्शितानि सन्ति।[१७३]

१. रविवारः – राज्याभिषेक- उत्सवादिकार्य-मङ्गलकार्य-सेवाकर्म-आहव-औषध-चित्रकर्म-धातुसम्बन्धितक्रिया-आभूषण-लाक्ष-चर्म-धान्य-उष्ट्रादिपशूनां क्रयविक्रयकार्यं कर्तव्यम्। अभ्यङ्गे (तैललेपनेन) प्राणिनो दुःखमाप्नुवन्ति। रविवारे यदि नूतनवस्त्रं धारयेत्, तदा जीर्णवस्त्रं प्राप्नोति। बुद्धिमान् दन्तकाष्ठं-क्षुरकर्म कारयेत्, तदा शस्त्रेण सम्यक् समग्रस्वशरीरघातं कुर्यात्, इति फलं लभ्यते। कालहोरावेलायां गृहनिर्माणं करोति, गृहप्रवेशं करोति वा तदा तस्य गृहमग्निद्वारा दह्यते।

२. सोमवारः – मुक्ता-जल-शङ्ख-स्फटिक-इक्षु-रौप्य-क्षीर-औषध-उद्यान – कार्याणि सोमवासरे करणीयाणि। सोमवासरेऽभ्यङ्गः(तैललेपनेन) कान्तिदः। सोमवासरे

---

१७३ व.सं. श्लो. १ तः ७, ९, १८, १९, २०

नूतनवस्त्रं धारयेत् तदा जलार्द्रवस्त्रं प्राप्नोति।

३. भौमवार: – विष–अग्नि–शस्त्र–भेद–घमण्ड–चौर्य–अनृत–उग्रकर्म–वधकर्म –बन्धनकर्म –छिद्र– प्रवाल– अखिलधातुकर्म– अभिचारादि कार्याणि करणीयाणि। भौमवासरेऽभ्यङ्गो मृत्युदो भवेत्। भौमवासरे नूतनवस्त्रं धारयेत् तदा दहनप्रदग्धं वस्त्रं प्राप्नोति। बुद्धिमान् यदि तद्दिने दन्तकाष्ठं क्षुरकर्म कारयेत्, तदा शस्त्रेण समग्र–स्वशरीरघातं–इति फलमाप्नोति। यत् दिने कालहोरासु वेलायां गृहनिर्माणं करोति, गृहप्रवेशं वा करोति, तदा तस्य गृहमग्निद्वारा दह्यते।

४. बुधवार: – नैपुण्य–वाहन–शिल्प–सन्धि–व्यायामपण्यकर्म(वणिक्कार्य)–अखिललेखनादि–धातुक्रिया–विद्रुम–भूषणादिगणितसम्बन्धितं समस्तकर्म करणीयम्। बुधवासरेऽभ्यङ्गो लक्ष्मीद: कीर्तिदश्च । बुधवासरे नूतनवस्त्रं धारयेत् तदा लक्ष्मीकरं स्यात्।

५. गुरुवार : – यज्ञक्रिया–मङ्गलकार्य–पुष्टि–विद्या–सुवर्ण–वस्त्रोद्यान–आभूषणादिकार्य–औषधि–शास्त्र–नृत्यगीतादि:, तथा समस्तचरस्थिरादिकार्यं करणीयम्। गुरुवासरेऽभ्यङ्गो शत्रुवृद्धिद:। गुरुवासरे नूतनवस्त्रं धारयेत् ,लाभकरं स्यात्।

६. शुक्रवार: – स्त्री–गीत–मुक्ताफल–वज्र–रौप्य–सुगन्ध–शय्या–आभूषण–वस्त्र उद्यान–कृषि–जलसम्बन्धितकार्य–लता–अस्त्र–पण्यकर्म–माङ्गलिक कर्मपुष्पादिकर्म करणीयम्। शुक्रवासरेऽभ्यङ्गो रोगप्रद:। शुक्रवासरे नूतनवस्त्रं धारयेत्,तदा प्रियाप्तिफलं लभ्यते।

७. शनिवार: – समस्तवस्तूनां ग्रहणं–अश्म–सीस–दीक्षा–त्रपुस्थैर्यग्रहादिकर्म–खर–उष्ट्र–गो–सुवर्ण–तुला–दास–पापकर्म–अनृतादिकर्म करणीयम्। शनिवासरेऽभ्यङ्गो भोग–आरोग्यवृद्धिकारकस्तथा च नित्यं कीर्तिलक्ष्मीप्राप्तिकर:। शनिवासरे यदि नूतनवस्त्रं धारयेत्,तदा मलप्रदिग्धं मलिनतायुवतं वस्त्रं प्राप्नोति। तद्दिने दन्तकाष्ठं क्षुरकर्म कारयेत् तदा

शस्त्रेण सम्यक् स्वशरीरघात इति फलं प्राप्नोति।

पूर्णचन्द्रमाः, बुधशुक्रबृहस्पतिवाराः सर्वकार्येषु श्रेष्ठाः। किन्तु यानि कार्याणि सूर्य-शनि-मङ्गल-वासरेषु कथितानि, तानि सर्वाण्युपर्युक्तदिने शुभानि भवन्ति। बलप्रदस्य ग्रहवासर उद्दिष्टकार्यं कृतं, सिद्धिप्रदानं करोति। सुदुर्बलस्य ग्रहवासरे प्रयत्नेनापि नैव साध्यम्। यस्य ग्रहस्यैव वासरे यत्कर्म प्रदिष्टम्, तत्सर्वमन्यवारेष्वभीष्टग्रहस्य वारे तस्य कालहोरायां करणीयम्। दिक्शूलादिविचारस्तत्कालहोरासु चिन्तयेत्। अभ्यङ्गोऽनुक्तवारतिथिषु, अमावस्यातिथौ भद्रायां, पातग्रहणयोः काल औषधेन युततैललेपनेन दोषो न भवेत्।[१७४]

**वारप्रवृत्ति :** - सूर्योदयकालतो वारप्रवृत्तिर्लङ्कादेशतः-अर्थात् भूमध्यरेखातः स्यात्। तस्योर्ध्वाधोभागे स्थितदेशानां चरार्धमेवं देशान्तरघट्यादीनामृणं, घनान्तरं कृत्वा वारप्रवृत्तिः स्यात्। दिनेशात् २ घटी (अर्थात् १-१ ) क्रमेण प्रत्येकग्रहः सूर्यादिग्रहक्रमेण होरापतयः स्युः। सार्धेन नाडीद्वितयेन षष्ठः, षष्ठश्च, षष्ठश्च पुनः पुनश्च। क्षणवारार्थं वारप्रवृत्तिविज्ञानं स्यात्। किन्त्वन्यसमस्तकार्येषु सूर्योदयकालक्रमेण रविवारादिक्रमेण ज्ञेयाः। सूर्यः स्थिर एवं रक्तवर्णः, चन्द्रमा चर एवं गौरवर्णः, भौम उग्र एवमतिरक्तवर्णः, बुधो मिश्र एवं पीतवर्णः, गुरुर्लघु एवं सुवर्णवर्णः, शुक्रो मृदुरेवं रौप्यवर्णः, तथा च शनिः (सौरिः ) तीक्ष्णतनुरेवं कृष्णतनुश्च भवति।[१७५]

## १.५.३ वृद्धवसिष्ठसंहितायां नक्षत्रस्वरूपम्-

अथ वृद्धवसिष्ठसंहितायाश्चतुर्दशाध्याये नक्षत्रस्वरूपनामके ११२ श्लोकाः सम्मिलिताः।

---

१७४ व.सं. श्लो. १०,१४, १५, १६

१७५ व.सं. श्लो. ८, ११,१२,१३,१७

अथ नक्षत्रस्वरूपाध्याये नक्षत्राणां स्वामिनः[१७६], तारकाणां संख्या[१७७], अन्धादिसंज्ञा[१७८], अधोमुखादिसंज्ञा[१७९] तीक्ष्ण-दारुणसंज्ञा[१८०] -इत्यादीनां वर्णनम्। कस्मिन् नक्षत्रे, कस्मिन् वारे, कस्य कार्यस्य सिद्धिर्भवति -इति विवेचनं भवति। यथा अश्विनीनक्षत्रस्य संज्ञा लघुक्षिप्रसंज्ञा, अतो यात्रा-भेषज-आभूषण-विद्या-अश्व-गजयान-शिल्पकर्म-वस्त्रादिमङ्गलकार्यं सिद्ध्यति। तत्र यदि गुरुवारस्तदा विशेषरूपेण सिद्धं भवति। अथ वारादिपरत्वेऽपि नक्षत्राणां संज्ञानुसारेण कार्याणि सिद्धानि भवन्ति। नक्षत्राणामधोमुखादिसंज्ञापरत्वे कार्याणि विवेचितानि। नक्षत्राणामन्धादिसंज्ञा नष्टवस्तुप्राप्त्यर्थे विचारणीयाः। अभिजिन्नक्षत्रसाधनपद्धतिर्वर्णिताः। नक्षत्राणामश्विन्यादिनक्षत्राणां कुल-उपकुलसंज्ञापरत्वे करणीयाणि कार्याणि विलिख्य[१८१] मनुष्याणां जीवने मृत्युपर्यन्तं विविधाः संस्कारा वर्तन्ते। एते विविधाः संस्काराः कस्मिन् नक्षत्रे करणीया इति नक्षत्रस्वरूपाध्याये वर्णनमस्ति। अथ च हलप्रवहणं, बीजारोपणं, वापीकूपतडागादिनिर्माणं च, जलाशयप्रारम्भः, क्रयविक्रयः, पशूनां यात्रा, नष्टधनप्राप्तिः, नूतनवस्त्रधारणम् – इत्यादयो विषया वर्णिताः। तथा च सर्वेषु नक्षत्रेषु पुष्यनक्षत्रं श्रेष्ठम्- इति प्रतिपादितम्। अत्र त्रिपुष्करयोग-द्विपुष्करयोगे कृतस्य फलं तथा शान्त्यर्थे किं कर्म कर्तव्यम् एतद् विषये सविस्तरं वर्णितम्। लाङ्गलचक्रनिर्माणविषयेऽपि वर्णितमस्ति।

अथ अश्विन्यादिनक्षत्राणां नामानि, तारकाणां संख्या, नक्षत्रसंज्ञा, तथा च कार्यसिद्धिविषये

---

१७६ व.स. श्लो. १
१७७ व.स. श्लो. ९३,९४
१७८ व.स. श्लो. ९०
१७९ व.स. श्लो. ८२,८३,८४
१८० व.स. श्लो. ३० तः ४०
१८१ व.स. श्लो. ८५ तः ८९

सविस्तरं वर्णनं निम्नलिखितरूपेण विद्यते।[१८२]

१) अश्विनी - अश्विनीनक्षत्रस्य तारकास्तिस्त्रः सन्ति। तस्य स्वरूपं अश्वमुखसमानम्। अश्विनीनक्षत्रस्य स्वामी अश्विनीकुमारोऽस्ति। अश्विनीनक्षत्रं मन्दसंज्ञकं, कुलसंज्ञकं, पार्श्वमुखं तथा च लघुक्षिप्रसंज्ञकं मन्यते। अश्विनीनक्षत्रे यात्रा-भेषज(औषधि)-आभूषण-गजाश्वयानादि-शिल्पकर्म-वस्त्रादिकं मङ्गलकार्यं कर्तव्यम्। गुरुवासरे एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अखिलपार्श्वाननकार्यं कर्तव्यम्। यात्रायां भङ्गो हानिर्वा भवेत्। तथा च मनुजाः, कुलमुख्याः, स्वकुले प्रधाना भवन्ति। चलसंज्ञकनक्षत्रेषु कथितं कार्यं, औषध-पण्य-आभूषण-शिल्पलता-ज्ञानकर्मादिसिद्धिः स्यात्।

२) भरणी - भरणीनक्षत्रस्य तारकास्तिस्त्रः सन्ति। तस्य स्वरूपं योन्याकारम्। भरणीनक्षत्रस्य स्वामी यमोऽस्ति। भरणीनक्षत्रं मध्यमसंज्ञकं, उपकुलसंज्ञकं, अधोमुखं तथा च उग्र-क्रूरं मन्यते। भरणीनक्षत्रे साहस-दारुणकर्म-शत्रुशमन-कूपखननं-कृषिकर्म-विष-वध-बन्धन-दहनप्रहरणकार्याणि करणीयाणि। भौमवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। भरणीनक्षत्रेऽधोमुखादिकार्यं कर्तव्यम्।यात्रायां शीघ्रं निःसंशयेन विजयं प्राप्नोति। मनुजः परधनभोक्ता स्यात्। निखिलान्युग्र-साधारणकार्याणि कर्तव्यानि। मारण-भेदन-बन्धन-विष-दहनादीनि पञ्चकर्माणि सिद्ध्यन्ति। औषधि-पात्र-विद्या-विवाह-शिल्प-व्रत-वस्त्र-आभूषण-देवप्रतिष्ठा-वास्त्वारम्भकार्यं सिद्ध्यति।

३) कृत्तिका - कृत्तिकानक्षत्रस्य तारकाः षट् सन्ति। तस्य स्वरूपं नापितक्षुरवत्। कृत्तिकानक्षत्रस्य स्वामी, अग्निरस्ति। कृत्तिकानक्षत्रं सुलोचनसंज्ञकं, कुलसंज्ञकम्, अधोमुखं तथा च साधारणसंज्ञकं मन्यते। कृत्तिकानक्षत्रेऽग्निपरिग्रह-साहस-शत्रुवध-दहन-अस्त्र-शस्त्र-धातुकर्म-वाद्यविधान-विवाद-लोह-अश्मादिकार्याणि

---

१८२ व.सं. श्लो.२ तः २८

करणीयानि। बुधवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अधोमुखादिकार्यं कर्तव्यम्। यात्रायां भङ्गो वा हानिर्भवेत्। मनुजा: स्वकुले प्रधाना भवन्ति। निखिलानि उग्र-साधारणकार्याणि सिद्ध्यन्ति।

४) रोहिणी – रोहिणीनक्षत्रस्य तारका: सप्त सन्ति। तस्य स्वरूपं सुरग्रहसदृशम्। रोहिणीनक्षत्रस्य स्वामी ब्रह्मास्ति। रोहिणीनक्षत्रम् अन्धसंज्ञकम्, उपकुलसंज्ञकम्, ऊर्ध्वमुखं तथा च स्थिर-ध्रुवसंज्ञकं मन्यते। रोहिणीनक्षत्रे सुर-नरगृहनिर्माण-विवाह-धन-धान्यसंग्रह-उपनयन-उत्सव-आभूषण-मङ्गलकार्य-पौष्टिककर्मादिकं करणीयम्। रविवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। नृपभवननिर्माणप्रवेश एवं बीजादिकार्यं सिद्ध्यते। अखिलानि कार्याणि सिद्ध्यन्ति। तथा च मृदुमैत्रसंज्ञकनक्षत्रेषु कथितानि कार्याणि सिद्ध्यन्ति। यात्रायां शीघ्रं नि:संशयेन विजयं प्राप्नोति। मनुजा: परधनभोक्तार: स्यु:।

५) मृगशीर्षम् – मृगशीर्षनक्षत्रस्य तारकास्तिस्त्र: सन्ति। तस्य स्वरूपं मणिसमानम्। मृगशीर्षनक्षत्रस्य स्वामी चन्द्रमा:। रोहिणीनक्षत्रं मन्दसंज्ञकं, कुलसंज्ञकं, पार्श्वाननमुखं तथा च मृदु-मैत्रं मन्यते। मृगशीर्षनक्षत्रे शान्तिकर्म-पौष्टिककार्य-शिल्पकर्म-विवाह-व्रतबन्धादिमङ्गलकार्य-देवप्रतिष्ठा-वास्तुक्षेत्रारम्भादिकार्यं सिद्ध्यति। शुक्रवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अखिलपार्श्वाननकार्याणि सिद्ध्यन्ति। यात्रायां भङ्गो हानिर्वा भवेत्। मनुजा स्वकुले प्रधाना भवन्ति। मङ्गल-वनिता-आभूषण-मन्दिरगीतादिकार्यं सिद्ध्यति।

६) आर्द्रा -आर्द्रानक्षत्रस्य तारकाणां संख्या एकास्ति। आर्द्रानक्षत्रस्य स्वामी रुद्रोऽस्ति। आर्द्रानक्षत्रं मध्यमसंज्ञकं, कुलाकुलसंज्ञकम्, ऊर्ध्वमुखं तथा च दारुणं-तीक्ष्णं मन्यते। आर्द्रानक्षत्रे प्रहरण-दारुणकर्म-बन्धन-युद्ध-विष-सन्धि-अग्निकर्म-छेदन-दहन-उच्चाटन-

मारणादिकर्म कर्तव्यम् । शनिवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति।दारुण-बन्धन-दाहन-प्रहरणकर्म सिद्ध्यते। अखिलानि कार्याणि कर्तव्यानि। यात्रायां सन्धिर्यात्रागमने सामान्यस्थितिः स्यात् ।

७) पुनर्वसु - पुनर्वसुनक्षत्रस्य तारकाश्चतस्रः सन्ति। पुनर्वसुनक्षत्रस्य स्वामी अदितिरस्ति। पुनर्वसुनक्षत्रं सुलोचनसंज्ञकम्, उपकुलसंज्ञकं, पार्श्वाननमुखं तथा च चर-चलसंज्ञकं मन्यते। पुनर्वसुनक्षत्रे शान्ति-पौष्टिककर्म-यात्रा-व्रत-प्रतिष्ठा-नृपाणां समस्तकृत्य-आभूषण-वास्तुविधान-वाहन-कृषिकर्मादीनि करणीयानि। सोमवासर एतानि कार्याणि विशेषरूपेण सिध्यन्ति। अखिलपार्श्वाननकार्यं कर्तव्यम्। यात्रायां शीघ्रं निःसंशयेन विजयं प्राप्नोति। मनुजः परधनभोक्ता स्यात्। मणि-मुक्ता-हेमफल-रजत-त्रपु-सीसकर्माणि कर्तव्यानि। वाहनकर्म-आभूषण-चलकार्य-उद्यान-मन्त्रसिद्धि-आदिकर्म सिद्ध्यति। लघुक्षिप्रसंज्ञाकथितं कार्यमपि सिद्ध्यति।

८) पुष्यम् - पुष्यनक्षत्रस्य तारकास्तिस्रः सन्ति। पुष्यनक्षत्रस्य स्वामी बृहस्पतिरस्ति। पुष्यनक्षत्रम् अन्धसंज्ञकं, कुलसंज्ञकम्, ऊर्ध्वमुखं तथा च लघु-क्षिप्रं स्यात्। पुष्यनक्षत्रे स्थिर-चलादिकार्य-शान्तिपौष्टिककर्म-आभूषण-शिल्प-व्रतोत्सवादिसम्पूर्णकार्यं-तत्र विवाहकार्यं त्यक्त्वा अन्यकार्याणि सिद्धिदायकानि भवन्ति। गुरुवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अखिलानि कार्याणि कर्तव्यानि। यात्रायां भङ्गो वा हानिर्भवेत्। मनुजा स्वकुले प्रधाना भवन्ति। औषध-पण्य-आभूषण-शिल्प-ललितज्ञानकर्मसिद्धिः स्यात्। चलसंज्ञकनक्षत्रेषु कथितानि कार्याणि कर्तव्यानि।

९) आश्लेषा - आश्लेषानक्षत्रस्य तारकाः सप्त सन्ति। आश्लेषानक्षत्रस्य स्वामी सर्पोऽस्ति। आश्लेषानक्षत्रं मन्दसंज्ञकम्, उपकुलसंज्ञकम्, अधोमुखं तथा च तीक्ष्णं-दारुणसंज्ञकं मन्यते। आश्लेषानक्षत्रे रात्रौ मानभङ्ग-साहसकर्म-वणिज-कपटकर्म-अग्नि-लोहादिसंग्रह-

अनृत-स्तेय(चौर्यकर्म)-आदिकर्म करणीयम्। शनिवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। दारुण-बन्धन-दहन-प्रहरण-मारणकार्यं सिद्ध्यति। अधोमुखकार्यं कर्तव्यम्। यात्रायां निःसंशयेन विजयं प्राप्नोति। मनुजाः परधनभोक्तारः स्युः।

१०) मघा – मघानक्षत्रस्य तारकाणां संख्या पञ्च अस्ति। मघानक्षत्रस्य स्वामिनः पितरः। मघानक्षत्रं मध्यमसंज्ञकं, कुलसंज्ञकं, अधोमुखं तथा च उग्र-कूरसंज्ञकं भवति। मघानक्षत्रे विवाह-वापीकूपतडागादि-उत्सवादिकर्म-नृपाणामखिलकर्म-पितृकर्म च कर्तव्यम्। एतानि कार्याणि भौमवासरे विशेषरूपेण सिद्ध्यन्ति। अधोमुखकार्यं कर्तव्यम्। यात्रायां भङ्गो वा हानिर्भवेत्। मनुजः स्वकुले प्रधानो भवति। मारण-भेदन-बन्धन-विष-दहनानि- एतानि पञ्चकर्मणि सिद्ध्यन्ति। औषधि-पात्र-विद्या-विवाह-शिल्प-व्रत-वस्त्र-आभूषण-देवप्रतिष्ठाकार्य-वास्त्वारम्भकार्यं-निखिलान्युग्राणि साधारणानि कार्याणि कर्तव्यानि।

११) पूर्वाफाल्गुनी- पूर्वाफाल्गुनीनक्षत्रस्य तारकाणां संख्या द्वे । पूर्वानक्षत्रस्य स्वामी भगदेवोऽस्ति। पूर्वाफाल्गुनीनक्षत्रं सुलोचनसंज्ञकं, कुलसंज्ञकम्, अधोमुखं तथा उग्र-कूरसंज्ञकं मन्यते। पूर्वाफाल्गुनीनक्षत्रे शिल्प-प्रहरण-बन्धन-दारुणकर्म-वस्त्र-चित्रकर्म-नटवृक्षादिकं शस्त्रसम्बन्धितकर्म च कर्तव्यम्। भौमवासर एतानि नक्षत्राणि विशेषरूपेण सिद्ध्यन्ति। अधोमुखकार्याणि करणीयानि। यात्रायां भङ्गो वा हानिर्भवेत्। मनुजः स्वकुले प्रधानो भवति। मारण-भेदन-बन्धन-विष-दहनानि - एतानि पञ्चकर्मणि सिद्ध्यन्ति। औषधि-पात्र-विद्या-विवाह-शिल्प-व्रत-वस्त्र-आभूषण-देवप्रतिष्ठाकार्य-वास्त्वारम्भकार्यं-निखिलानि उग्राणि साधारणानि कार्याणि कर्तव्याणि।

१२) उत्तराफाल्गुनी - उत्तराफाल्गुनीनक्षत्रस्य तारकाणां संख्या द्वे । उत्तराफाल्गुनीनक्षत्रस्य स्वामी अर्यमा अस्ति। उत्तराफाल्गुनीनक्षत्रम्, अन्धसंज्ञकं,

कुलसंज्ञकम्, ऊर्ध्वमुखं तथा च स्थिर-ध्रुवसंज्ञकं मन्यते। उत्तराफाल्गुनीनक्षत्रे उपनयन-विवाहसम्बन्धिनः समस्तकार्य-स्थिरकार्य-शिल्पकर्म-आभूषणकार्य-नगर-गृहारम्भ-वस्त्र-युद्धादिकार्यं कर्तव्यम्। रविवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। नृपभवननिर्माणप्रवेश एवं बीजादिकं समस्तं कार्यं सिद्ध्यति। अखिलानि कार्याणि कर्तव्यानि। यात्रायां भङ्गो हानिर्वा भवेत्। मनुजः स्वकुले प्रधानो भवति। मृदुमैत्रसंज्ञकनक्षत्रेषु कथितानि कार्याणि करणीयानि।

१३) हस्तम् - हस्तनक्षत्रस्य तारकाणां संख्या सप्त अस्ति। नक्षत्रस्य स्वामी सूर्योऽस्ति। हस्तनक्षत्रं मन्दसंज्ञकं, कुलाकुलसंज्ञकं, पार्श्वाननमुखसंज्ञकं तथा च लघुक्षिप्रसंज्ञकं मन्यते। हस्तनक्षत्रे औषधि-पात्र-विद्या-विवाह-शिल्प-व्रत-वस्त्र-आभूषण-देवप्रतिष्ठा-वास्तुप्रारम्भादिकार्यं करणीयम्। गुरुवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यति। अखिलपार्श्वाननकार्यं कर्तव्यम्। यात्रायां सन्धिः। यात्रागमने सामान्यस्थितिः स्यात्। औषध-पण्य-आभूषण-शिल्प-कला-ज्ञानकर्मसिद्धिः स्यात्। चलसंज्ञकनक्षत्रेषु कथितानि कार्याणि करणीयानि।

१४) चित्रा - चित्रानक्षत्रस्य तारकाणां संख्या नव अस्ति। चित्रानक्षत्रस्य स्वामी त्वष्टा अस्ति। चित्रानक्षत्रं मध्यमसंज्ञकं, कुलसंज्ञकं, पार्श्वाननमुखसंज्ञकं तथा च मृदु-मैत्रसंज्ञकं मन्यते। चित्रानक्षत्रे शान्तिकर्म-पौष्टिक-स्थिरकर्म-वस्त्र-आभूषण-शिल्प-उपनयन-वास्तु-कृषि-आदयस्तथा नृपाणां समस्तकार्यं कर्तव्यम्। शुक्रवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अखिलपार्श्वाननकार्याणि कर्तव्यानि। यात्रायां भङ्गो हानिर्वा भवेत्। मनुजः स्वकुले प्रधानो भवति। मङ्गल-वनिता-आभूषण-मन्दिरगीतादिकार्यं सिद्ध्यति।

१५) स्वाती -स्वातीनक्षत्रस्य तारकाणां संख्या एका। स्वातीनक्षत्रस्य स्वामी वायुरस्ति। स्वातीनक्षत्रं सुलोचनसंज्ञकम्, उपकुलसंज्ञकं, पार्श्वाननमुखसंज्ञकं तथा च चर-चलसंज्ञकं

मन्यते। देवानां तथा नराणां गृहविधानम्–आभूषण–व्यवहारिक–अखिलमङ्गलकार्य–बीजारोपण–शस्त्र–नृपस्य युद्धमिति कर्तव्यानि कार्याणि सिद्ध्यन्ति। सोमवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अखिलपार्श्वाननकार्याणि कर्तव्यानि। यात्रायां शीघ्रं नि:संशयेन विजयं प्राप्नोति। मनुजा: परधनभोक्तार: स्यु:। मणिमुक्ता–हेमफल–रजत–त्रपु–सीसकर्माणि करणीयानि। वाहनकर्म–आभूषण–चलकार्य–उद्यान–मन्त्रसिद्धिकार्यं सिद्ध्यते। तथा च लघु–क्षिप्रसंज्ञकथितानि कार्याण्यपि सिद्ध्यन्ति।

१६) विशाखा – विशाखानक्षत्रस्य तारकाश्चतस्र: सन्ति। विशाखानक्षत्रस्य स्वामिनौ इन्द्रस्तथाग्निरस्ति। विशाखानक्षत्रम् अँन्धसंज्ञकं, कुलसंज्ञकम्, अधोमुखसंज्ञकं तथा च साधारणं स्मृतम्। विशाखानक्षत्र उपचयवस्तुग्रहण–आभूषण–नूतनवस्त्र–चित्रकार्य–भेषज–शकट–प्रहरण– शिल्पदिविचित्रकार्यं करणीयम्। अधोमुखकार्यं करणीयम्। यात्रायां भङ्गो हानिर्वा भवेत्। मनुजा: स्वकुले प्रधाना भवन्ति। निखिलान्युग्राणि साधारणकार्याणि सिद्ध्यन्ति।

१७) अनुराधा – अनुराधानक्षत्रस्य तारकाश्चतस्र: सन्ति। अनुराधानक्षत्रस्य स्वामी मित्रोऽस्ति। अनुराधानक्षत्रं मन्दसंज्ञकं, कुलाकुलसंज्ञकं, पार्श्वाननमुखसंज्ञकं तथा च मृदु–मैत्रसंज्ञकं मन्यते। अनुराधानक्षत्रे विवाह–उपनयन–यात्रा–देवप्रतिष्ठा–स्थिर–चरकार्यं आभूषणमखिलाश्वगजसम्बन्धितकार्यं करणीयम्। शुक्रवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अखिलपार्श्वाननकार्याणि कर्तव्यानि। यात्रायां सन्धिर्यात्रागमने सामान्यस्थिति: स्यात्। मङ्गल–वनिता–आभूषण–मन्दिरगीतादिकार्यं सिद्ध्यते।

१८) ज्येष्ठा – ज्येष्ठानक्षत्रस्य तारकास्तिस्र: सन्ति। ज्येष्ठानक्षत्रस्य स्वामी इन्द्रोऽस्ति। ज्येष्ठानक्षत्रं मध्यमसंज्ञकम्, उपकुलसंज्ञकं, पार्श्वाननमुखसंज्ञकं तथा च दारुण–तीक्ष्णसंज्ञकं मन्यते। ज्येष्ठानक्षत्रे शत्रुवध–भेदन–दहन–प्रहरण–अग्निकर्म–

लोहसम्बन्धितकार्यं–चौर्यविधानं विविधशिल्प–चित्रकार्यं– एतानि करणीयानि। शनिवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अखिलपार्श्वाननकार्याणि कर्तव्यानि। यात्रायां शीघ्रं निःसंशयेन विजयं प्राप्नोति। मनुजाः परधनभोक्तारः स्युः। दारुण–बन्धन–दहन–प्रहरणकर्माणि सिद्ध्यन्ति।

१९) मूलम् – मूलनक्षत्रस्य तारकाणां संख्या एकादश अस्ति। मूलनक्षत्रस्य स्वामी निर्ऋतिरस्ति। मूलनक्षत्रं सुलोचनसंज्ञकं, कुलसंज्ञकम्, अधोमुखसंज्ञकं तथा च दारुण–तीक्ष्णसंज्ञकं मन्यते। मूलनक्षत्रे कृषि–भवन–वनकार्य–वापीकूपादिबीजवपनं युद्धं विभूषणं शिल्पं तथा च सन्धि–विग्रहकार्यं कर्तव्यम्। शनिवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अधोमुखादिकार्याणि कर्तव्यानि । यात्रायां भङ्गो हानिर्वा भवेत्। मनुजाः स्वकुले प्रधाना भवन्ति। दारुण–बन्धन–दहन–प्रहरणकर्माणि सिद्ध्यन्ति।

२०) पूर्वाषाढा – पूर्वाषाढानक्षत्रस्य तारकाणां संख्या सप्त अस्ति। पूर्वाषाढानक्षत्रस्य स्वामी शम्बरोऽस्ति। पूर्वाषाढानक्षत्रम् अन्धसंज्ञकम्, उपकुलसंज्ञकम्, अधोमुखमुखसंज्ञकं तथा च उग्र–क्रूरं मन्यते। पूर्वाषाढानक्षत्रे वस्त्रस्य बन्धनमोक्षणौ वापीकूपादिकं निग्रह एवं हननं, वृक्षखण्डनं वनचरपक्षिणां हननादिकं कार्यम्। भौमवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अधोमुखकार्याणि कर्तव्यानि। यात्रायां शीघ्रं निःसंशयेन विजयं प्राप्नोति। मनुजाः परधनभोक्तारः स्युः। निखिलान्युग्रसाधारणकार्याणि सिद्ध्यन्ति। मारण–भेदन–बन्धन–विष–दहनम्– एतानि पञ्चकर्मणि सिद्ध्यन्ति। औषधि–पात्र–विद्या–विवाह–शिल्प–व्रत–वस्त्र–आभूषण–देवप्रतिष्ठा–वास्त्वारम्भदिकं कार्यं करणीयम्।

२१) उत्तराषाढा – उत्तराषाढानक्षत्रस्य तारकास्तिस्रः सन्ति। उत्तराषाढानक्षत्रस्य स्वामिनो विश्वेदेवाः सन्ति। उत्तराषाढानक्षत्रं मन्दसंज्ञकं, कुलसंज्ञकम्, ऊर्ध्वमुखं तथा च स्थिर–ध्रुवसंज्ञकं मन्यते। उत्तराषाढानक्षत्रे स्थापन–मण्डन–मुण्डनं वास्तुनिवेश–प्रवेशादि–

बीजारोपण-वाहन-आभूषणं तथा वस्त्रदिकार्यं कर्तव्यम्। रविवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। नृपभवननिर्माणप्रवेश एवं बीजादिसमस्तं कार्यं सिद्ध्यते। अखिलानि कार्याणि कर्तव्यानि। यात्रायां भङ्गो हानिर्वा भवेत्। मनुजः स्वकुले प्रधानो भवति। मृदुमैत्रसंज्ञकनक्षत्रेषु कथितानि कार्याणि करणीयानि।

२२) श्रवणम् - श्रवणनक्षत्रस्य तारकास्तिस्रः सन्ति। श्रवणनक्षत्रस्य स्वामी विष्णुरस्ति। श्रवणनक्षत्रं सुलोचनसंज्ञकम्, उपकुलसंज्ञकम्, ऊर्ध्वमुखसंज्ञकं तथा च चर-चलसंज्ञकं (अभिजिन्नक्षत्रं मध्यमसंज्ञकं)मन्यते। शान्तिकर्म-पौष्टिक-मङ्गलकार्यं विचित्र-कृषि-शिल्प- वस्त्रादिकार्यं गृहनिर्माणं तथोपनयनादि कार्याणि सिद्ध्यन्ते। सोमवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अखिलानि कार्याणि कर्तव्यानि। यात्रायां शीघ्रं निःसंशयेन विजयं प्राप्नोति। मनुजाः परधनभोक्तारः स्युः। मणिमुक्ता-हेमफल-रजत-त्रपु-सीसकर्माणि करणीयानि। वाहनकर्म-आभूषण-चलकार्य-उद्यान-मंत्रसिद्धिकार्यं सिद्ध्यते। तथा च लघु-क्षिप्रसंज्ञकथितानि कार्याण्यपि सिद्ध्यन्ति।

२३) धनिष्ठा - धनिष्ठानक्षत्रस्य तारकाश्चतस्रः सन्ति। धनिष्ठानक्षत्रस्य स्वामी वसुगणाः। धनिष्ठानक्षत्रं अन्धसंज्ञकम्, कुलसंज्ञकम्, ऊर्ध्वमुखसंज्ञकं तथा च चर-चलसंज्ञकं मन्यते। धनिष्ठानक्षत्र उपनयन-चौलकर्म-जलकर्म-अश्व-उष्ट्र-गजादिसम्बन्धिकार्य-देवप्रतिष्ठा-कृषिकर्म-शिल्पकर्म-वस्त्र-विपिन-उद्यान-अश्म-आभूषणादिकार्याणि सिद्ध्यन्ति। सोमवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अखिलानि कार्याणि कर्तव्यानि। यात्रायां भङ्गो हानिर्वा भवेत्। मनुजाः स्वकुले प्रधाना भवन्ति। मणिमुक्ता-हेमफल-रजत-त्रपु-सीसकर्माणि करणीयानि। वाहनकर्म-आभूषण-चलकार्य-उद्यान-मंत्रसिद्धिकार्यं च सिद्ध्यति। तथा च लघु-क्षिप्रसंज्ञकथितानि कार्याण्यपि सिद्ध्यन्ति।

२४) शतभिषा - शतभिषङ्नक्षत्रस्य तारकाणां संख्या शतमस्ति। शतभिषङ्नक्षत्रस्य स्वामी वरुणोऽस्ति। शतभिषङ्नक्षत्रं मन्दसंज्ञकम्, उपकुलसंज्ञकम्, ऊर्ध्वमुखसंज्ञकं तथा च चर-चलसंज्ञकं मन्यते। शतभिषङ्नक्षत्रे युद्धारम्भ-आभूषण-गज-सेना-अश्व-उष्ट्र-शस्त्र-नावादि-मुक्ता-रजत-वास्तु-आदिकं कार्यं करणीयम्। सोमवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अखिलानि कार्याणि कर्तव्यानि। यात्रायां शीघ्रं निःसंशयेन विजयं प्राप्नोति। मनुजाः परधनभोक्तारः स्युः। मणिमुक्ता-हेमफल-रजत-त्रपु-सीसकर्माणि करणीयानि। वाहनकर्म-आभूषण-चलकार्य-उद्यान-मंत्रसिद्धिकार्यं सिद्ध्यति। तथा च लघु-क्षिप्रसंज्ञकथितानि कार्याण्यपि सिद्ध्यन्ति।

२५) पूर्वाभाद्रपदा - पूर्वाभाद्रपदानक्षत्रस्य तारकाद्वयं संख्यास्ति। पूर्वाषाढानक्षत्रस्य स्वामी अजैकचरणोऽस्ति। पूर्वाषाढानक्षत्रं मध्यमसंज्ञकम्, उपकुलसंज्ञकम्, अधोमुखमुखसंज्ञकं तथा च उग्र-क्रूरं मन्यते। पूर्वाभाद्रपदानक्षत्रे साहसकार्यं जल-यन्त्र-शिल्पकर्म मृद्धात्वादिवाद्यकार्यं छेदन-कृषि- महिषी-उष्ट्र-अज-गजानां क्रयविक्रय इत्यादीनि कार्याणि करणीयानि। भौमवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अधोमुखकार्याणि कर्तव्यानि। यात्रायां शीघ्रं निःसंशयेन विजयं प्राप्नोति। मनुजाः परधनभोक्तारः स्युः। निखिलान्युग्रसाधारणकार्याणि सिद्ध्यन्ति। मारण-भेदन-बन्धन-विष-दहनम्- एतानि पञ्चकर्माणि सिद्ध्यन्ति। औषधि-पात्र- विद्या-विवाह-शिल्प-व्रत-वस्त्र-आभूषण-देवप्रतिष्ठा-वास्त्वारम्भकार्यं करणीयम्।

२६) उत्तराभाद्रपदा - उत्तराभाद्रपदानक्षत्रस्य तारकाद्वयमस्ति। उत्तराभाद्रपदानक्षत्रस्य स्वामी अहिर्बुध्न्योऽस्ति। उत्तराभाद्रपदानक्षत्रं सुलोचनसंज्ञकं, कुलसंज्ञकम्, ऊर्ध्वमुखं तथा च स्थिर-ध्रुवसंज्ञकं मन्यते। उत्तराभाद्रपदानक्षत्रे विवाहः, व्रतबन्धः, सुरनराणां गृहप्रतिष्ठा, आभूषणं, वस्त्रं, राज्याभिषेकस्तथा वास्तुप्रवेशादिकार्याणि करणीयानि। रविवासर एतानि

कार्याणि विशेषरूपेण सिद्ध्यन्ति। नृपभवननिर्माणप्रवेशकार्यं सिद्ध्यति। अखिलानि कार्याणि कर्तव्यानि। यात्रायां भङ्गो हानिर्वा भवेत्। मनुजः स्वकुले प्रधानो भवति ।मृदुमैत्रसंज्ञकनक्षत्रेषु कथितानि कार्याणि करणीयानि।

२७) रेवती – रेवतीनक्षत्रस्य तारकाणां संख्या द्वात्रिंशदस्ति। रेवतीनक्षत्रस्य स्वामी पूषादेवोऽस्ति। रेवतीनक्षत्रम् अन्धसंज्ञकम्, उपकुलसंज्ञकं, पार्श्वाननमुखसंज्ञकं तथा च मृदु–मैत्रसंज्ञकं मन्यते। रेवतीनक्षत्रे स्थलजलाभूषणकार्यं, सुरनराणां गृहनिर्माणं विवाहोपनयने तथा–अखिलमङ्गलकार्यं करणीयम्। शुक्रवासर एतानि कार्याणि विशेषरूपेण सिद्ध्यन्ति। अखिलपार्श्वाननकार्याणि कर्तव्यानि। यात्रायां शीघ्रं निःसंशयेन विजयं प्राप्नोति। मनुजाः परधनभोक्तारः स्युः। मङ्गल–वनिता–आभूषण–मन्दिरगीतादिकार्यं सिद्ध्यति।

कर्णवेध–क्षौरकर्म–विद्यारम्भ–जलाशयप्रारम्भ–कन्याविवाहादीनि माङ्गलिककार्याणि केषु केषु नक्षत्रेषु करणे श्रेष्ठानि शुभफलप्रदानि भवन्तीति निम्नलिखितानुसारेण ज्ञातुं शक्यते।

**कर्णवेधसंस्कारः** -- पुष्य–धनिष्ठा–पुनर्वसु–श्रवण–हस्त–रेवती–उत्तराफाल्गुनी–उत्तराषाढा–उत्तराभाद्रपदा – अश्विनी–अनुराधानक्षत्रेषु, रविवारादिसर्ववारेषु शुभप्रदो भवति।[१८३]

**अन्नप्राशनसंस्कारः**- मृदुसंज्ञक(मृगशीर्ष–चित्रा–अनुराधा–रेवती)नक्षत्रेषु, ध्रुवसंज्ञक (उत्तराफाल्गुनी- उत्तराषाढा–उत्तराभाद्रपदा–रोहिणी)नक्षत्रेषु, क्षिप्रसंज्ञक(अश्विनी–पुष्य–हस्त–अभिजित्)नक्षत्रेषु, चरसंज्ञक(पुनर्वसु–स्वाती–धनिष्ठा–शतभिषक्)नक्षत्रेषु, शुभग्रहाणां शुभांशलग्नेषु, सोम–बुध–गुरु–शुक्रवासरे, दिनसमये, जन्मतः षष्ठमासात् समेषु मासेषु शुभप्रदो भवति। बली चन्द्रमा यल्लग्ने/अंशे/वारे वा स्यात्, तद् दिने

---

१८३ व.सं. श्लो. ४१

नवान्नप्राशने भोक्ता सततं सदन्नं प्राप्नोति। यदि क्षीणचन्द्रमास्तदा (भोक्ता) भिक्षुकः, पीडितात्मा स्यात्।[१८४]

**क्षौरकर्मसंस्कारः** - हस्त-चित्रा-स्वाती-पुष्य-पुनर्वसु- मृगशीर्ष- श्रवण- धनिष्ठा- शतभिषक्- अश्विनी- रेवती-ज्येष्ठानक्षत्रेषु मुण्डनकार्यं श्रेष्ठम्। यदि लग्ने सूर्य-भौम-शनिस्थितास्तदैतेषां ग्रहाणामंशे मुण्डनकार्यं त्याज्यम्। रवि-भौम-शनिवारांस्त्यक्त्वा , अर्थात् सोम-बुध-गुरु-शुक्रवासरेषु श्रेष्ठम्। यात्राकाले, संकटसमये, सन्ध्ययोश्च (प्रातःसायंसंध्याकाले) श्री-अभिलाषी लक्ष्मीप्राप्त्यर्थ आत्मनश्च क्षौरकर्म न कुर्यात्। भूदेवभूमीशनिमित्तबन्धाद् विमुक्तो, मृतसूतके, आधानकाले समस्तपृथिव्यां निन्दितनक्षत्रेऽपि खलु क्षौरकर्म विधेयम्। उत्तराभाद्रपदा-चित्रा-पुष्य-स्वाती-मूल-मृगशीर्षनक्षत्रेषु यदि शिशोः क्षौरकर्म कुर्यात् , तदा वर्षैकानन्तरं मृतो भवति। नृपहितकारी कथितनक्षत्रेषु तन्नक्षत्रात् पञ्चम-पञ्चमे दिने क्षौरकर्म कुर्यात्। यद्युक्तनक्षत्रं न प्राप्यते, तदा सम्पूर्णनक्षत्रोदयकाले क्षौरकर्म करणीयम्।पूर्वाषाढातोऽष्टमे नक्षत्रे, मघातः पञ्चमे नक्षत्रे, कृत्तिकातः षष्ठे नक्षत्रे, तथोत्तराफाल्गुनीतः चतुर्थे नक्षत्रे, अनुराधातस्तृतीये नक्षत्रे तथा मृगशीर्षनक्षत्रे, यदि क्षौरकर्म कुर्यात् , तदा स शिशुरब्दकालसमयान् निधनं गच्छति।[१८५]

**विद्यारम्भसंस्कारः** - पूर्वात्रये (पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदानक्षत्रेषु), मूलं, मृगादिपञ्चके (मृगशीर्ष-आर्द्रा-पुनर्वसु-पुष्य-आश्लेषानक्षत्रेषु), अश्विनी, त्रितये च हस्तात्(हस्त-चित्रा-स्वातीनक्षत्रेषु), सविष्णुत्रितये (श्रवण-धनिष्ठा-शतभिषङ्नक्षत्रेषु), शुभवासरेषु(सोम-बुध-गुरु-शुक्रवासरेषु) सर्वविद्याप्रारम्भ इष्टः।[१८६]

१८४ व.सं. श्लो. ४६, ४७
१८५ व.सं. श्लो. ६४ तः ६८
१८६ व.सं. श्लो. ४३

**कन्याविवाहसंस्कारः** - स्वाती-मघा-मूलनक्षत्रेषु, ध्रुवसंज्ञवक(उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा) नक्षत्रेषु, अनुराधा, मृगशीर्षं तथा हस्तगुणयुक्तनक्षत्रेषु विद्धवर्जित इष्टफलप्रदः। पाणिग्रहणे,पञ्चशलाकाचक्रे, विद्धनक्षत्रं ज्ञेयम्। अन्यशुभकार्येषु सप्तशलाकाचक्रे विद्धनक्षत्रं ज्ञेयम्। शुभमित्रकृतं(शुभ-मित्रग्रहकारणेन) विद्धं स्यात् , तदा सप्तशलाकाचक्रे तथा पञ्चशलाकाचक्रे शुभं ज्ञेयम्।[१८७]

**बीजवपनकार्यम्** - धातुद्वयं (रोहिणी-मृगशीर्षं), कोणपं (मूलं), पैत्र्यं (मघा), पुष्यं, हस्तत्रये (हस्त-चित्रा-स्वाती), त्रि-उत्तरा (उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा), मैत्रं (अनुराधा), पौष्णं (रेवती), धनिष्ठा, अश्विनीनक्षत्रेषूत्कृष्टफलप्रदं स्यात्।[१८८]

**हलप्रवहणम्** - मृदुसंज्ञके (मृगशीर्ष-चित्रा-अनुराधा-रेवती)नक्षत्रेषु, ध्रुवसंज्ञक (उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-रोहिणी)नक्षत्रेषु, क्षिप्रसंज्ञक (हस्त-अश्विनी-पुष्य) नक्षत्रेषु, चरसंज्ञक (स्वाती-पुनर्वसु-श्रवण-धनिष्ठा-शतभिषक्)नक्षत्रेषु, मूल-मघा-विशाखानक्षत्रेषु धान्याभिवृद्धये सम्पूर्णगुणैर्युतं वृषद्वारा प्रथमं हलप्रवहणं कुर्यात्।[१८९]

**वृक्षारोपणं कार्यम्** - द्विदैव(विशाखा)-वारीश(शतभिषक्)-शशाङ्क(मृगशीर्ष)-मूल-ध्रुवेषु(उत्तराफाल्गुनी -उत्तराषाढा- उत्तराभाद्रपदा-रोहिणी)नक्षत्रेषु तिष्य(पुष्य)-पौष्ण-रेवतीनक्षत्रेषु वनौषधी-गुल्मलतादिकानामारोपणं श्रेष्ठम्।[१९०]

**वापीकूपतडागादिकर्म** - शशाङ्क(मृगशीर्ष)-तोयेश(शतभिषक्)-कर(हस्त)-अन्त्य (रेवती)-मित्र(अनुराधा), ध्रुवसंज्ञक(उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-रोहिणी)-

---

१८७ व.सं. श्लो. ६९ तः १०३

१८८ व.सं. श्लो. ४२

१८९ व.सं. श्लो. ५५

१९० व.सं. श्लो. ५६

अम्बु (पूर्वाषाढा)-पित्र्य(मघा)-वसु(धनिष्ठा) नक्षत्रेषु उद्यान-वापी-कूप-तडागादिकार्याणि सिद्ध्यन्ति। तथा च जलगतं कार्यं सिद्धं भवेत्।[१९१]

**जलाशयप्रारम्भः** - मैत्र(अनुराधा)-इन्दु(मृगशीर्ष)-पौष्ण(रेवती)-ज्येष्ठ-उत्तराफाल्गुनी -उत्तराषाढा- उत्तराभाद्रपदा- रोहिणी- इज्या (पुष्य)- वारीश(शतभिषक्)नक्षत्रेषु, शुक्रवासरे-सोमवासरे वा, तथा च वृषभ-तुला-कर्कलग्ने सर्वजलाशयानां प्रारम्भः कर्तव्यः।[१९२]

**हस्तिसम्बन्धिकार्यम्** – हस्तत्रये (हस्त-चित्रा-स्वाती) -सौम्य (मृगशीर्ष)-हरित्रये (श्रवण -धनिष्ठा-शतभिषक्), पौष्णद्वये (रेवती-अश्विनी), पुष्य-पुनर्वसु-अनुराधानक्षत्रेषु कुञ्जराणां कर्माणि यानि तानि सर्वाणि कर्माणि शस्तानि।[१९३]

**गवां क्रयविक्रयः** - पूर्वात्रय(पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदा)-पुष्य-पुनर्वसु-मित्रत्रय(अनुराधा-ज्येष्ठा-मूलं)-पौष्ण(रेवती), वसुद्वये(धनिष्ठा-शतभिषक्) दस्त्र (अश्विनी) -इन्दु (मृगशीर्षं)-हस्तद्वय(हस्त-चित्रा)नक्षत्रेषु गवां क्रय-विक्रयं प्रकुर्यात्।[१९४]

**पशूनां यात्रा** - त्वाष्ट्र(चित्रा)-ध्रुवसंज्ञक(उ.फा.-उ.षाढा-उ.भा.-रोहिणी) श्रीपति (श्रवण)नक्षत्रेषु कुर्यात्। रिक्तातिथि(४-९-१४)-दशमी-अष्टमी-पापदिनेषु पशूनामभिवृद्धिकाङ्क्षी मनुजः पशूनां यात्राप्रवेशं न कुर्यात्।[१९५]

ऐन्द्र(ज्येष्ठा)-अजपाद(पूर्वाभाद्रपदा)-अब्जज(रोहिणी), अर्यमा(उ.फा.), शूल (भरणी)-एतानि नक्षत्राणि क्रमतश्च सर्वदिग्गमनकर्तृभ्यः कष्टं ददति। इन्द्रसमानो बलवानपि

---

१९१ व.सं. श्लो. ५७
१९२ व.सं. श्लो. ४५
१९३ व.सं. श्लो. ५८
१९४ व.सं. श्लो. ६२
१९५ व.सं. श्लो. ६०

कष्टं प्राप्नोति। स्थिरसंज्ञक(उ.फा.-उ.षाढा-उ.भा.-रोहिणी)-साधारणसंज्ञक(कृत्तिका-विशाखा)- नक्षत्रेषु पूर्वाह्णे यात्रायां नैव गमनम्। दारुणसंज्ञक(आर्द्रा-आश्लेषा-ज्येष्ठा-मूलं)नक्षत्रेषु दिनदलसमये(मध्याह्नकाले) यात्रायां गमनम्। क्षिप्रसंज्ञक (अश्विनी-पुष्य-हस्त) नक्षत्रेष्वपराह्णकाले, मृदुसंज्ञक(मृगशीर्ष-चित्रा-अनुराधा)नक्षत्रेषु रात्रिमुखे प्रदोषवेलायां, मिश्रसंज्ञक(कृत्तिका-विशाखा), उग्रसंज्ञक(भरणी-मघा-पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदा)नक्षत्रेषु निशासमये तथा च चरसंज्ञक(पुनर्वसु-स्वाती-श्रवण-धनिष्ठा-शतभिषक्)नक्षत्रेषूष:काले यात्रायां गमनं न प्रशस्तम्।[१९६]

**काष्ठसंग्रहणम्** — धनिष्ठानक्षत्रस्य तृतीयचरणत: पञ्च नक्षत्रेषु(धनिष्ठा-शतभिषक्-पूर्वाभाद्रपदा-उत्तराभाद्रपदा-रेवती)नक्षत्रेषु गृहस्य गोपनं, दक्षिणदिङ्मुखगमनं, प्रेतस्य दाहकर्म तथा काष्ठसंग्रहणकार्यं न करणीयम्।[१९७]

मघा-विशाखा-कृत्तिका-आश्लेषा-भरणी-मूल-आर्द्रानक्षत्रेषु यदि सर्पदंशो भवेत्, तदा विष्णुरथेन सुरक्षितो(गरुडद्वारा रक्षितोऽपि) मनुज: कालस्य मुखं प्राप्नोति। अर्थात् निश्चयेन मृतो भवति।[१९८]

पूर्वात्रय(पू.फा.-पू.षाढा.-पू.भा.)स्वाती-भुजङ्ग(आश्लेषा)- रौद्र(आर्द्रा)-सुरेश्वर (ज्येष्ठा) -एतेषु नक्षत्रेषु यस्य रोग: स्यात्, तं रोगिणं देवचिकित्सकोऽपि न रक्षितुं शक्नोति, निश्चयेन मृत्युं प्राप्नोति। मित्र(अनुराधा)-पौष्ण(रेवती)नक्षत्रेषु मासाद् विमुक्तो भवेत्। मृगशीर्ष-उत्तराषाढा-मघानक्षत्रेषु यदि रोगी भवेत् ,तदा विंशतिदिनान्तरैर्विमुक्तो भवेत्। पुष्य-अहिर्बुध्न्य-पुनर्वसु-ब्राह्म(रोहिणी),अर्यमा(उत्तराफाल्गुनी)नक्षत्रेषु यदि रोगी भवेत् , तदा सप्तरात्राद् रोगेण मुक्तो भवेत् । तदा चन्द्राकृतिं सुवर्णेन कृत्वा चन्द्रस्य चिह्नं तथा मन्त्रैश्च

---

१९६ व.सं. श्लो. ७२,७४,७५

१९७ व.सं. श्लो. ७७

१९८ व.सं. श्लो. ४९

सुगन्धपुष्पैश्च पूजयेत्। द्विदेव(विशाखा)-देवेन्द्र(ज्येष्ठा)-कर(हस्त)नक्षत्रेषु रोगी भवेत् , तदा पश्चात् (१५ दिनपश्चात्) नीरोगी भवेत्।मूल-अश्विनी-कृत्तिका-रोहिणी-मृगशीर्षनक्षत्रेषु रोगी भवेत्, तदा नवदिनपश्चात् नीरोगी भवेत्। चित्रा-शतभिषा-रेवती-भरणी-श्रवणनक्षत्रेषु यदि रोगी भवेत् तदा ११ दिनपश्चात् नीरोगी भवेत्। अदिति(पुनर्वसु)-स्थिरसंज्ञक(उ.फा.-उ.षाढा.-उ.भा.-रोहिणी)-स्वाती-आश्लेष- नक्षत्रेषु, शुक्रवारं तथा सोमवारं त्यक्त्वा रवि-मङ्गल-बुध-गुरु-शनिवासरेषु, परगृहे वासस्तथा च रोगमुक्तानां स्नानं शुभदं भवेत्।[१९९]

स्थिरसंज्ञक(उ.फा.-उ.षाढा-उ.भा.-रोहिणी)-क्षिप्रसंज्ञक(अश्विनी-पुष्य-हस्त)-नक्षत्रेष्वपराह्णकाले, मृदुसंज्ञक(मृगशीर्ष-चित्रा-अनुराधा), तथा श्रवणमेतेषु नक्षत्रेष्वश्वानां सम्पूर्णं कार्यं तथा च तनुमस्तकादीनां रक्षासम्बन्धि सर्वकार्यं कर्तव्यम्।[२००]

साधारणसंज्ञक(कृत्तिका-विशाखा)-दारुणसंज्ञक(आर्द्रा-आश्लेषा,ज्येष्ठा-मूल)-उग्रसंज्ञक(भरणी-मघा-पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदा)नक्षत्रेषु,रवि-भौम-शनिवासरेषु तथा रिक्ता(४-९-१४)तिथिषु दुर्गादिपूजनं श्रेष्ठम्।[२०१]

उत्तरात्रय(उ.फा.-उ.षाढ़ा.-उ.भा.)-मित्र(अनुराधा-गुरु(पुष्य)-श्रविष्ठा(धनिष्ठा)-हस्त-इन्दु(मृगशीर्ष)-वारीश्वर(शतभिषा)-पौष्ण(रेवती)नक्षत्रेषु,भौम-शनिवासरौ विहाय रवि-सोम-बुध-गुरु-शुक्रवासरेषु सङ्गीतनृत्यादिसमस्तकर्म कर्तव्यम्।[२०२]

पौष्णद्वय(रेवती-अश्विनी) -मित्र(अनुराधा) -हरिद्वये(श्रवण-धनिष्ठा)-मृगशीर्ष-हस्त-अदिति(पुनर्वसु)-इज्य(पुष्य)-नक्षत्रेषु त्रि-पञ्च-सप्तनक्षत्राणि त्यक्त्वा यानं नृणामिष्टफलप्रदं स्यात्।[२०३]

---

१९९ व.सं. श्लो. ५० तः ५३, १०९

२०० व.सं. श्लो. ८१

२०१ व.सं. श्लो. ५९

२०२ व.सं. श्लो. ६१

**नृपावलोकनम्** – पौष्णद्वये(रेवती–अश्विनी)–इन्दु(मृगशीर्ष)–श्रवणत्रये(श्रवण–धनिष्ठा–शतभिषा), हस्तत्रये(हस्त–चित्रा–स्वाती)–पुनर्वसु–पुष्यनक्षत्रेषु रविवासरे नृपावलोकनं प्रशस्तम्।[२०४]

**नष्टधनप्राप्तिः** -- स्थिरसंज्ञक(उ.फा.–उ.षाढ़ा–उ.भा.–रोहिणी)–साधारणसंज्ञक (कृत्तिका–विशाखा)– दारुणसंज्ञक(आर्द्रा–आश्लेषा,ज्येष्ठा–मूल)–उग्रसंज्ञक(भरणी–मघा–पूर्वाफाल्गुनी–पूर्वाषाढा–पूर्वाभाद्रपदा)नक्षत्रेषु तथा भद्रायोगो व्यतीपातयोगो वा स्यात् तदा चौरैर्हृतं धनं, दत्तं धनं(ऋणं दत्तं) नष्टमथवा निक्षिप्तं धनं न पुनर्लभ्यते।[२०५]

**नूतनवस्त्रधारणे फलम्** – हस्तादिपञ्च(हस्त–चित्रा–स्वाती–विशाखा–अनुराधा)–धातृ(रोहिणी)–पौष्ण(रेवती), दस्र(अश्विनी)–अदिति(पुनर्वसु)–इज्य(पुष्य) –उत्तरात्रय (उ.फा.–उ.षाढा–उ.भा.)– नक्षत्रेषु तथा शुभ(चन्द्र–बुध–गुरु–शुक्र)ग्रहाणां लग्नोदये तदंशे वा नूतनवस्त्रं धारयेत्, शुभप्रदम्।[२०६]

**त्रिपुष्करयोग-द्विपुष्करयोगफलम्** - विषम(त्रि)पादनक्षत्रेषु(विशाखा–उ.फा.–पू.भा.–पुनर्वसु–कृत्तिका–उ.षाढानक्षत्रेषु), रवि–भौम–शनिवासरे, तथा भद्रायां त्रिपुष्कराख्यो योगो भवेत्, स त्रिगुणं फलं ददाति। त्रिपुष्करदोषशान्त्यर्थे विद्वद्भ्यो दानं दद्यात्। सम(द्वि)पादनक्षत्रेषु(मृगशीर्ष–चित्रा–धनिष्ठा)नक्षत्रेषु, रवि–भौम–शनिवासरे तथा भद्रायां द्विपुष्कराख्यो योगो द्विगुणफलकारी स्यात्। द्विपुष्करयोगशान्त्यर्थे विद्वान् तिलपिष्टान् विप्रमुख्येभ्यो दद्यात्।[२०७]

---

२०३ व.सं. श्लो. ७०
२०४ व.सं. श्लो. ६३
२०५ व.सं. श्लो. ४८
२०६ व.सं. श्लो. ४४
२०७ व.सं. श्लो. ९१,९२

स्थिरसंज्ञक(उ.फा.-उ.षाढा-उ.भा.-रोहिणी)-लघु-क्षिप्रसंज्ञक(अश्विनी-पुष्य-हस्त), मृदुसंज्ञक(मृगशीर्ष-चित्रा-अनुराधा)-चरसंज्ञक(पुनर्वसु-स्वाती-श्रवण-धनिष्ठा-शतभिषा)नक्षत्रेषु, सर्ववारेषु(रवि-सोम-मंगल-बुध-गुरु-शुक्र-शनि), तथा च रिक्तातिथी:(४-९-१४)त्यक्त्वा अन्यतिथिषु त्रिपुष्करयोग आभूषणं धारयेत्, श्रेष्ठम्।[२०८]

स्थिरसंज्ञक(उ.फा.-उ.षाढ़ा-उ.भा.-रोहिणी)-लघु-क्षिप्रसंज्ञक(अश्विनी-पुष्य-हस्त), मृदुसंज्ञक(मृगशीर्ष-चित्रा-अनुराधा)-चरसंज्ञक(पुनर्वसु-स्वाती-श्रवण-धनिष्ठा-शतभिषा)नक्षत्रेषु, सोमशुक्रयो: वासरयो:, तथा च कर्क-वृषभ-तुलालग्नेषु मुक्ताफल-रजतमयाण्याभूषणाणि धारयेत्, श्रेष्ठम्।[२०९]

**पुष्यनक्षत्रफलम्** - पुष्यनक्षत्रं निखिलपरकृतदोषं निहन्ति। किन्तु पुष्यकृतदोषोऽन्येन केनापि नक्षत्रेण नष्टो न भवति। द्वादशाष्टमस्थाने बलवान् चन्द्रमा: पुष्यनक्षत्रगतस्तथापि सततमभीष्टफलद: स्यात्। प्रत्यरि-विपत्-नैधनजन्मसंज्ञकतारां तथा पाणिग्रहणं (विवाहं) त्यक्त्वान्यकार्येषु पुष्यनक्षत्रं सर्वार्थसिद्धिदं स्यात्। यथा पशुगणेषु सिंहो बली: स्यात्, तथैव समस्तनक्षत्राणां मध्ये पुष्यनक्षत्रं प्रबलं स्यात्। स्वबलसहित- त्रिविधोत्पातानां शक्तिरपि न नाशयति।[२१०]

मङ्गल-सूर्य-शनि-राहुकेतुभिराक्रान्तं विद्धनक्षत्रं तथा उत्पाते दूषितनक्षत्रमेतत्सर्वं माङ्गलिककार्येषु सदैव त्याज्यम्। त्रिविधोत्पातैर्युतं, क्रूराक्रान्तं, वेधितं वा नक्षत्रं निखिलशुभकार्येषु त्याज्यम्, न पादतश्चरणवेधेन सम्पूर्णचरणं त्याज्यम्। यथा तक्षकविषाग्निदग्धो नरो म्रियते, सम्पूर्णरूपेण मृतो भवति, पादवेधकारणेनापि समस्तनक्षत्रं मृतसंज्ञकं स्यात्। अतो मृतनक्षत्रे शुभकार्ये कृते निश्चयेन मृत्युं प्राप्नोति। नक्षत्रे यो दोष: स

---

२०८ व.सं. श्लो. ११०

२०९ व.सं. श्लो. १११, ११२

२१० व.सं. श्लो. ७८ त: ८०

राशिं न हन्ति । यद्वत् तद्गात्रमेव गरलं पित्रादीन् न हन्यात्।[211]

सर्वद्वारिकनक्षत्राणि सर्वस्मिन्समये सर्वासु दिक्षु-विदिक्षु(कोणेषु) नृणामत्यधिकं (अतुलं) शुभफलदाः स्युः।[212]

सूर्यनक्षत्रतो वर्तमानस्थिरनक्षत्रपर्यन्तं लाङ्गलचक्रनिर्माणं कार्यम् । तत्र त्रितयं वर्गीकृत्वा, प्रथमद्वयनक्षत्रं नेष्टं, पुनः षोडशनक्षत्रपर्यन्तमिष्टं तथा पुनः नवनक्षत्रपर्यन्तमनिष्टकारी स्यात्।[213]

उत्तराषाढानक्षत्रस्यान्तिमं सम्पूर्णचरणं तथा च श्रवणनक्षत्रस्याद्य चतुर्नाडीपर्यन्तमभिजिन्नक्षत्रं स्यात्।[214]

सूर्य-चन्द्र-गुरु-शनिग्रहाः कुलसंज्ञकग्रहाः। शुक्र-भौमौ उपकुलसंज्ञकौ तथा च बुधः कुल-उपकुलसंज्ञकः स्यात्। अतः बुधः(शशितनयः) क्षितीशयोर्नित्यं संधिकर्ता स्यात्।[215]

## १.५.४ वृद्धवसिष्ठसंहितायां योगविचारः

अथ पञ्चदशाध्याये ४१ श्लोकाः सम्मिलिताः। अध्यायेऽस्मिन् सप्तविंशतियोगानां नामानि, एकार्गलदोषः, सम्पातिदोषः, व्यतीपातदोषः -एतेषां विशेषरूपेण फलं तथा सप्तविंशतियोगेषु कृतकार्यस्य शुभाशुभफलं वर्णितमस्ति।

---

२११ व.सं. श्लो. १०४ तः १०६

२१२ व.सं. श्लो. ७६

२१३ व.सं. श्लो. १००

२१४ व.सं. श्लो. १०१

२१५ व.सं. श्लो. ८९

सप्तविंशतियोगानां नामानि क्रमेण विष्कुम्भ-प्रीति-आयुष्मान्-सौभाग्य-शोभन-अतिगण्ड-सुकर्मा-धृति-शूल-गण्ड-वृद्धि-ध्रुव-व्याघात-हर्षण-वज्र-सिद्धि-व्यतीपात-वरीयान् -परिघ-शिव-सिद्ध-साध्य-शुभ-शुक्ल-ब्रह्म-ऐन्द्र-वैधृति-इति ज्ञेयानि। एते सप्तविंशतियोगा: स्वनामफलदा: स्मृता:।[२१६]

विपरीतयोगेषु आद्यपाद:, वैधृति-व्यतीपातयोगयोश्चत्वारि(४)चरणानि(अर्थात् सर्वे पादा:) तथा परिघयोगस्य आद्यचरणस्यार्धभाग: समस्तशुभकार्येषु त्याज्य:। विष्कुम्भयोगस्याद्यनाडी(घटी), वज्र-गण्ड-अतिगण्डयोगानां प्रथमनवघटय:, शूलयोगस्यारम्भिका: पञ्चघटय:, सर्वेषु शुभेषु कार्येषु विवर्जनीयास्त्याज्या:। वैधृतियोगे शीर्षे चित्रा, अतिगण्डेऽनुराधा, परिघे मघा, व्यतीपाते आश्लेषा,विष्कुम्भेऽश्विनी, व्याघाते पुनर्वसु, गण्डे मूलं, शूले मृगशीर्षं तथा च वज्रयोगे शीर्षे पुष्यनक्षत्रे स्थापिते सूर्यचन्द्रयोर्दृष्टिदोषनिर्णयं कारयेत्। रेखामेकामूर्ध्वगां षट् च सप्त तिर्यक् कृत्वा खार्जूरचक्रं स्यात्। तत्र तिर्यग्रेखासंस्थयो:, सूर्यचन्द्रयोर्दृष्टियोगेनैकार्गलदोष: स्यात्। सूर्यचन्द्रयोरेकस्मिन्रेखोपरि दृष्टियोगेन सम्पातिनामकदोष: स्यात्। अनलभयं शरीरं कृत्वा सम्पूर्णाग्निसमुदायद्वारा पृथिव्यां पतति । अग्निकोपेन शतगुणयुतेन सभयं व्यक्तिर्नष्टा भवति।[२१७]

**अथ विष्कुम्भादिसप्तविंशतियोगास्तथा च तत्रोक्तकार्यं निम्नलिखितरूपेण वर्णितम्।**[२१८]

१) विष्कुम्भ: - योगे चौलकर्म-बीजारोपण-स्त्रीसङ्ग-दन्तधावन-काष्ठकर्म-शत्रोरुच्चाटनादीन्येतानि कार्याणि कारयेत्।

---

२१६ व.सं. श्लो. १ त: ३
२१७ व.सं. श्लो. ४ त: ८
२१८ व.सं. श्लो. ९ त: ३९

२) प्रीतिः - एतद् योगे मित्रत्वं, लेपनं, आभूषणं, भूमिपरिग्रहणं,नृपविषयं, महोत्साहः- आदिकं कार्यं कारयेत्।

३) आयुष्यमान् - एतद् योगे बीजवपनं धनग्रहणमायुः-आरोग्यकर्म-विवाह-व्रतबन्ध-आदिकं कार्यं कारयेत्।

४) सौभाग्यः - वस्त्र-बन्धन-अलंकार-सौभाग्य-लेपकर्म-सोमपान-सुरापानादीनि कार्याणि सौभाग्ययोगे कारयेत्।

५) शोभनः - एतद् योगे विवाह-दानकर्माणि, आभूषणं भूपरिग्रहो राज्याभिषेकः, आयुष्यादिकार्यं प्रकारयेत्।

६) अतिगण्डः - एतद्योगे विग्रह-निग्रह-रोधन-वध-बन्धन-छेदन-वञ्चन-शूद्रकर्माणि कारयेत्।

७) सुकर्मा - एतद् योगे चित्रकर्म, गृहसंस्थापनं, कल्याणं, भूपरिग्रहो राज्याभिषेकः- एतानि कर्माणि कारयेत्।

८) धृतिः - प्राकारतोरणादीनि, देवालय-गृहाणि, सेतुबन्धनं, गजारोहणादिकार्याणि धृतियोगे कारयेत्।

९) शूलः - क्रूरकर्म, शत्रोरुच्चाटनं, मारणं, दाहनं, बन्धनं तथा अपमानादीनि कार्याणि शूलयोगे प्रकारयेत्।

१०) गण्डः - शत्रुघातं, शत्रोरुच्चाटनं, तडागः, सेतुबन्धनं, क्षेत्रसेवा, गदायुद्धं -कार्याणि गण्डयोगे प्रकारयेत्।

११) वृद्धिः - बीजवपनं, व्रतग्रहणं, विवाहः, वस्त्रबन्धनं, तडागः,सेतुबन्धनम्, आभूषणं, बहुरत्नादीनि कार्याणि वृद्धियोगे प्रकारयेत्।

१२) ध्रुवः – वस्त्रबन्धनं, गृहस्थापनं, तडागसेतुबन्धनम्–आभूषणं–बहुरत्नादीनि कार्याणि ध्रुवयोगे प्रकारयेत्।

१३) व्याघातः – बन्धनं, रोधनं ,घातः, छेदनं तथा क्रूराणि कर्माणि व्याघातयोगे प्रकारयेत्।

१४) हर्षणः – वस्त्रबन्धनं, गजारोहणं, विवाहः, नृपस्य निग्रहो राज्याभिषेकस्तथायुष्यसम्बन्धीनि कार्याणि कारयेत्।

१५) वज्रः – शस्त्रकर्म, शत्रोरुच्चाटनं, शस्त्राणां परिग्रहः, सेनाधिपत्यं तथा सौम्यकार्याणि वज्रयोगे कारयेत्।

१६) सिद्धिः – हारकाञ्चीकलापहस्ताभूषणाङ्गुलीभूषणं च सिद्धियोगे कारयेत्।

१७) व्यतीपात : – दानं, वेदस्य ज्ञानं, श्रद्धा, संकल्पः, शत्रोरुच्चाटनं तथा विषादीनि कार्याणि व्यतीपातयोगे कारयेत्। जन्मकालेऽस्य योगस्य २२ घटीः, यात्रायामस्य योगस्य २१ घटीः, उत्तिष्ठेऽस्य योगस्य ७ घटीः, तथा च पतितेऽस्य योगस्य १० घटीर्वर्जयेत्।

यो योगोत्पत्तिकाले दानं कुर्यात्, लक्षगुणं, यात्रायामेककोटि, उत्तिष्ठे सप्तकोट्यस्तु तथा निपातेऽक्षयफलं प्राप्तं भवेत्। शङ्ख–चक्र–गदा–पद्म–लम्बभ्रू–दीर्घनासिका–अष्टनेत्र–चतुर्वक्त्रं शतयोजनविस्तीर्ण–दीर्घबाहु–महारौद्र–तीक्ष्णद्रंष्टं–महोदरशरीर– व्यतीपातनामको योगः स्यात्। शुभकार्येषु स योगो मृत्युकारको भवति।

१८) वरियान् – हारकाञ्चीकलापः, हस्ताभूषणम्, अङ्गुलीभूषणं वरियान्योगे प्रकारयेत्।

१९) परिघः – बन्धनं, छेदनं, भेदनं, विषदीपनं तथा चान्यानि क्रूरकर्माणि परिघयोगे कारयेत्।

२०) शिवः – मालिका, कटिसूत्रं, घण्टाभूषणं, कर्णयोर्भूषणं शिवयोगे प्रकारयेत्।

२१) सिद्धिः – देवप्रतिष्ठा, गृहनगरनिर्माणं, प्राकारः तोरणादीनि सिद्धियोगे प्रकारयेत् ।

२२) साध्यः – देवगुरुपूजनं, विद्यापूजा, विविधमन्त्रपूजाकार्याणि साध्ययोगे साधयेत् ।

२३) शुभः – बीजवपनं, गृहोत्साहं धनधान्यादिसंग्रहं, सर्वरत्नमहीग्राह्यं शुभयोगे प्रकारयेत् ।

२४) शुक्लः – लेपनम्, आभूषणं, नृपदर्शनं, कन्यादानं तथा च महोत्साहसबन्धनं कार्याणि कारयेत्।

२५) ब्रह्म – शान्ति-पौष्टिककर्म, तडागं, सेतुबन्धनं, चौलकर्म-उपनयनसंस्कारः, क्षौरकर्मादीनि ब्रह्मयोगे कारयेत्।

२६) ऐन्द्रः –कन्यादानं, गजारोहणं, स्त्रीसङ्गः, वस्त्रबन्धनं, काव्यगायनवाद्यानि कार्याणि ऐन्द्रयोगे प्रकारयेत्।

२७) वैधृतिः –घातनं परराष्ट्राणां, वञ्चनं, दाहनं, छेदनं, क्रूरकर्माणि वैधृतियोगे कारयेत्। योगस्य योगमानं सप्तविंशांशं भवेत्। २७ द्वारा भाजिता शेषक्रमेणैकस्य योगस्य मानं भवेत्। एवं प्रकारेण समस्तयोगानां ज्ञानं ज्ञेयम्।[२१९]

सूर्यचन्द्रयोर्योगेन नक्षत्रोत्पत्तिर्जायते। अतो नक्षत्राणां स्वामिन एव योगानां स्वामिनो भवन्ति। अत एव सर्वकर्मसु ते ज्ञातव्याः।[२२०]

---

२१९ व.सं. श्लो. ४०

२२० व.सं. श्लो. ४१

## १.५.५ वृद्धवसिष्ठसंहितायां करणविचारः

अथ षोडशाध्याये करणाध्याये १९ श्लोकाः सम्मिलिताः।

अथाध्याये चर-स्थिरसंज्ञककरणानां नामानि तथा तेषां स्वामिनो विलिखिताः। बव-बालव-कौलव-तैतिल-गर-वणिज-विष्टि - एतानि सप्तचरसंज्ञककरणानि। तेषां स्वामिनः क्रमेणेन्द्र-ब्रह्मा-मित्र-अर्यमा-पृथ्वी-लक्ष्मी-यमाः स्युः। अथ शकुनि-चतुष्पद-नाग-किंस्तुघ्न-एतानि चत्वारि स्थिरकरणानि । तेषां स्वामिनः क्रमेण कलि-राक्षस-सर्प-पवनाः।[२२१]

तिथेरर्धभागः करणं स्यात्। कृष्णपक्षचतुर्दशीत उत्तरार्धभागे शकुनिकरणं स्यात्। अमावस्यायां पूर्वार्धतिथिभागे चतुष्पदम्, उत्तरार्धभागे नागसंज्ञकं तथा च प्रतिपत्तिथेः पूर्वार्धभागे किंस्तुघ्ननामकं करणं स्यात्। एवंप्रकारेण एतानि चत्वारि करणानि कृष्णपक्षस्य चतुर्दशीतिथेरुत्तरार्धभागारम्भं कृत्वा प्रतिपदायाः पूर्वार्धभागपर्यन्तं सन्ति।[२२२]

चरकरणानि, सप्तकरणानि पुनः पुनः क्रमेण स्युः। एकस्य मासस्य ३० तिथयः स्युः। तत्र तिथेरर्धभागं कृत्वा ६० अर्धतिथयः स्युः। तत्र चत्वारि करणानि केवलमेकवारमेकस्मिन्मासे वर्तन्ते । अतः शेषाः पुनः पुनर्वर्तन्ते।

अध्यायेऽस्मिन् स्थिरकरणेषु किं कार्यं करणीयामिति न विवेचितम्। केवलं चरकरणानां कार्याणि वर्णितानि। अत्र विष्टिकरणं विशेषरूपेण वर्णितमस्ति।

---

२२१ व.सं श्लो. १,३,४

२२२ व.सं श्लो. २

अथ बवादिचरकरणानि तथा च तत्रोक्तकार्यं निम्नलिखितरूपेण वर्णितम्।[२२३]

१) बवम् - चरस्थिरद्विजहितकार्यं, पशुधान्यकरादिकार्यं, धातु-वाद-वणिक्-धान्यकर्म-आदिकं बवकरणे कारयेत्।

२) बालवम् - माङ्गलिकं कार्यम्, उत्सवाः पानादिः, समस्तवास्तुकर्म, नृपाभिषेकस्तथा युद्धकर्म- आदिकं बालवकरणे सिद्ध्यति।

३) कौलवम् - गज-उष्ट्र-अश्व-शस्त्र-अस्त्र-उद्यान-वनादीनां समस्तकार्यं तथा च बालवोक्ताखिलं समस्तं कार्यम्( माङ्गलिक-उत्सव-पानादिसमस्तवास्तुकर्म तथा युद्धकर्म) कारयेत्।

४) **तैतिलम्**- सन्धिविग्रह-यात्रादिकं, क्रयविक्रयकर्म, तडागकूपखननं कारयेत्।

५) **गरम्** - प्राकारोद्धरणं, सर्वजलसम्बन्धिकर्म, तथा सर्वतिथ्यर्धकथितं कर्म गरकरणे कारयेत्।

६) **वणिजम्** - मूलसम्बन्धिसमस्तकार्यं , धातुजीवाद्यखिलकर्म वणिजकरणे सिद्ध्यति।

७) विष्टिः - वधबन्धन-विषाग्नि-अस्त्रच्छेदन-उच्चाटनादिकम्,अश्व-उष्ट्र-महिषादिकर्म विष्टिकरणे सिद्ध्यति। मङ्गलमिच्छन् जीवितार्थी विष्टिनामककरणे शुभं कर्म न कुर्यात्। यद्यज्ञानवशेन कुर्यात् तदा तत्सर्वं क्षिप्रं नश्येत्। रुद्रस्य भालनेत्राग्निज्वालासमुद्भवा विष्टिः (भद्रा) पृथिव्यां मङ्गलकार्याणि नाशयति। कार्यं दग्धं भवति। अतः परीता, विपरीतापि मङ्गलकार्यं तस्मात् त्याज्यम्। यदि तन्माहात्म्यं जानन् भद्रायां यदि मङ्गलं करोति, वंशक्षयो निश्चयेन भवति । तस्य सर्वं माङ्गलिकं कर्म नष्टं भवेत्। तस्मात् तत्र शुभकर्म मनसापि न कारयेत्। तस्य कण्ठे तथा मुखे ५ घटयो, वक्षःस्थले ११ घटयो, नाभ्यां ४

---

२२३ व.सं. श्लो. ५ तः १९

घटयस्तथा कट्यां ६ घटय:, पुच्छे ३ घटय:, पुच्छान्तं मुखत: क्रमेण विष्टेरङ्गविभागस्य फलं निम्नलिखितरूपेण ज्ञेयम्। मुखे कार्यनाश:, कण्ठे मृत्यु:, वक्ष:स्थले दन्तहानि:, नाभौ विघ्नं, कट्यां बुद्धिनाशस्तथा च पुच्छभागे जय: संयाति। सुरासुराणां युद्धे, अमराणां पराजये, भगवान् शङ्कर: कोपायमानो जात:। तथा कोपेनासुराणां वधं कृतवान् तदा विष्टिरुत्पन्ना। अत: प्रसन्नेन देवै: सा कर्णयो: समीपे स्थापिता। अत: करणमिति नामधेयम्।

## १.५.६ वृद्धवसिष्ठसंहितायां मुहूर्तविचार:

अथ वृद्धवसिष्ठसंहिताग्रन्थे, सप्तदशाध्याये, मुहूर्ताध्यायनामके नव श्लोका: सम्मिलिता:।

पञ्चदशांशो क्षणमानं दिवसे तथा च पञ्चदशांशो क्षणमानं रात्रौ कथित:। अर्थात् दिने १५ मुहूर्ता: तथा च रात्रौ १५ मुहूर्ता:। तत्र चन्द्रम:सदृश: क्रमश: नक्षत्रानुसारेण कार्याणि करणीयानि।[२२४]

यत्कर्म यस्मिन् नक्षत्रे कथितम्, तस्मिन् नक्षत्रे तत्क्षणे कार्यं करणीयम्।एवंप्रकारेण अखिलदिक्शूलादिकं कर्म तथा च परिघदण्डं विज्ञेयम्। दिनमुहूर्तानां स्वामिन: क्रमेण शिव:-सर्प:-मित्र:-पितर:-वसु-जलम्-विश्वेदेवा:-लक्ष्मी:-ब्रह्मा-इन्द्र:-इन्द्राग्नी-दनुज:-वरुण:-अर्यमास्तथा भगदेव: स्यात्।[२२५]

रात्रिमुहूर्तानां स्वामिन: क्रमेण रुद्र:-अजपाद:-अर्हिबुध्न्य:-पूषा:-अश्विनीकुमार:-यमराज:-अग्नि:-ब्रह्मा-चन्द्रमा:-अदिति:-बृहस्पति:-विष्णु:-सूर्य:-त्वष्टा तथा वायु: स्यात्।

---

२२४ व.सं. श्लो. ४

२२५ व.सं. श्लो. ५,१

निर्ऋतिपितृसार्पाख्यास्तथा रौद्रेन्द्राग्नीश्वरभगाख्या:, एते पापमुहूर्ता नित्यं शुभकर्मणि दु:खशोकप्रदा:। शेषा दिवसमुहूर्ता निश्चयेन माङ्गलिककार्येषु विशेषत: शान्तिकपौष्टिककर्मसु शुभफलप्रदा:।अजपाद–रुद्र–आग्नेय–यमसंज्ञका:–एते चतुर्मुहूर्ता: क्रूरसंज्ञका:, अनिष्टफलदायिन: स्यु:। तथा च शेषा मुहूर्ता: शुभफलप्रदा: स्यु:।[२२६]

रविवासरे अर्यमा:, सोमवासरे राक्षसस्तथा ब्रह्मा, भौमवासरे पितर एवमग्नि:,

बुधवासरे अभिजित्, गुरुवासरे दैत्य एवं जलम्, शुक्रवासरे पितर एवं ब्रह्मा तथा च शनिवासरे सर्प एवं शिव:, एते मुहूर्ता वर्जनीया मुहूर्ता:।[२२७]

## १.५.७ गोचरविचार:

अथ वृद्धवसिष्ठसंहिताग्रन्थ अष्टादशाध्याये गोचरविचारनामक एकशताधिक–अष्टसप्ततिश्लोका: सम्मिलिता:।

गोचरविचाराध्याये सूर्यादिग्रहाणां बलमेवं वेधसहितं गोचरबलं कथितम्। तत्र नृपाणां शुभाशुभबलं जन्मनक्षत्राधारेण विचिन्तयेत्।[२२८]

१. सूर्य: –सूर्यो यदि त्रिषडेकादशमे स्थित:, ग्रहैर्न विद्धश्चेत्, तदा शुभफलमाप्नोति। शनि–अतिरिक्तग्रहाश्चतुर्थ–पञ्चम–नवम–द्वादशभावेषु स्थितत्वेन सूर्येण वेधिता: स्यु:।

२. चन्द्रमा: – चन्द्रमा: प्रथम–तृतीय–षष्ठ–सप्तम–दशम–एकादशे वा स्थाने स्थितो बली स्यात्। बुधातिरिक्ता अन्यग्रहाश्चतुर्थ–पञ्चम–अष्टम–नवम–द्वादशस्थानगता:, तदा चन्द्रमसा वेधिता: स्यु:।

---

२२६ व.सं. श्लो. २,३,६७,८
२२७ व.सं. श्लो. ९
२२८ व.सं. श्लो. १ त: ९

३,४ भौमस्तथा शनि: - भौमशनी तृतीय-षष्ठ-एकादशे वा स्थाने स्थितौ शुभौ कथ्येते। सूर्यातिरिक्तान्यग्रहा यदि पञ्चम-सप्तम-नवमे वा स्थाने स्थितास्तदा वेधिता: स्यु:।

५. बुध: - बुध: प्रथम-चतुर्थ-षष्ठ-अष्टम-दशम-एकादशे वा स्थाने स्थित: शुभ: कथ्यते। चन्द्रमसातिरिक्ता अन्यग्रहा यदि प्रथम-तृतीय-पञ्चम-अष्टम-द्वादशे वा स्थाने स्थिता वेधिता: स्यु:।

६. गुरु: - गुरुर्यदि द्वितीय-पञ्चम-सप्तम-नवम-एकादशे वा स्थाने स्थितो ग्रहैर्न विद्धश्चेत्, तदा शुभफलम्। तृतीय-चतुर्थ-अष्टम-दशम-द्वादशे वा स्थाने ग्रहस्थितत्वे गुरुणा वेधित: स्यात्।

७. शुक्र:- शुक्रो यदि प्रथम-द्वितीय-तृतीय-चतुर्थ-पञ्चम-अष्टम-नवम-एकादश -द्वादशे वा स्थित: शुभफलद: स्यात्। यदि प्रथम-तृतीय-पञ्चम-षष्ठ-सप्तम-अष्टम-नवम-दशमे वा स्थाने ग्रहे स्थिते शुक्रो वेधित: स्यात्।

एवं प्रकारेण गोचरविचारे वेधसमन्विता: सर्वे ग्रहा नृणां सत्फलं न दिशन्ति, किन्तु व्यत्ययवेधविधानेनाशुभग्रहा अपि सदैव शुभफलदा: स्यु:। अतो बुद्धिमान् गोचरबलं विचिन्तयेत्। गोचरबलानभिज्ञा: सुजना लोके हास्यतां यान्ति। शुभग्रहा यद्यशुभग्रहैर्दृष्टास्तदा कष्टफलदा: स्यु:। यद्यप्यशुभग्रहा: शुभग्रहेण दृष्टा: शुभफलदा: स्यु:। किन्तु सर्वे ग्रहा यदि शत्रुग्रहेण दृष्टास्तदा स्वफलं प्रदातुमसमर्था: सन्ति। नीचराशौ गता:, रिपुविर्जिता:, सूर्येण सह अस्तङ्गता:, तथा च स्वशत्रुगेहस्था ग्रहा: स्वफलं न ददति। यथा भुजगा मन्त्रहता: कार्यक्षमा न भवन्ति। गोचरबलविषये चन्द्रमा: शुक्लपक्षे द्वितीय-नवम-पञ्चमगोऽपि शुभो

भवति। किन्तु कृष्णपक्ष एतेषु स्थानेषु स्थितो निश्चयेन निर्बलो भवति। राश्यान्त्यगता, नक्षत्रान्त्यगताश्च ग्रहाः परभवनफलं दद्युः। ये च वक्रिता ग्रहाः प्राग्भवनफलं प्रददति।[२२९]

अतिचारवक्रयोर्ग्रहा दशदिवसपञ्चदिनात् त्रिपक्षान्तर्गतं स्वफलं दद्युः। भौमाद्या ग्रहाः पञ्चमदिनप्राग्राशिफलं पञ्चमासाच्च तस्यैव फलं प्रददति। राश्यारम्भे रविभौमौ, राश्या मध्यमगौ गुरुशुक्रौ तथा च राश्यान्तगतौ शनिशशिनौ फलदौ स्याताम्, किन्तु बुधः सदैव फलदः स्मृतः।[२३०]

नृपावलोकनसमये सूर्यः, विवाहे बृहस्पतिः, युद्धसमये भौमः, तथा च प्रयाणसमये शुक्रः बली स्यात्। दीक्षणसमये शनिः, ज्ञानशिलाविधिसमये बुधस्तथा च समस्तकार्येषु चन्द्रबलं मुख्यरूपेण समस्तनॄणां फलदायी भवति।[२३१]

चन्द्रस्य पराक्रममाश्रित्य अन्यग्रहा बलिनश्च, एवं शुभाशुभफलप्रदानं कुर्वन्ति। यथा स्वकार्यदक्षाणि इन्द्रियाणि मनसा सहितानि। यदि ग्रहा विषमस्थानेषु स्थितास्तदा नॄणां व्याधिरर्थहानिः स्यात्। अतो नृपतिर्मनसा सम्यग्विचार्य ग्रहशान्तिं कारयेत्।[२३२]

नृणामृच्छ्रायपतनानि विशेषतो ग्रहाधीनानि स्युः। तथा च समस्तसंसारेषु ग्रहाधारेण वृद्धिः स्यात्। अत एव ग्रहाणां पूजनं कुर्यात्। प्रत्येकमासे, अयने, चन्द्रसूर्ययोर्ग्रहणे, विषुवत्यर्कसंक्रान्तौ, व्यतीपाते, दिनक्षये, पुण्यदिने, चन्द्रताराणां बलयुक्ते जन्मनक्षत्रदिने गृहस्येशानभागे विद्वान् मण्डपं कारयेत्। षड्द्वादशाष्टभिर्हस्तैः षोडशैर्वा समन्ततश्चतुर्द्वारसमायुक्तस्तोरणाद्यैः समन्वितस्तन्मध्यभागे चतुरस्रकं कुण्डं कारयेत्। यत्कुण्डं वितस्तिद्वयखातं स चतुरङ्गुलं कारयेत्। विप्राणां मानतस्तदङ्गुलत्रयसंयुतं, क्षत्रियाणां,

२२९ श्लो. १० तः १३
२३० श्लो. १४,१५
२३१ श्लो. १६,१७
२३२ श्लो. १८,१९

द्व्यङ्गुलाधिक्यं वैश्यानां तथा च हस्तमात्रकं शूद्राणां कृते कुण्डनिर्माणं कार्यम्। तत्र द्वादशाङ्गुलविस्तृता प्रथमा मेखला, तस्याः समन्ततश्चतुर्भिरङ्गुलैरुन्नतः। तस्याश्चोपरि चतुरङ्गुलमुन्नतमष्टाभिरङ्गुलैः सम्यग्विस्तीर्णश्च समन्ततः स्यात्। पुनस्तस्योपरि यथाविधि चतुरङ्गुलविस्तीर्णं चोन्नतं च तृतीयकं कार्यम्। पश्चिमे भागे प्राङ्मुखी मध्यसंस्थिता षडङ्गुलैश्च विस्तीर्णा, द्वादशाङ्गुलैश्चायता योनिश्च निर्मातव्या। पृष्ठोन्नता गजस्यैव सच्छिद्रा मध्यमोन्नता। एवं लक्षणसंयुक्तं कुण्डं धनदम्, अभीष्टसिद्धिदायकं स्यात्। न्यूनाधिकं कुण्डमनेकदोषदम्। अतः शुभमिच्छन् मनुजस्तस्मात्सम्यक्परीक्ष्यैव कुण्डनिर्माणं कुर्यात्। कुण्डस्येशानभागे पूजावेदीं प्रकल्पयेत्। सा हस्तोन्नता च विस्तीर्णा चतुरस्रा च समन्ततः स्यात्। कायशुद्ध्यर्थमादौ स्नानं कृत्वा, तदनन्तरं द्विजानुज्ञां लभेत्, तथा च मधुपर्कानन्तरमाशिषो वाचनं कार्यम्। पुनर्विद्याविशारदान् दम्भानृतवर्जितान्, शुद्धान् षोडशब्राह्मणान् ऋत्विग्रूपेण वरयेत्। आचार्यत्वेन तेषां मध्ये श्रेष्ठतमं प्रकल्पयेत्। वेदिकोपरि तण्डुलैरष्टदलं पद्मं लिखेत्। पुनः सूर्यादिग्रहाणां प्रतिमां प्रकल्पयेत्। तत्र ताम्रेण सूर्यप्रतिमा तथा च स्फटिकेन चन्द्रप्रतिमा निर्मितव्या। भौमप्रतिमा चन्दनेन, बुधगुरुप्रतिमे सुवर्णेन, शुक्रप्रतिमा रजतेन, शनिप्रतिमा लोहेन, राहुप्रतिमा सीसेन तथा केतुप्रतिमा शुद्धकांस्येन प्रयत्नतो निर्मितव्या। अथवा बुद्धिमान् यथारुचि प्रमाणेन प्रतिमां कल्पयेत्। वेदीमध्यभागे सुन्दरकमलस्य कर्णिकायामधः सप्ताश्वः, अरुणवर्णसमानदेहकान्तिः, सप्तरज्जुः, सुन्दरबहुविधगुणयुक्तः, द्विबाहुयुतः, कलिङ्गदेशे कश्यपगोत्रोत्पन्नः, प्राङ्मुखः पद्महस्तधारः सूर्यः स्थापितव्यः। आकृष्णेन इति ऋषिर्हिरण्यस्तपसंज्ञितः मन्त्रो रविं ध्यात्वा सम्यगर्चयेत्। त्रिष्टुप्छन्दो सूर्यदेवस्य मन्त्रः सर्वकामदः स्यात्। अस्याधिदेवतां रुद्रं दक्षिणे स्थापयेत्। अस्यानुष्टुप्छन्दोविरचितस्य त्र्यम्बकनाम्नो मन्त्रस्य वामदेववसिष्ठाख्यो ऋषिः, देवता परमेश्वर इति। सूर्यस्य वामभागे प्रत्यधिदेवतामग्निं स्थापयेत्। तथा च प्रयत्नतो ग्रहाधिदेवतान् स्थापयेत्। अग्निदूतम् इति

मन्त्रस्य ऋषिर्मेघातिथिस्तथा अग्निस्तु देवता स्यात्। गायत्रीछन्दः। सम्पूर्णपापेभ्यो विमुक्तो भवति। अग्निकोणे रथसहितो दश –आत्रेयवंशजो, पवित्रदेशोत्पन्नः, प्राङ्मुखश्चतुरस्रपीठे गदाङ्कितः सिताभश्चन्द्रमाः स्थापनीयः।आप्यायस्येति मन्त्रेण सदा चन्द्रमसं यजेत्। अस्य ऋषिर्गौतमस्तथा च छन्दो गायत्री। गौरीर्मिमायेति मन्त्रेण प्रत्यधिदेवतां गौरीं स्थापयेत्। अस्य ऋषिः दीर्घतमाः, छन्दो जगती तथा देवता उमा। अस्याधिदेवता जलम्, आपोहिष्ठामयो ऋचः, ऋषिः सिन्धुद्वीपः, गायत्री छन्दः। शक्तिगदात्रिशूलधारी, वरप्रदः, याम्यमुखी, त्रिकोणदेहधारी, अतिरक्तवर्णः कुजो याम्ये गतो भरद्वाजकुले प्रसूतः। अग्निमूर्द्धेति मन्त्रेण सम्यग्ध्यात्वा कुजं यजेत्। अस्य मङ्गलो देवता गायत्री छन्दः, ऋषिर्विरूपः। अस्य मङ्गलस्याधिदेवता कार्त्तिकेयस्वामी। कार्त्तिकेयस्य पूजनं स्कन्दगायत्रीद्वारा कुर्यात्। स्कन्ददेवता–कार्त्तिकेयस्वामी प्रीतिदायको भवेत्। स्योना पृथिव्यसौ इति मन्त्रः, तस्य देवता महीः, तथा च छन्दो गायत्री, ऋषिर्मेधातिथिः। मगधदेशोत्पन्न उत्तरदिशिमुखवान् आत्रेयगोत्रोत्पन्नः शरमण्डलस्थो हरिस्थः सखड्गचर्मोरुगदाधरो बुधग्रहः सपीत ईशानभागे स्थितो वरदो भवति। अग्ने विवस्वदुषसस्तु इति मन्त्रेण बुधस्य पूजनं कार्यम्। प्रस्कण्व ऋषिः, बृहती छन्दः, तथा देवता बुधः। विष्णुः– इति मन्त्रेण पूज्योऽधिदेवता विष्णुः, मेघातिथिर्ऋषिः, छन्दो गायत्री, तथा च देवता हरिः। पुरुषसूक्तेन विष्णुदेवतामर्चयेत्। तस्य ऋषिर्नारायणः, छन्दोऽनुष्टुप्। सौम्यः, सुदीर्घः, सौम्यमुखः, सुपीतः, चतुरस्रपीठे रथोऽङ्गिराः द्वन्द्वाक्षमालाधारणकर्ता, जलपात्रधारी वरदश्च गुरुः सिन्ध्वाख्यदेशे प्रकटोऽभूत्। बृहस्पते अतियदर्यो – इति मन्त्रेण गुरुमर्चयेत्। अस्य ऋषिः प्रतिरथः, छन्दस्त्रिष्टुप् तथा च देवता बृहस्पतिः। तस्याधिदेवता ब्रह्मणः पूजा ब्रह्म जज्ञानम् –इति मन्त्रेण कारयेत्। तस्य ऋषिर्भगः, छन्दस्त्रिष्टुप् तथा च देवता ब्रह्मा। इन्द्रायेन्द्रो – इति मन्त्रेण देवतानामर्चयेत्। अस्य छन्दो गायत्री, ऋषिः कश्यपस्तथा च देवता हरिः। प्राच्यां भृगुर्भोजकटस्थानोत्पन्नः शुक्रः पूर्वमुखः,

सिताभः, पञ्चकोणरथाधिरूढः, दण्डाक्षमालावरदाम्बुपात्रं धारयेत्, भार्गव इति नाम्ना ख्यातः। तत्रान्नादिति इति मन्त्रेण ध्यात्वा शुक्रं समर्चयेत्। तस्य छन्दस्त्रिष्टुप्, ऋषिर्भारद्वाजस्तथा च देवता दनुः। तस्याधिदेवतां इन्द्रं शक्रस्तु इति मन्त्रेण पूजयेत्। देवता इन्द्राणी तथा च ऋषिर्धृतिः, एवं मेघातिथिः। उत्तानपरि इति मन्त्रेण पूजयेत्। तस्य ऋषिर्मेधातिथिः, देवता इन्द्राणी तथा च छन्दोऽनुष्टुप्। सौरिः - शनिग्रहो गृध्रस्थो चापासने स्थितः, सुनीलः, प्रत्यङ्मुखः, पश्चिमदिशायाः स्वामी, कश्यपपुत्रः, सशूलचापयुक्तः, वरप्रदश्च सौराष्ट्रदेशे प्रसूतः। शन्नो देवीरभीष्टय इति मन्त्रेण शनिमर्चयेत्। अस्य सिन्धुद्वीप ऋषिः, गायत्री छन्दो देवता शनिः। तस्याधिदेवताया यमराजस्य पूजनं त्वायङ्गौरित्यनेन इति मन्त्रेण कारयेत्। तस्य ऋषिः सर्पराज्ञी, छन्दो गायत्री तथा च देवता यमः। अस्य शनेः, प्रजापतिः प्रतिपूर्वाधिदेवता प्रजापते न इति मन्त्रेण यजेत्। तस्य छन्दस्त्रिष्टुप्, मन्त्रस्य ऋषिः स्वर्णगर्भः, तथा च देवता प्रजापतिः पापमोचकः। शूर्पासने स्थितः, सिंहगमनसमानः, सधूमः, शूलसचर्मखड्गः, करालः, वरप्रदः, याम्यायने नैर्ऋताङ्गः, बर्बरदेशोत्पन्नो राहुः। कयानश्चित्र आभुव इति मन्त्रेण राहुमर्चयेत्। अस्य ऋषिर्वामदेवो गायत्री छन्दस्तथा च देवता राहुः। तस्याधिदेवतां कालं ब्रह्म जज्ञानमिति मन्त्रेणार्चयेत्। छन्दस्त्रिष्टुप्, ऋषिर्वामदेवः, तथा अधिदेवता कालः। अपरा देवता सर्पाः। नमोऽस्तु सर्पेभ्यो- इति मन्त्रेण पूजयेत्। ऋषिरग्निः, छन्दो विराट् तथाधिदेवता सर्पः। जैमिनिगोत्रोत्पन्नः, सुन्दरवेशधारी, सुविचित्रवर्णवान्, वृकासने स्थितः, याम्यायने वायुदिशि प्रखड्गचर्मा ८०१ केतवः सन्ति। केतुं कृण्वन्न इति मन्त्रेण केतुं पूजयेत्। मन्त्रस्य मधुर्च्छृषिः, गायत्री छन्दस्तथा देवता केतुः। तस्याधिदेवता चित्रगुप्त इति ज्ञात्वा तमर्चयेत्। अस्य छन्दोऽनुष्टुप्, ऋषिः सोमस्तथा देवता चित्रगुप्तः। तस्याधिदेवता ब्रह्मा एष ब्रह्म इति मन्त्रेण पूजयेत्। तस्य ऋषिर्विश्वेदेवाः, छन्दो विराट् एवं गायत्री तथा देवता ब्रह्मा। शनेः पश्चिमतो गणेशं संस्थाप्य तमर्चयेत्। गणानां त्वा इति मन्त्रेण विनायकं पूजयेत्। छन्दो जगती,

ऋषिर्भगः, तथा च देवता स्वयं गणेशः। तस्य दक्षिणभागे दुर्गां स्थापयित्वा, जातवेदस इति मन्त्रेण पूजयेत्। छन्दस्त्रिष्टुप्, ऋषिः काश्यपस्तथा देवता दुर्गा। वायुतो दक्षिणकोणे शिशुमिति मन्त्रेण पूजयेत्। तस्य ऋषिर्गौरी तथा गायत्री छन्दः, देवता मरुत् । तस्य दक्षिणभाग आकाशं पूजयेत्। तस्य ऋषिर्भगश्छन्दो गायत्री तथा देवता आकाशः। दक्षिणभागेऽश्विनौ षोडशमन्त्रेण पूजयेत्। तस्य ऋषिः कण्वः, छन्दो गायत्री, तथा देवता अश्विनीकुमारौ। ऐरावतारूढो हस्ते वज्रं धारयत्, स्वर्णवर्णः, सहस्राक्षः शचीप्रियः, इन्द्रस्य नायकः, स्वयमिन्द्रः। तं पद्मपूर्णदलाग्र इन्द्रमिन्द्रश्च इति मन्त्रेण पूजयेत्। वायुः ऋषिश्छन्दो गायत्री तथा च देवता स्वयमिन्द्रः। अग्निदेवता सुवर्णः सप्तार्चिः सप्तहस्त ऊर्ध्ववक्त्रकः, स्वाहाप्रियो मेषगमनकर्ता, षण्नेत्रवान्,स्रुक्स्रुवायुधः। आग्नेयकोण अग्निदूतमिति मन्त्रेण तमर्चयेत्। तस्य ऋषिः मेधातिथिः, छन्दो गायत्री तथा देवताग्निः। इन्द्रप्रियो दण्डधरो, रक्तवर्णवान् महिषवाहनः, यमो लोकानां स्वस्वकर्मफलप्रदः। याम्यदले स्थापितं यमं सोममिति मन्त्रेण पूजयेत्। तस्य ऋषिः शातातपः, छन्दोऽनुष्टुप् तथा च देवता यमराजः। खड्गचर्मधरा, नीलवर्णा, ऊर्ध्वकेशा, विरूपाक्षा, नरवाहना, निर्ऋतिः कराला कालिकाप्रिया। तां नैर्ऋत्यकोणे मोषणस्तु - इति मन्त्रेण पूजयेत्। तस्य छन्दो गायत्री, ऋषिर्घोरकण्ठस्तथा च देवता स्वयं निर्ऋतिः। नागपाशधारणकर्ता, रत्नभूषणधारी, स्वर्णवर्णः,मकरवाहनः, वरुणः जलपतिः। तं पश्चिमभागे त्वन्नो अग्ने - इति मन्त्रेण पूजयेत्। तस्य ऋषिर्वामदेवः, छन्दस्त्रिष्टुप् तथा च देवता वरुणः। कृष्णमृगासने स्थितः, हेमदण्डधारी, श्यामलवर्णः, मोहिनीप्रियः वायुर्जगतः प्राणरूपः। तं वायव्यदिशि तव वायुवृत्त इति मन्त्रेण पूजयेत्। तस्य छन्दो गायत्री तथा च ऋषिरङ्गिराः। अश्वारूढः, कुन्तपाणिः, चित्रिणीप्रियः, निधीश्वरः, स्वर्णवान्, स्वर्णदो रूपवान्प्रभुः कुबेरः। तमुत्तरदिशि सोमो धेनुमिति मन्त्रेण पूजयेत्। तस्य छन्दस्त्रिष्टुप्, ऋषिगौतमस्तथा च देवता सोमः। शुद्धस्फटिकसमानः, पार्वतीपरमेश्वरः, वृषवाहनः, वरदाभयशूलाक्षः,

शूलभृत्परमेश्वरः। ईशानकोणे कद्रुद्रय- इति मन्त्रेण रुद्रमर्चयेत्। तस्य छन्दो गायत्री, ऋषिर्घोरकण्ठस्तथा च देवता चन्द्रशेखरः। अर्कः, पलाशः, खदिरः, अपामार्गः, अश्वत्थः, उदुम्बरः, शमी, दूर्वा, कुशाः – एतेषां समिधः क्रमेण कथिताः।

आर्द्राः, स्निग्धः, सत्त्वनिबिडाः, प्रादेशसम्मिताः कनिष्ठिकातुल्यवृत्ता होमकर्मणि समिधः कामदाः स्युः। तस्मिन् कुण्डेऽष्टदललिखितपद्मे हुताशनमाचार्यद्वारा सम्यक् स्थापयेत्। तथा च स्वगृह्योक्तविधानानुसारेण मखान्तेऽधिदेवतासहितमखिलग्रहान् पूर्वोक्तमन्त्रैः स्व-स्व लोकपालान् च पूजयेत्। तस्येशानभागे नवं पूर्णकुम्भं स्थापयेत्। पञ्चत्वक्पल्लवोपेतं शतौषधिसमन्वितं, सुवर्ण-रत्न-फल-मृत्तिका-वस्त्रेण युतं ब्राह्मणैर्युक्तोऽपलिङ्गैवारुणैः- इति मन्त्रैः पूजयेत्।

गजाश्वगोकुलस्थानाद्रथ्यावल्मीकसम्भवात् ह्रदाच्च नगरद्वारात्- एतेभ्य अष्टस्थानान्मृत्तिकामानयेत्। उदुम्बरः, वटः, अश्वत्थः, प्लक्षः, आम्रः, कमलोत्पन्नः, तिलं, व्रीहिः, माषः, यवः, गोधूमाण्डः, प्रियङ्गवः, श्रीवृक्षः, बिल्वः, खदिरः, विष्णुक्रान्तः, पुनर्नवा, देवदारुः, जटामासी, सहदेवी, मुरा, शिवा, फलिनी, बकुला, जातिः, मञ्जिष्ठा, आम्रनीवारः, खदिरः, मल्लिका, अर्जुनः, दमयन्ती, महाजातिः, नीमः, उशीरः, हरिद्रका, सर्पाक्षी, तुलसी, रौद्रकूटः, दाडिमः, चम्पकः, अष्टाप्रकाराणां मातुलङ्गाः, जपा, कर्णिका, ओर्णः, काञ्चना, सेवती, पनसः, द्राक्षः, विशाक्षी, श्वेतसर्षपा, राजीवः, कुन्दमुकुलः, नीलोत्पलं, करञ्जका, पुन्नागः, चन्दनं, द्रोणः, मन्दरः, हेमदुग्धकः, रक्तचन्दनं, जम्बीरं, यूथिका, गृहमल्लिका, सम्पर्कः, सिन्दुवारः, इन्द्रः, रक्तधत्तूरः, खाण्डिमा, अपामार्गः, ऊरुः, पलाशः, बृहती, करवीरकः, नन्द्यावर्तः, कुबेराक्षः, पाटलः, हेमपुष्पिका, शिरीषं, आमलकं, अशोकः, रक्तागस्तिः, कपित्थका, बन्धूकः, भृङ्गराजः, कृष्णवी, माधवीलता, चतुर्जातीया बर्हिशिखा, कुटजः, मधुबिम्बकः, तमाल-तरुः, अरुपुष्पं, चक्रमार्दिनी, व्याकुली, शाल्मली, मौडी,

अरास्नाखर्वः, पटोलिका, महाखर्जूरिका, नारिकेलः – एते शतवृक्षाः कथिताः। एषां वृक्षाणां मूलानि मनुष्याणां सम्पूर्णपापानि नुदन्ति। शान्तिकर्मणि तान् जलशोधके निक्षिप्य सर्वत्र प्रयोगः कारयेत्। एषामाभावे दश सर्वौषध्यः प्रकीर्तिताः। उद्धृतासि –इति मन्त्रेण सदा अष्टमृत्तिकाः क्षिपेत्। चातुर्जातमुशीरं, पद्मकं–फलिनीमुखं, देवदारुनिशा चैषां त्वक्पत्राणि निक्षिपेत्। सर्वेषामुपचाराणि सदा शुक्लाक्षतैः ग्रहवर्णानुसारेण गन्धपुष्पाक्षतध्वजाः दातव्याः। कर्पूर–अगरु–कस्तूरी–कुङ्कुम–गन्ध–गुग्गुल–कृष्णागुरु–अक्ष–कर्पूर–धूपाः भास्कराय कथिताः। उक्तसमिदभावे पालाशं कल्पयेत्। धूपाभावे गुग्गुलः, द्रव्याभावे गुडोदनं कल्पयेत्। किन्तु पञ्चामृते गव्यमेव न कदाचन मिश्रकम्। घृतान्नपायसापूपक्षीरमिश्रं, गुडोदनं, दधिमिश्रकमोदनं, तिलैर्मिश्रकमोदनं तथा च सामिषं चित्रितोदनमेतेषां चतुर्णां, संस्कारार्थे, होमार्थे च स्थापनं कुर्यात्। तथा च तान् अग्नेय जुष्ट इति मन्त्रेणोद्धृतेष्वभिपूरयेत्। आदौ समिधाज्यान्नैः पृथक् भक्तितोऽष्टोत्तरशतं ग्रहोद्देशेन स्व–स्वमन्त्रैश्च जुहुयात्। द्वि–त्रि–पञ्चाधिदेवताः पञ्चधा जुहुयात्, किन्विन्द्रादिलोकपालानां समिधादिना होमं न कुर्यात्। घृतयुक्तसमिधामुपस्तरणपूर्वकमवदानं हुते पञ्चैश्चैवाभिघारणं सुकृतं कुर्यात्। पक्वामलकसम्मितमाहुतेः प्रमाणं तथा च विविधान्नं नैवेद्यं, चरुशेषं च समर्पयेत्। पुनः व्याहृतिभिः प्रयत्नतस्तिलैश्च होमयेत् । होमसङ्ख्या – प्रथमं – अयुतसङ्ख्यामन्त्रैः, द्वितीयकं – लक्षसङ्ख्यामन्त्रैः, तथा च तृतीयकं कोटिसङ्ख्यामन्त्रैर्होमं कुर्यात्। एवं त्रिविधो ग्रहयज्ञकः, एकरात्रं, त्रिरात्रं पञ्चरात्रं वा कुर्यात्। प्रतिदिनं भक्त्या शिवगाथां, विष्णुगाथां शान्तिं ब्राह्मणभोजनं समाचरेत्। ततो जपादिं जुहुयात्पूर्णाहुतिं समाचरेत्। पश्चात्कुण्डस्येशानभागतः स्वस्तिकं कल्पयेत्। तत्र यजमानं भद्रासने पूर्वदिशिमुखं कृत्वाभिषेकार्थमुपाविशेत्, आचार्यसहितं षोडश–ऋत्विजां सूतमागधकैः सह विविधैर्मङ्गलघोषैरभिषेकं कुर्यात्। वक्ष्यमाणैश्च पूर्णजलैरुक्तद्रव्यसमन्वितैः कुम्भोदकैरब्लिङ्गैर्वेदमन्त्रकैर्मन्त्रैश्च तथा

विषमस्थानसंभूतां पीडां दहतु मे – इति प्रत्येकस्यग्रहस्य प्रार्थनापूर्वकं पूजनं पश्चात् नृपस्याभिषेकं कुर्यात्। तस्य रक्षार्थे दिग्विदिक्षु विचित्रान्नैः बलिमुत्क्षिपेत्। तथा च दीपैर्नीराजयेत्। श्वेतमालां तथा च वस्त्रं धारयेत्, शुक्लगन्धानुलेपनं कृत्वा मण्डपमागत्य ग्रहाणां देवानामग्नेश्च ध्यानं कुर्यात्। प्रत्येकप्रतिमन्त्रैश्च पुष्पाञ्जलिं दद्यात्, अनन्तरं मन्त्र–तन्त्रक्रियालोपप्रायश्चित्तार्थमेव तदनन्तरं यत्कर्म न कृतं तदर्थं स्विष्टकृतं होमयेत्। स्विष्टकृन्मन्त्रस्यातिधृतिश्छन्दस्तथा ऋषिः स्वर्णगर्भः। देवतानि स्विष्टकृद्व्याहृतीनां प्रयोगः सकृत्सकृत्समिधादिद्रव्यमादाय, स्रुक्स्रुवं मिलित्वा तत्र ध्यानं कृत्वा सप्तमन्त्रैरग्नेस्तां पूर्णाहुतिं यजेत्। कुम्भपूजायां ब्रह्मत्वपूजनफलं तथा च गणेशादिक्षेत्रपालानां, दुर्गायास्तथा च तेषामङ्गदेवतानां जपफलं सम्यग्जलपूर्वकं ग्रहणं कुर्यात्। एवं षोडश–ऋत्विजां दक्षिणा दातव्याः। धेनुः, शङ्खो, रक्तवृषो, हेमं , पीताम्बरं, श्वेताश्वः, कृष्णवर्णा गौः,कृष्णलोहमजः – इति क्रमेण सूर्यादिग्रहाणां कृते दानानि कथितानि।आचार्याय जापकेभ्यो तथा ब्राह्मणेभ्यः स्वशक्तिनुसारेण स्वर्णेन दक्षिणा दातव्या।[२३३]

**सूर्यादिग्रहाणां दानमन्त्राः —-**

१. **सूर्यस्य दानमन्त्रः —**

गवामङ्गेषु तिष्ठन्ति भवनानि चतुर्दश।

यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च।।

चतुर्दशभवनानि गवामङ्गेषु तिष्ठन्ति, अत इहलोके, परलोके च मम कल्याणं भवतु।[२३४]

**कपिलादानमन्त्रः —**

कपिले सर्वदेवानां पूजनीयासि रोहिणि।

---

२३३ व.सं. श्लो. २० तः १५६

२३४ व.सं. श्लो. १५७

तीर्थरूपमयी यस्मादतः शान्तिं प्रयच्छ मे।।

हे कपिले ,रोहिणि, त्वं सर्वदेवानां पूजनीयासि, तीर्थरूपमयी त्वमसि, अतो मे शान्तिं प्रयच्छ।[२३५]

२. **चन्द्रस्य शङ्खदानमन्त्रः** —

पुण्यस्त्वं शङ्ख पुण्यानां मङ्गलानां च मङ्गलम्।

विष्णुनापि धृतो यस्मादतः शान्तिं प्रयच्छ मे।।

हे शङ्ख, त्वं पुण्यानां पुण्यस्त्वं तथा च मङ्गलानां मङ्गलकारकः। एवं विष्णुनापि धृतः, अतः मे शान्तिं प्रयच्छ।[२३६]

३. **भौमस्य वृषभदानमन्त्रः** —

धर्मस्त्वं वृषरूपेण जगदानन्दकारकः।

अष्टमूर्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे।।

हे वृषभः, त्वं वृषरूपेण धर्मस्तथा च सम्पूर्णजगत आनन्दकर्ता, एवमष्टमूर्तिभगवतः शिवस्याधिष्ठानम्, अतो मे शान्तिं प्रयच्छ।[२३७]

४. **बुधस्य स्वर्णदानमन्त्रः** —

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।

अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे।।

हे हिरण्यगर्भस्य विभावसोः गर्भस्थं हेमबीजमनन्तपुण्यफलदमस्ति। शान्तिं मे प्रयच्छ।[२३८]

---

२३५ व.सं. श्लो. १५८

२३६ व.सं. श्लो. १५९

२३७ व.सं. श्लो. १६०

२३८ व.सं. श्लो. १६१

५. **गुरोः पीतदानवस्त्रदानमन्त्रः —**

पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम्।

प्रदानात्तस्य मे विष्णुर्ह्यतः शान्तिं प्रयच्छ मे ।।

यस्मात् पीतवस्त्रयुगं वासुदेवस्य प्रियं, अतस्तस्य प्रदानाद् विष्णुः प्रसन्नो भवेत्। अतो मे शान्तिं प्रयच्छ।[२३९]

६. **शुक्रस्याश्वदानमन्त्रः —**

विष्णुस्त्वमश्वरूपेण यस्मादमृतसम्भवः।

चन्द्रार्कवाहनो नित्यमतः शान्तिं प्रयच्छ मे।।

त्वं विष्णुस्तथाश्वरूपेणामृतोद्भवस्तथा नित्यं सूर्यचन्द्रवाहनः। अतो मे शान्तिं प्रयच्छ।[२४०]

७. **शनेः कृष्णधेनुदानमन्त्रः —**

यस्मात्त्वं पृथिवी सर्वा धेनो कृष्णेन सन्निभा।

सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे।।

हे धेनो त्वं सम्पूर्णपृथ्वीरूपा, कृष्णेन च संनिभा। तथा च नित्यं सर्वपापहरा। अतो मे शान्तिं प्रयच्छ।[२४१]

८. **राहोरायसदानमन्त्रः —**

यस्मादायसकर्माणि तवाधीनानि सर्वदा।

लाङ्गलाद्यायुधादीनि तस्माच्छान्तिं प्रयच्छ मे।।

लाङ्गलाद्यायुधादीन्यायासकर्माणि सर्वदा तवाधीनानि वर्तन्ते। तस्माच्छान्तिं मे प्रयच्छ।[२४२]

---

२३९ व.सं. श्लो. १६२

२४० व.सं. श्लो. १६३

२४१ व.सं. श्लो. १६४

**रत्नदानमन्त्रः**

यस्माद्रत्नप्रदानेन स्वर्गभोगं लभेन्नरः।

तस्मादनेन दानेन स्वर्गभोगश्च मे भवेत्।।

रत्नप्रदानेन मनुजः स्वर्गभोगं प्राप्नोति, अतोऽनेन दानेन स्वर्गभोगश्च मे भवेत्।[२४३]

**भूमिदानमन्त्रः** –

सर्वभूताश्रया भूमिर्वराहेण समुद्धृता।

अनन्तफलदा यस्मादतः शान्तिं प्रयच्छ मे।।

सर्वभूतानामाश्रयरूपा भूमिर्वराहेण समुद्धृता, यस्मात्सानन्तफलदा, अतः मे शान्तिं प्रयच्छ।[२४४]

**छागदानमन्त्रः**

यस्मात्त्वं छाग यज्ञानामङ्गत्वेन व्यवस्थितः।

योनिर्विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे।।

हे छाग, त्वं यज्ञानामङ्गत्वेन व्यवस्थितः,तथा नित्यं विभावसोर्योनिर्भवसि।अतो मे शान्तिं प्रयच्छ।[२४५]

**शय्यादानमन्त्रः** —

यस्मादशून्यं शयनं केशवस्य शिवस्य च।

तथा मे शयनं शश्वद्भवेज्जन्मनि जन्मनि।।

---

२४२ व.सं. श्लो. १६५
२४३ व.सं. श्लो. १६६
२४४ व.सं. श्लो. १६७
२४५ व.सं. श्लो. १६८

यस्मात् केशवस्य, शिवस्य च शयनमशून्यं भवति, तथा जन्मनि जन्मनि शश्वत् शयनं मे भवेत्।[२४६]

**वस्त्रदानमन्त्रः —**

शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम्।

देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे।।

शीतोष्णवातसंत्राणं लज्जाया रक्षणं तथा देहालंकरणं वस्त्रं वर्तते । अतो मे शान्तिं प्रयच्छ।

यावच्छक्त्यावशिष्टब्राह्मणेभ्यो दक्षिणां दद्यात्। तथा च दीनान्धकृपणादिभ्यः किञ्चित् किञ्चित् प्रदापयेत्।[२४७]

**आज्यपात्रपूजनमन्त्रः —**

वन्दे सर्वरसश्रेष्ठ त्वामहं भगवन्नज।

आज्य सुधारूप सर्वश्रेष्ठं कुरुष्व माम्।।

अहं सर्वरसश्रेष्ठ भगवन्नज त्वां वन्दे। हे आज्य, सुधारूप मां सर्वश्रेष्ठं कुरु।[२४८]

**आज्यावेक्षणमन्त्रः —**

या लक्ष्मीर्यच्च मे दौस्थ्यं सर्वमात्रेष्ववस्थितम्।

तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्धय।।

या अलक्ष्मीस्तथा चास्वास्थ्यं सर्वमात्रेष्ववस्थितम् ,तत्सर्वं हे आज्य त्वं शमनं कुरु। लक्ष्मीं पुष्टिं च वर्धय।[२४९]

---

२४६ व.सं. श्लो. १६९

२४७ व.सं. श्लो. १७०,१७१

२४८ व.सं. श्लो. १७२

२४९ व.सं. श्लो. १७३

पुनरग्नि-ग्रह-देवता-पितॄणां तथा च द्विजानामुद्वासनं कृत्वा विप्रान् भोजयेदनन्तरं स्वयं बन्धुभिः सह भुञ्जीत। एतत्प्रकारेण यो मनुजः सम्यग्ग्रहयज्ञं सहैव कुरुते, स सर्वान्कामानवाप्नोति स्वास्थ्यफलं लभेत्।[२५०]

एतत्प्रकारेण स्वजन्मतो मासि मासि बलद्वयं चिन्त्यम्। मुख्यमुभयोः सर्वकामिकमष्टवर्गबलं कथितम्। यथा ग्रहाणां सूर्यः बली, तद्वदष्टवर्गबलं ग्रहाणामुत्कटं बलं कथितम्। अष्टवर्गबलं यत्र तत्र प्रकारत्रयेण बलयुक्तं स्यात्।अतोऽष्टवर्गोत्पन्नत्रिविधबलानां साधनं कुर्यात्। ग्रहेषु विषमस्थेषु यो मनुजः शान्तिं न करोति, सः सर्वसंकटान्, अर्थहानिं, मनस्तापं चाश्नुते।[२५१]

## १.५.८ चन्द्रताराबलाध्यायः

वृद्धवसिष्ठसंहिताग्रन्थे, विंशत्यध्याये, चन्द्रताराबलनामके द्वादश श्लोकाः सम्मिलिताः।

यस्य मनुजस्य वर्षारम्भस्य प्रथमे दिने चन्द्रमाः शुभः स्यात्, स वर्षान्तपर्यन्तं चन्द्रस्य शुभफलं प्राप्नोति। यद्यपि वेधयुक्तोऽपि चन्द्रमाः शुभफलदः स्मृतः। किन्तु यस्य मनुजस्य वर्षारम्भस्य प्रथमे दिने चन्द्रमा अशुभः स्यात्, स वर्षान्तपर्यन्तं चन्द्रस्याशुभफलं प्राप्नोति। यद्ययनस्य- ऋतोः-मासस्य वा प्रथमे दिने चन्द्रबलं ताराबलं वा शुभं, तदा सम्पूर्ण-अयन-ऋतु-मास-पर्यन्तं शुभं स्यात्।[२५२]

---

२५० व.सं. श्लो. १७४,१७५
२५१ व.सं. श्लो. १७६ तः १७९
२५२ व.सं. श्लो. १,२

यस्य मनुजस्य चन्द्रमाः शुक्लपक्षे प्रतिपद्दिने शुभः स्यात्, तदाखिलपक्षस्तस्य शुभदः स्यात्। तथा च कृष्णपक्षे प्रथमे दिने यद्यशुभकार्यं करोति, तथापि तत्पक्षोऽतिशुभदः स्यात्। सितपक्षे जन्म- त्रि- कलत्र- रिपु- द्वितीय- नवम- आय- सुत- दशमे (१,३,७,६,२,९,११,५,१०) चन्द्रमाः शुभावहः। यद्यपि कृष्णपक्षे त्रि-पञ्च-धन-नवमे(३,५,२,९) चन्द्रमा अशुभः कथ्यते।

जन्मनक्षत्रम्-अनुजन्मनक्षत्रं-त्रिजन्मभं समस्तशुभकार्येषु नेष्टम्। सम्पत्तारा शुभदा तथा च विपत्तारा विपत्तिकारका स्यात्। क्षेमतारा क्षेमकरी, प्रत्यरितारा प्रतिकूलफलदा, साधनतारा साधनदा, निधनतारा मनुष्याणां निधनप्रदा, मित्रतारा मैत्रीप्रदा तथातिमैत्रतारा परममैत्रीप्रदा। एवं बलाबलं विचार्य दैवज्ञः सम्यक् कथयेत्। शुक्लपक्षे चन्द्रमा बली स्यात् तथा च कृष्णपक्षे ताराबलं स्यात्। कृष्णपक्षस्य तारकायाः शशिबलवत्प्राधान्यं भवति। अमृतकिरणोद्भवचन्द्रस्य बलं तद्वत्स्यात् तथा चामृतमयकारणेनान्यग्रहाणामपेक्षयाधिकं बलवत् स्यात्। यद्वच्चन्द्रस्य बलं तद्वद् बलानुसारेण समस्तजनाः फलमवाप्नुवन्ति। अतः समस्तप्राणिनां कृते चन्द्रस्य गुणरूपमहिमा कथयेत्। यद्वदखिलमृगाणां मध्ये मृगेन्द्रो बली स्यात्, तद्वत्समस्तग्रहाणां मध्ये चन्द्रबलस्य प्रधानता ज्ञेया। यदि चन्द्रमा बली, तदा समस्तग्रहाः नित्यं बलिनो भवन्ति। अत्यधिकचन्द्रबलेन ग्रहा अधिकबलवन्तः, तथा च निर्बलेन ताराग्रहोत्पन्नं सम्पूर्णफलं विजानीयात्।[२५३]

## १.५.९ उपग्रहाध्यायः

वृद्धवसिष्ठसंहिताग्रन्थ एकविंशत्यध्याय उपग्रहनामके दश श्लोकाः सम्मिलिताः।

---

२५३ व.सं. श्लो. ३ तः १२

सूर्यनक्षत्रात् सप्तमनक्षत्रं भूकम्पसंज्ञकं, पञ्चमनक्षत्रमतिविद्युत्संज्ञकम्, अष्टमनक्षत्रं शूलनाम्नोपग्रहसंज्ञकं तथा च दशमनक्षत्रमशनिसंज्ञकं विज्ञेयम्।[२५४]

SMT. HANSA MEHTA LIBRARY • The M. S. University of Baroda

सूर्यनक्षत्रादष्टादशं नक्षत्रं केतुसंज्ञकमुपग्रहदोषवत् तथा च पञ्चदशं नक्षत्रं दण्डसंज्ञकं स्यात्। सूर्यनक्षत्रादेकोनविंशं नक्षत्रमुल्कासंज्ञकस्तथा च चतुर्दशं नक्षत्रं पातसंज्ञकमुपग्रहः स्यात्।

मेघोपग्रहदोषः, निर्घातः, कम्पसंज्ञकः, वज्रनिभः- एत एकोत्तरविंशति -उपग्रहाः क्रमशः सूर्यनक्षत्राद् गणनीयाः। यत्समये चन्द्रमा उपग्रहसंज्ञकनक्षत्रेण युतस्तत्समये कृतं कार्यं नृणां मृत्युदम्। अतो विवाहादिकार्येषु लग्नादिकं विचार्य बुद्धिमान् सम्यग्वदेत्।[२५५]

सूर्यनक्षत्राद् आश्लेषा-मघा-अनुराधा-चित्रा-श्रवण-रेवतीनक्षत्राणि गणनीयानि। पातदोषः, चण्डीश एवं चण्डायुधसंज्ञकः-एते दुष्टयोगा ज्ञेयाः। एते योगा अखिलेषु मङ्गलेषु कार्येषु कर्तुर्विनाशदा अतस्त्याज्याः।[२५६]

अश्विनी-मृगशीर्ष-आश्लेषा-हस्त-अनुराधा-उत्तराषाढा-पूर्वाषाढा-एतेषु नक्षत्रेषु क्रमेण रविवारादिष्वानन्दादिक्रमेण योगाः स्युः। एतेषां योगानां नामानि क्रमेण -आनन्द-कालदण्ड-धूम्र-प्रजापति-सौम्य-ध्वाङ्क्ष-ध्वज-श्रीवत्स-वज्र-मुद्गर-छत्र-मित्र-मानस-पद्म -लम्बक-उत्पात- मृत्यु- काण- सिद्धि- शुभ- अमृत- मुशल- गदा- मातङ्ग- राक्षस- चर- स्थिर-प्रवर्धमानसंज्ञकाः-एतेऽष्टाविंशतियोगाः स्वनामसदृशफलदाः स्युः।[२५७]

---

२५४ व.सं. श्लो. १

२५५ व.सं. श्लो. २ तः ४

२५६ व.सं. श्लो. ५,६

२५७ व.सं. श्लो. ७ तः १०

## १.५.१० ग्रहकूटाध्यायः

अथ वृद्धवसिष्ठसंहिताग्रन्थे, द्वाविंशत्यध्याये, ग्रहकूटनामके चतुर्दश श्लोकाः सम्मिलिताः।

समस्तप्राणिनां शुभाशुभं ग्रहकूटनक्षत्राधारेण भवति। अतो ग्रहकूटविधानं सम्यक् कथयेत्।[२५८]

ग्रहाणां स्पष्टमानं कृत्वा, ८०० द्वारा भाजिता या लब्धिः सा गतनक्षत्रं ज्ञेयम्। तथा च अवशिष्टं वर्तमाननक्षत्रं ज्ञेयम्। गतगम्यषष्टिहतं भुक्तिहृतं घट्यादिना प्राप्नोति। पश्चाद् ग्रहाणामधिष्ठितग्रहाणि ज्ञात्वा सर्वं विचिन्तयेत्।[२५९]

यस्य मनुजस्य जन्मनक्षत्रं क्रूरग्रहैर्निपीडितं, तदा सोऽत्यन्तदुःख-रोग-शोक-भय-प्रवास-शत्रुभयादीनि फलानि प्राप्नोति।[२६०]

यस्मिन्नक्षत्रे(जन्मनक्षत्रे) विपत्तितारा प्रत्यरितारा वा भवेत्, तस्य मनुजस्य स्थाननाशो भवेत्। निधनतारायां मृत्युस्तथा च वधतारायां बन्धनं स्यात्। सा यदि शुभग्रहाणां नक्षत्रेषु स्थिता, तदा स्वल्पा हानिर्भवेत्। सौम्या मध्यमफलदाः, किन्तु पापग्रहा अनुक्तनक्षत्रेषु भीतिकराः स्युः।[२६१]

यस्मिन्नक्षत्रे यस्य नरस्य जन्म, तन्नक्षत्रं तस्य जन्मनक्षत्रम्, दशमनक्षत्रं कर्मसंज्ञकं तथा च षोडशनक्षत्रं संघाताख्यं ज्ञेयम्। जन्मनक्षत्रतो द्वितीयं नवमं नक्षत्रं च समुदायसंज्ञकम्, त्रयोविंशतिनक्षत्रं विनाशसंज्ञकं तथा च पञ्चविंशं नक्षत्रं मानसंज्ञं तथा महादुष्टं स्यात्। एतानि षण्नक्षत्राणि समस्तप्राणिनां शुभकार्याणि विनाशयन्ति। विशेषतो नृपाणां देशजं नक्षत्रं

---

२५८ व.सं. श्लो. १
२५९ व.सं. श्लो. २,३
२६० व.सं. श्लो. ४
२६१ व.सं. श्लो. ५,६

पट्टबन्धनादिना नष्टं भवति।[२६२]

जन्मनक्षत्रतो नवमनक्षत्रं नृपाणां सर्वकार्याणि विनाशयति। अत एव सम्पूर्णविषये सर्वदा वर्जयेत्। जन्मनक्षत्रे कार्यं कृत्वा विनाशमायाति। कर्मसंज्ञकनक्षत्रे कार्यं कृत्वा कर्मविनाशमेवं संघातसंज्ञकनक्षत्रे कार्यं कृत्वा शरीरनाशः, समुदायसंज्ञकनक्षत्रे रोगभयं, वैनाशिकनक्षत्रे नाशः, मानससंज्ञकनक्षत्रे हृदयरोगस्तथा देशजनक्षत्रे राजपीडा स्यात्। जातिसंज्ञकनक्षत्रे जातिभयम्, अभिषेकसंज्ञकनक्षत्रे नृपस्य नाशो भवेत्। क्रूरग्रहैर्हतं सम्पूर्णनक्षत्रे प्रभूतपीडा स्यात्।[२६३]

ग्रहयज्ञैरभिषेकैर्होमैर्दानैस्तेषां शमनं भवेत्। यस्य जन्मनक्षत्रे ग्रहणोत्पाता भवन्ति, तस्याप्येवमेव शमनं भवति।[२६४]

## १.५.११ लग्नबलाध्यायः

अथ वृद्धवसिष्ठसंहिताग्रन्थे, त्रयोविंशत्यध्याये, लग्नबलनामके सप्तचत्वारिंशत्(४७) श्लोकाः सम्मिलिताः। मेषादिषु द्वादशलग्नेषु कानि कानि कार्याणि कर्तव्यानि, एतद्विषये विचारः।

१. मेषलग्ने — अभिषेककर्म – नृपतीनां साहसकर्मादि, वैरोधं, धातुसम्बन्धितखातादिः, सम्पूर्णवाद्यादिकार्यं कारयेत्।

२. वृषभलग्ने — स्थिर–चरकार्याणि, सम्पूर्णविवाहादिकं, वास्त्वादिकन्यकावरणं, सम्पूर्णक्षेत्रारम्भकार्यं तथा च भूषणशिल्पादिकार्यं कारयेत्।

---

२६२ व.सं. श्लो. ७,८,९

२६३ व.सं. श्लो. १० तः १३

२६४ व.सं. श्लो. १४

३. मिथुनलग्ने — मेषवृषोक्तकर्म तथा च गजाश्वोष्ट्रादिकं, गोकर्म, अविकलमहिषमेषक्षितिपतिसेवादिकं कार्यं कारयेत्।

४. कर्कलग्ने —शान्तिकपौष्टिकमङ्गलकार्यं जल-बन्धन-मोक्षादिसमस्तजलकर्म, दैविककार्यं कूपतडागादिशिल्पकर्म, यानादिकार्यं कारयेत्।

५. सिंहलग्ने —परयोगो नृपसेवा, कृषिकर्म,वणिक्कार्यं,महायुद्धं, सम्पूर्णवाद्यादिसम्बन्धिकार्यं, वेश्मशिल्पादिकार्यं कारयेत्।

६. कन्यालग्ने — आभूषणसम्बन्धिकार्यं माङ्गलिकम्, औषध-विज्ञान-पुण्यशिल्पादिकार्यं, विवाहः, शान्तिकर्म, गजाश्वोष्ट्रादिकार्यं कारयेत्।

७. तुलालग्ने — कन्योक्ताखिलकार्यं, भाण्डकर्माणि, वणिक्कर्म, कृषिकर्म, यात्रावास्तुविधानकार्यं कारयेत्।

८. वृश्चिकलग्ने — साहसकार्यं, चित्रलेखनं,वास्तुकर्म, उग्रशास्त्रादिकर्म, कृषि-वाणिज्य-क्षितिपतिवादः- एतानि कार्याणि कारयेत्।

९. धनुलग्ने — शान्तिक-पौष्टिककर्म, शिल्पादिकर्म, अश्वादिसन्धानं, नृत्यगीतादिकं, समस्तराजोपकरणं, सेवाभूषण-वास्त्वादिकार्यं कारयेत्।

१० मकरलग्ने —- जलमोचनबन्धनं, भूषणरत्नादिशिल्पधान्यादिकर्म, सम्पूर्णक्रयविक्रयं रिपुहननम्, उद्योगादिकार्यं कारयेत्।

११ कुम्भलग्ने — युद्धोपकरणं, भूषणं, जलधान्यशिल्पादिकार्यं, गोधनादिकं, पुण्यासवं, पुरनगरप्रवेशादिकार्यं कारयेत्।

१२. मीनलग्ने — जलयात्रा, जलबन्धनमोचनकार्यं, रत्नभूषणादिकार्यं, रथाश्वगजादिपशूनां कार्यं तथा च शिल्पादिकर्म कारयेत्।

एतान्मेषादिद्वादशराशीनामुक्तलग्नफलं भवति, यदि राशयः पापयुतेक्षितरहिताः स्युः। यदि नो चेत्, तर्ह्युक्तफलं दातुं न शक्नुवन्ति। सर्वत्रैवादौ सम्पूर्णफलं, मध्ये मध्यमफलं तथा चान्ते तुच्छफलमिति बुद्धिमान् विचिन्तयेत्। त्रिंशद्भागं लग्नं, तस्यार्धभागे होरा- इति संज्ञा कथ्यते। लग्नतृतीयो भागो द्रेष्काणः। तथा च नवमभागो नवमांशः - इति कथ्यते। लग्नस्य द्वादशभागो द्वादशांशाः, स्त्रिंशत्तमभागस्त्रिंशांशः- इति कथ्यते। एतानि लग्न-होरा-द्रेष्काण-नवमांश-द्वादशांश-त्रिंशांशानि षड्वर्गाणि कथ्यन्ते। तेषु यदि शुभग्रहास्तदा शुभफलमाप्नोति। तथा च यदि पापग्रहास्तदाशुभफलमाप्नोति। अतः सदैव शुभकर्मणि शुभषड्वर्गो ग्राह्यस्तथा पापग्रहोत्पन्नः षड्वर्गः संत्याज्यः।[२६५]

धनु-मिथुन-तुला-वृष-कर्क-कन्या-मीनराशयः सदैव शुभफलदाः। तथा च मेष-सिंह-वृश्चिक-मकर- कुम्भ-एताः पञ्च राशयोऽशुभफलदाः स्युः। स्थिरराशौ लग्ने, शुभवर्गे, अष्टमस्थानशुद्धे, चतुष्टये सौम्ये तथा च द्विपदगृहे लग्नगते वास्तुनिवेशः शुभः कथ्यते। चरे न शुभः स्यात्। शुभग्रहेषु कुम्भराशिं विहाय स्थितत्वे धनलाभो भवति। तथा च यदि लग्नगतशुभग्रहाणां मध्ये शुक्रचन्द्रयोर्योगो भवेत्, लग्नं यद्यशुभग्रहेण न युतं, तदा वणिक्कर्म कुर्यात् , शुभावहम्। नवम-पञ्चम-अष्टमस्थाने चरराशिवर्गः स्यात्, तदा धनसंग्रहः कार्यः। किन्तु तत्र यदि बुधो भौमो वा लग्नतो दशमस्थाने स्थितः, तदा चौर्यस्य मुख्यकालः स्यात्। शुभलग्ने, दशम-एकादशस्थाने वर्गे वा सूर्यः, भौमो वा संस्थितः, तदायुधविद्या, नृपसेवाकार्यं, तथा च वैरिनिग्रहकार्यं कुर्यात्। लग्ने यदि शुभग्रहो वर्गे वाष्टमस्थाने शुद्धो वा, तदा पशुसंग्रहणं, रक्षावृद्धिः- एतानि कार्याणि कुर्यात्। पुंजन्मकथितलग्ने बलयुक्ते, दुर्बले वा शुक्रे, पुत्रमिच्छन् मनुजः प्रियपत्नीं कामयेत्। पुंजन्मकथितयोगे बलयुक्तयोर्गुरु-शुक्रयोर्नवमे पञ्चमे लग्नस्थाने वा संस्थिते, तदा पुत्रमिच्छन् मनुजः प्रसन्नो प्रेयसीं समुपेयात्।

---

२६५ व.सं. श्लो. १ तः १७

बलयुक्तैरन्यशुभग्रहैः, स्थिरलग्ने, अष्टमस्थानसंशुद्धे, शुभग्रहाणां युते, नूतनगृहे प्रवेशकार्यं कर्तव्यम्। धनु-मीन-लग्ने चतुर्थस्थाने गुरौ, दशमस्थाने वा संस्थिते, तदा रविवासरे सुकृतवृद्ध्यर्थेऽखिलमभिचारकर्म कारयेत्।[२६६]

उत्तरायणे, पूर्णेन्दौ, जीवे वा सूर्ये दशमस्थाने संस्थिते, तत्समये, शुक्रवासरे नृपतीनामभिषेकादिकार्यं कारयेत्। लग्ने चन्द्रमास्तथा च केन्द्रे गुरुः संस्थितः, तत्समये, सोमवासरे, शुक्रवासरे वा रससंग्रहणं, सस्यादिनिखिलजलकर्म कारयेत्। लग्ने गुरौ तथा च दशमस्थाने निर्बलक्रूरग्रहे संस्थिते, प्रवज्यानामकयोगः कथ्यते। तत्र ज्ञानग्रहणं मुमुक्षुभिः कर्तव्यम्। मिथुन – कन्या – राशिगते चन्द्रे तथा चान्यशुभग्रहे, शुभग्रहाणां वर्गे संस्थिते, तदा ज्ञानग्रहणं कर्तव्यम्। केन्द्रे त्रिकोणे शुभग्रहैः संस्थिते, तथा चन्द्रे लग्नाष्टषष्ठद्वादशस्थानानि विहाय संस्थिते, तदाखिलानि शुभकर्माणि कारयेत्।[२६७]

बली बुधः, गुरुः, चन्द्रमा वा नवमस्थाने, लग्नस्थाने वर्गे वा संस्थितः, तदा सदैव शिल्पारम्भः प्रशस्तः। उत्तरायणे, बुधेन, गुरुणा वा दृष्टश्चन्द्रमा मिथुने कन्यायां वा राशौ संस्थितः, तथा च चतुर्थस्थाने शुभग्रहाः स्थितास्तदा नाट्यारम्भः प्रशस्तः। लग्ने कुम्भराशिं विहायान्यराशेश्चन्द्रमाः स्थितः, केन्द्रे त्रिकोणे शुभग्रहाः संस्थिता वा, तदा सदैव पण्यकर्म लाभदं भवति। षष्ठाष्टसप्तमद्वादशस्थाने संशुद्धे तथा च बली शुभग्रहैर्युते वरसिद्धामृतयोगो भवति। तस्मिन् योग औषधसेवा सदा सुवीर्यदा भवति। मित्रराशौ स्थितो गुरुर्नवमे द्वादशस्थाने वा स्थितस्तथा च पक्षमध्यतिथौ, तैतिलकरणे शुक्रेण युतो दृष्टो वा, तदा सन्धिः कार्या। यदि चन्द्रमा अशुभग्रहाणां वर्गे युतो दृष्टो वा, बली बुधः षष्ठाष्टलग्नस्थाने वा संस्थितस्तथा च

---

२६६ व.सं. श्लो. १८ तः २७
२६७ व.सं. श्लो. २८ तः ३२

विष्टियोगः, तदाभिचारकर्म कारयेत्। उपचयस्थान(३,६,१०,११)-लग्न-अष्टम-द्वादशस्थानं संशुद्धं तथा चोपचयस्थाने चन्द्रमाः संस्थितः, तदाखिलमङ्गलकार्याणि कारयेत्। बली शुक्रश्चन्द्रमा वा शनि-सूर्य-भौमेन बलहीनः, तथा च चन्द्रमा लाभस्थाने तथा लग्ने गुरुः संस्थितस्तदा कृषिकर्म कारयेत्। तृतीय-षष्ठ-एकादशस्थानेषु पापग्रहाः स्थिताः, तथा केन्द्रे त्रिकोणे शुभग्रहाः स्थिताः, तदा बीजवपननक्षत्रेषु बीजवपनकार्याणि कर्तव्यानि। शुक्रवासरे शुक्रवर्गे गुरुचन्द्रयोर्योगे निखिलं शय्यासनयुवतिजनशस्त्राभरणानुलेपनादिकार्यं कर्तव्यम्। सूर्यसुतलग्ने-मकरे कुम्भे वा लग्ने महिषखरभेकाणां दासकर्मादिकार्याणि कारयेत्। शुभलग्ने शुभकार्यं तथा चाशुभलग्नेऽशुभकार्यं कर्तव्यम्। अष्टमे द्वादशस्थाने संस्थिताः सौम्य(शुभ)ग्रहाः प्रायेणाशुभफलदाः स्युः। इतरे ग्रहाः केन्द्रस्थाने स्थिता अशुभफलप्रदाः। तत्राष्टमस्थाने शुभग्रहेण युतश्चन्द्रमा मृत्युफलदः। समस्तकार्येष्वादौ चन्द्रबलविचारः कर्तव्यः। पश्चादन्येषां ग्रहाणां बलाबलविचारः कार्यः। बलयुक्तचन्द्रकारणेन समस्तग्रहा बलिनो भवन्ति। आधारं चन्द्रस्य बलं तथा चाधेयमन्येषां ग्रहाणां ज्ञेयम्।[२६८]

## १.५.१२ गुणनिरूपणाध्यायः

वृद्धवसिष्ठसंहिताग्रन्थव एकचत्वारिंशदध्याये, गुणनिरूपणनामकेऽध्याये द्विपञ्चाशत्(५२) श्लोकाः सम्मिलिताः।

काल एवेश्वरः कालः साक्षादीश्वरः। ज्ञानी काल एवेश्वरः कालज्ञाता स्यात्। तस्मात्कालं योगिनोऽपि महीतले न जानन्ति। अतो मनुष्याणां हितार्थे ब्रह्मणा कालविषय उक्तम्। परमात्मनः भचक्रभ्रमणात् भग्रहैः प्राणादिदिनमासादियुगान्तानां स्थूलादिकालपरिमाणान् कल्पयेत्। तत्र शुभाशुभग्रहाणां, पञ्चाङ्गतिथिवारोत्पन्नः, उत्पातः,

२६८ व.सं. श्लो. ३३ तः ४७

तिथिनक्षत्रवारोत्थवारनक्षत्रपूर्वकैः, एवं गुणदोषैर्नित्यं समन्वितं कालः। तस्मात्कालगुणा दोषाश्च पृथक् पृथक् कथिताः।[२६९]

**तिथिनक्षत्रोत्पन्नयोगेन शुभाशुभयोगफलम् —**

नन्दातिथिषु(१,६,११ तिथिषु), पूर्वाषाढा-ज्येष्ठा-कृत्तिका-आर्द्रा-श्रवण-उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा- एतेषु नक्षत्रेषु वारयोगेषु (शुभवारयोगेषु) कृतं कार्यं शुभप्रदं स्यात्। भद्रातिथिषु (२,७, १२ तिथिषु), पुनर्वसु-मूल-पुष्य-रोहिणीनक्षत्राणि- एते योगाः श्रेष्ठयोगाः, सर्वदा कल्याणप्रदा भवन्ति। जयातिथिषु (३, ८, १३ तिथिषु), धनिष्ठा-मृगशीर्ष-हस्त-अश्विनी-रेवती-पुष्य-उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा एतानि नक्षत्राणि, एतेषु शुभयोगेषु कृतं मङ्गलकार्यं सर्वदा कल्याणप्रदं भवति। रिक्तातिथिषु (४, ९ १४ तिथिषु), पुष्य-विशाखा-ज्येष्ठा-आश्लेषा-स्वाती- एतानि नक्षत्राणि, एते योगाः कल्याणयोगाः, सर्वकार्येषु शुभं कुर्वन्ति। पूर्णातिथिषु (५, १० १५ तिथिषु), पुष्य-रेवती-अश्विनी-धनिष्ठा-शतभिषानक्षत्राणि, एते योगा वर्धमानयोगाः शुभकार्येषु वृद्धिप्रदाः।[२७०]

**नक्षत्रवारोत्पन्नयोगेन शुभाशुभफलम् —**

रविवासरे उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-रेवती-पुष्य-मूल-हस्त-चित्रा-आश्लेषा-ज्येष्ठा-विशाखानक्षत्राणि वा स्युस्तदा सौम्ययोगः कथ्यते। (सः शुभकार्येषूत्तमः)। सोमवासरे यदि पुनर्वसु-स्वाती-श्रवण-धनिष्ठा-शतभिषा-रोहिणी-मृगशीर्ष-ज्येष्ठा-पुष्यनक्षत्राणि स्युः , तदा महायोगः कथ्यते। भौमवासरे यदि उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-रेवती-मृगशीर्ष-पुष्य-अनुराधा-अश्विनी-कृत्तिकानक्षत्राणि स्युः, तदा पूर्णयोगः

---

२६९ व.सं. श्लो. १ तः ५

२७० व.सं. श्लो. ६ तः १०

प्रकीर्तितः। बुधवासरे यदि मूल-पुष्य-मृगशीर्ष-रोहिणी-कृत्तिका-उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-हस्त-चित्रा-स्वाती-पूर्वाषाढानक्षत्राणि स्युः, तदा शङ्खयोगः प्रकीर्तितः। गुरुवासरे यदि पुनर्वसु-पुष्य-हस्त-चित्रा-स्वाती-अनुराधा-रेवती-श्रवण-धनिष्ठा-शतभिषानक्षत्राणि स्युः, तदामृतसंज्ञकः प्रकीर्तितः। शुक्रवासरे यदि रेवती-अश्विनी-हस्त-मृगशीर्ष-रोहिणी-अनुराधा-उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदानक्षत्राणि स्युः, तदा पद्मयोगः प्रकीर्तितः।

शनिवासरे यदि रोहिणी-मृगशीर्ष-पुष्य-ज्येष्ठा-श्रवण-धनिष्ठा-शतभिषा-मघा-उत्तराफाल्गुनी -उत्तराषाढा-उत्तराभाद्रपदानक्षत्राणि स्युः, तदानन्दसंज्ञकयोगः प्रकीर्तितः।[२७१] हस्त-मृगशीर्ष-अश्विनी-अनुराधा-पुष्य-रेवती-रोहिणीनक्षत्राणि क्रमेण रविवारादिषु सप्तवारेषु स्थितानि, तदा सिद्धिनाम्ना योगो भवेत्। मूल-श्रवण-उत्तराभाद्रपदा-कृत्तिका-रोहिणी-मृगशीर्ष-पूर्वाफाल्गुनी-पूर्वाषाढा - एतानि नक्षत्राणि क्रमेण रविवासरादिषु स्थितानि, तदा एतद् योगेन पीयूषयोगः प्रकीर्तितः। यदि गुरुर्लग्ने, परमोच्चगतः स्थितः, लग्नं निरीक्ष्येत् वा तदा सर्वयोगेषु श्रेष्ठः समुद्रयोगो भवति। यदि बली गुरुर्लग्ने स्थितः, लग्नं विलोकयेद् वा, अधिमित्रगृहे संस्थितः वा, तदा वापीयोगः कथ्यते। यदि गुरुर्लग्ने संस्थितः, स्वाधिमित्रस्य भागे संस्थितः, लग्नं विलोकयेद् वा, तदा मुसलयोगः प्रकीर्तितः। मित्रराशिगृहे स्थितो गुरुर्यदि लग्ने संस्थितः, लग्नं पश्येद् वा तदा वियन्नाम्ना योगो ब्रह्मणोक्तः। यदि गुरुर्बली स्वलग्नस्थो लग्नं पश्येद् वा, तदा पुण्डरीकनामा महायोगः सर्वदा योगनायक उक्तः। शुभवर्गे स्थितो गुरुर्यदि सुबली, शुभग्रहैर्दृष्टः, अथवा केवलं बली, तदा गुणशेखरसंज्ञकयोगः प्रकीर्तितः। एतत्प्रकारेण बुधशुक्रावपि योगकारकौ स्याताम्। स्ववर्गोत्तमे यदि बली गुरुः-शुक्रः-चन्द्रो वा संस्थितः, तदा गुणधूर्जटीसंज्ञकयोगः प्रकीर्तितः। यदि बली शुभग्रहः केन्द्रे, एकादशस्थाने वा

२७१ व.सं. श्लो. ११ तः १७

स्थितः, तदा गुणभास्करसंज्ञकयोगः प्रकीर्तितः। यदि शुभग्रहाः केन्द्र–त्रिकोणे स्थिताः, बलिनो द्वि–त्रिस्थानगताः; तदा गुणकौस्तुभसंज्ञकयोगः कथ्यते। यदि बली चन्द्रः स्ववर्गोत्तमे स्थितः, शुभग्रहदृष्टो वा, तथैव बली लग्नगतो वा, तदा सम्पूर्णगुणश्रेष्ठश्चन्द्रशेखरो नाम योगः प्रकीर्तितः। यदि बलिनः पापग्रहास्त्रि–षष्ठ–लाभस्थाने स्थिताः, शुभग्रहैर्दृष्टः, तदा सम्पूर्णयोगानां स्वामी श्रेष्ठः श्रीवत्सनाम्ना योगः प्रकीर्तितः। उच्चस्थ उच्चांशसंस्थितो वा सूर्यः – मेषराशिगतसूर्य एकादश–षष्ठ–तृतीयस्थाने स्थितः, तदा सिंहनामा योगः ख्यातः। यदि स्वाधिमित्रे / मित्रराशौ (कोऽपि ग्रहः) स्थितः, तदा ब्रह्मणा कथितो गुणशार्दूलसंज्ञकयोगः प्रकीर्तितः। यदि स्वोच्चराशौ स्थितो भौमस्तृतीये–षष्ठे–एकादशे वा स्थाने स्थितः, शुभग्रहैर्दृष्टः, तदा गुणानामिन्द्रसंज्ञको योगः प्रकीर्तितः। यदि स्वोच्चराशिस्थितः शनिस्तृतीये–षष्ठे–एकादशे वा स्थाने स्थितः, शुभग्रहेण दृष्टस्तदा रत्नमालिका नाम योगः प्रकीर्तितः। स्वाधिमित्रे, स्वराशौ, मित्रराशौ वा गृहे शनिरेवं भौमः स्थितः, तदा गुणेषु मकरतो भुवि ख्यातः। स्वोच्चराशौ गतश्चन्द्रमा लाभस्थाने स्थितः, अधिमित्रगृहे वा स्थितः, चन्द्रमा गुणेषु निर्मलो मणिरित्युक्तः। यदि सूर्यचन्द्रौ केवलं लाभस्थाने गतौ, तदा गुणार्णवनाममहायोगे जना इच्छितां सिद्धमाप्नुवन्ति। नवमे दशमे तृतीये द्वितीये वा स्थाने, यदि चन्द्रमाः स्थितः, तदा सुदर्शननामा महायोगो दोषासुरविनाशनः स्यात्। यदि सूर्यश्चन्द्रो वाऽप्येको लाभस्थाने संस्थितः, बली चेत्, तदा गुणसागरनामा योगः प्रकीर्तितः। यदि लग्नतः पञ्चमस्थाने चन्द्रमाः स्ववर्गे स्थितः, तदा पुण्ययोगो विज्ञेयः। बुधस्य गुरोर्वा कारणेनाप्युक्तयोगो भवति।[२७२]

यदि भौमवासरे, रविवासरे वा नन्दातिथिः, शुक्रवासरे, सोमवासरे वा भद्रातिथिः, बुधवासरे जयातिथिः, गुरुवासरे रिक्तातिथिः, तथा च मन्दवासरे पूर्णातिथिर्भवेत्, तदामृतनामा

---

२७२ व.सं. श्लो. १८ तः ४२

शुभयोगः कथितः। शुक्र-बुध-मङ्गल-शनि-गुरुवासरा यदि क्रमेण नन्दादितिथिभिर्युक्ताः, तदा सिद्धा तिथिः प्रकीर्तिता। एतद्योगेन सर्वकालेषु सर्वदा सिद्धिं प्राप्नोति।[२७३]

यदि पुष्यनक्षत्रस्य प्रथम एवं द्वितीये वा चरणे यदि चन्द्रगुरौ संस्थितौ, तदा विजयनामा योगः सदैव युद्धे विजयप्रदः। एकोऽपि बृहस्पतिः परमोच्चगतस्तत्र बुधः शुक्रो वा स्थितः, तदा ब्रह्मदण्डनामा महायोगः सर्वदोषविनाशकृत् स्यात्। स्वोच्चांशे स्थिताः शुभग्रहाः, कस्मिन्नपि राशौ स्थितश्चन्द्र उच्चांशे वृषभराशौ स्थितस्तदा कामधेनुनामा योगः प्रकीर्तितः। यदि मूलत्रिकोणराशिगताः, मूलत्रिकोणांशे स्थिताः शुभग्रहाः, चन्द्रकारणेन प्रभञ्जननामा योगः ख्यातः। तृतीये-षष्ठे-एकादशे वा स्थाने, मूलत्रिकोणे तदंशे वा (त्रिकोणांशे) स्थिताः पापग्रहास्तत्कारणाद् इन्द्रदण्डनामा महायोगः ख्यातः। शुभांशे स्थितश्चन्द्रमा यदि शुभग्रहेण दृष्टस्तदा रुद्रदण्डनामा महायोगः, सर्वेषां दोषाणां नाशकः। दिनस्य मुहूर्तेष्वष्टममुहूर्तोऽभिजित्संज्ञको मुहूर्तो रवौ मध्यंदिनगते भवति। स गुणानामधिपः ख्यातः।[२७४] एत उपर्युक्ताः सर्वे योगाः ब्रह्मणोक्ताः।

### १.५.१३ दोषनिरूपणाध्यायः

अथ वृद्धवसिष्ठसंहिताग्रन्थे द्विचत्वारिंशदध्याये, दोषनिरूपणनामक एकशतमष्टचत्वारिंशत्(१४८) श्लोकाः सम्मिलिताः।

यदि रविवारादिषु क्रमात् विशाखा-पूर्वाषाढा(जल)-धनिष्ठा-रेवती-रोहिणी-पुष्य-उत्तराफाल्गुनीनक्षत्राणि स्युः, तदोत्पातयोगो विज्ञेयः। यदि रविवारादिषु क्रमेण अनुराधा-उत्तराषाढा-पूर्वाषाढा-स्वाती-मृगशीर्ष-आश्लेषा-हस्तनक्षत्राणि स्युः, तदा मृत्युकारको

---

२७३ व.सं. श्लो. ४३,४४

२७४ व.सं. श्लो. ४५ तः ५२

मृत्युयोगो भवति। रोहिणी–पुष्य–उत्तराफाल्गुनी–विशाखा–श्रवण–धनिष्ठा–रेवतीनक्षत्राणि नन्दादितिथिषु रविवारादिषु तदा एतैर्योगैरन्धसंज्ञकयोगः प्रकीर्तितः। रोहिणी–पुष्य–उत्तराफाल्गुनी–विशाखा–श्रवण–धनिष्ठा–रेवतीनक्षत्रेषु, नन्दादितिथिषु रविवारादिषु – एतैर्योगैरन्धसंज्ञकयोगः प्रकीर्तितः। आर्द्रा–आश्लेषा–पूर्वाषाढा–मूल–मघा–पूर्वाफाल्गुनी–कृत्तिकानक्षत्रेषु, भद्रादितिथिषु रविवारादिषु –एतैर्योगैः काणयोगः प्रकीर्तितः। विशाखा–आर्द्रा–मूल–ज्येष्ठा–पूर्वाषाढा–उत्तराषाढा–मघानक्षत्रेषु, जयादितिथिषु, रविवारादिषु–एतैर्योगः पङ्गुयोगः प्रकीर्तितः। पूर्वाभाद्रपदा–मघा–कृत्तिका–आर्द्रा–चित्रा–अनुराधा–धनिष्ठानक्षत्रेषु, रिक्तादितिथिषु रविवारादिषु –एतैर्योगैर्बधिरसंज्ञकयोगः प्रकीर्तितः। विवाहादिसर्वेषु मङ्गलकार्येष्वेते षड्विधा योगा निन्दिताः स्युः। एते योगाः स्वनामसदृशफलदाः स्युः। द्वादशी–एकादशी–पञ्चमी–तृतीया–षष्ठी–अष्टमी–नवम्यादितिथयः क्रमेण रविवासरादिषु दग्धयोगः कथितः। भरणी–चित्रा–उत्तराषाढा–धनिष्ठा–उत्तराफाल्गुनी–ज्येष्ठा–रेवतीनक्षत्रेषु रविवासरादिषु क्रमेण सूर्यादिग्रहाणां जन्मनक्षत्रं विजानीयात्। योगद्वये कृतं कार्यं नष्टं भवति। अत एते योगाः सदैव मङ्गलादिकार्येषु वर्जयेत्।[२७५]

भौमशन्योः सप्तमीषष्ठीतिथिदिने, चन्द्रमास्तथा सूर्यश्चतुर्थीदिने, बुधो द्वितीयातिथिदिने, गुरुरष्टमीतिथिदिने तथा शुक्रो नवमीतिथिदिने स्यात्, एते योगा चिकित्सारोगे तथा मङ्गलकार्येषु निन्दिताः कथिताः। एते योगा भगन्दराश्मरीकुष्ठक्षयरोगप्रदायकाः। यदि लग्नतः षष्ठाष्टमे स्थाने चन्द्रमाः, गुरुर्वा स्थितः, तथा शनिः पञ्चमस्थाने स्थितः, भौमोऽष्टमस्थाने, सूर्यो द्वादशस्थाने, बुधोऽष्टमस्थाने, शुक्रः सप्तमस्थाने स्थितः, तदा निखिलनृणां मृत्युयोगो

२७५ व.सं. श्लो. १ त:१०

भवति। यो मङ्गलकार्येष्वयोग्य एवं मृत्युप्रदः, अतो दावाग्निरूपः, अयं योगस्त्याज्यः कथितः।[२७६]

यदि सोमभौमवासरयोः सप्तषष्ठ्यादितिथयो भवन्ति, तदाग्निजिह्वासप्तयोगः सदैव मङ्गलकार्येषु कुलनाशं करोति। यदि एता तिथयो रविवारादियुक्ताः, तदा विषयोगः कालकूटविषोपमः ख्यातः। नक्षत्रान्ते घटिकाद्वयं, मासान्ते दिनत्रयं, वर्षान्ते पक्षं तथा च ग्रहणे दिनसप्तकं वर्जयेत्। नक्षत्रान्ते पुत्रनाशः, मासान्ते धनक्षयः, वर्षान्ते वर्गक्षयस्तथा च ग्रहणे सर्वनाशः स्यात्। स भूकम्पादिरुत्पातस्य पश्चाद् दोषो भवति, न तु पूर्वे।

यथा गृहदाहादयो दोषा दहनात्परं स्युः।[२७७]

यदि बुधवासरे प्रतिपत्तिथिः, रविवासरे सप्तमी तिथिः, तदा महाशूलनामा सर्वकार्येषु वर्जनीयो योगः कथ्यते। पूर्वाफाल्गुनी-पूर्वाषाढा-पूर्वाभाद्रपदा-कृत्तिका-आर्द्रा-आश्लेषा-भरणी-ज्येष्ठानक्षत्राणि पापवारेषु दुष्टयोगः कथितः। दुष्टयोगे कृतं कर्म अचिरादेव नष्टं भवति, अतः प्रयत्नतः शुभकार्येषु तं वर्जयेत्।[२७८]

गुरोः स्थानतश्चन्द्रमा यदि अष्टमे-द्वादशे-षष्ठे वा स्थाने स्थितः, तदा संकटनामा योगः सदैव शुभकार्येषु निधनप्रदः स्यात्। भरणी-अनुराधा-पुनर्वसु-पूर्वाभाद्रपदा-आर्द्रा-चित्रा-श्रवणनक्षत्रेषु, रविवासरादिष्वशनिनामा योगः सदैव शुभकार्येषु मृत्युप्रदः। यदि वक्रौ गुरुशुक्रौ परस्परसप्तमस्थौ, अन्योन्यं विलोकयेताम्, तदायं दोषः साक्षात् प्रलयकालसमानः। दिवसस्याष्टमे भागे वारेशाद्या ग्रहाः क्रमात् शन्यंशे कुलिको दोषो तथा च पुनरष्टमे वारेशदोषो विजानीयात्।[२७९]

---

२७६ व.सं. श्लो. ११ तः१३
२७७ व.सं. श्लो. १४ तः१८
२७८ व.सं. श्लो. १९,२०,२१
२७९ व.सं. श्लो. २४,२५,२६

सिंहराशिस्थिते गुरौ मध्यदेशे विवाहसंस्कारकृत्यं मृत्युयोगो कथितः। स दम्पत्योः पञ्चवर्षान्मृत्युदः स्यात्। सिंहराशौ मध्यांशे यदि गुरुर्विद्यमानोऽस्ति, तदाशनिनामा योगः कथितः, यः गोदावर्या याम्यभागे दम्पत्योर्निधनप्रदो भवति। सिंहराशौ सिंहनवांशे यदि गुरुः स्थितः, तदा कलिङ्ग–गौड–गुर्जरदेशे कालमृत्युनामा योगो दम्पत्योर्निधनप्रदः स्यात्। एतेषु योगत्रयेषु विवाहः सर्वदोक्तदेशेषु वर्जनीयः स्यात्। किन्त्वन्यदेशेषु विवाहं कारयेन्मङ्गलप्रदः स्यात्।[२८०]

रविवासरे कृत्तिकानक्षत्रमेवं पञ्चमी तिथिः, सोमवासरे चित्रानक्षत्रमेवं द्वितीया तिथिः, भौमवासरे रोहिणीनक्षत्रमेवं पूर्णिमा तिथिः, बुधवासरे भरणीनक्षत्रमेवं सप्तमी तिथिः, गुरुवासरेऽनुराधानक्षत्रमेवं त्रयोदशी तिथिः, शुक्रवासरे श्रवणनक्षत्रमेवं षष्ठी तिथिः, शनिवासरे रेवतीनक्षत्रमेवमष्टमी तिथिस्तदा हालाहलनामा योगः शत्रुसमानं मारणं करोति। विवाहादिकार्येषु निश्चयेन मृत्युप्रदो भवति। प्रतिपद्दिने पूर्वाषाढानक्षत्रं, पञ्चम्यां तिथौ कृत्तिकानक्षत्रम्, अष्टम्यां पूर्वाभाद्रपदानक्षत्रं, दशम्यां रोहिणीनक्षत्रं, द्वादश्यामाश्लेषानक्षत्रं, त्रयोदश्यामत्तराफाल्गुनीनक्षत्रं वा भवेत्, तदा लाञ्छितनामा योगो देवानामपि नाशकरः स्यात्। चतुर्दशी–चतुर्थी–अष्टमी–नवमी–षष्ठी–द्वादशीतिथयः पक्षच्छिद्रा नाम्ना कथिताः। एतासु तिथिषु क्रमात् पञ्च–अष्ट–चतुर्दश–पञ्च–नव–दशनाडिकाः सदैव त्याज्याः। शेषास्तु शोभनाः। दोषनाडीषु यत् शुभकर्म कारयेत्, तत्सर्वं विनश्यति। तस्मिन् विवाहेन नारी विधवा स्यात्, उपनयनसंस्करणे व्रात्यः स्यात्। सीमन्तोनयनसंस्कारेण गर्भनाशः, अन्नप्राशनसंस्कारेण निश्चयेन मृत्युर्भवति।यद्येतानां तिथिनाडिकानां काले गृहारम्भं कृत्वा विशेषतः शीघ्रं गृहमग्निकारणेन दह्यते। प्रतिष्ठां कृत्वा निश्चयेन राजा राष्ट्रं विनाशयति। तत्र न कोऽपि

२८० व.सं. श्लो. २७,२८,२९

सन्देहः। किमत्र बहुनोक्तेन तत्काले कृतं सर्वं कर्म विनश्यति।[२८१]

विशाखा–अनुराधा–मृगशीर्ष–ज्येष्ठा–कृत्तिका–आश्लेषानक्षत्रेषु यदि रविवासरः, तदा प्रयत्नेन वर्जयेत्। पूर्वाषाढा–उत्तराषाढा–कृत्तिका–पुष्य–विशाखा–मघानक्षत्रेषु सोमवासरः, तदा शुभकर्माणि कृतानि विनश्यन्ति। ज्येष्ठा–पूर्वाभाद्रपदा–श्रवण–धनिष्ठा–आर्द्रा–आश्लेषा–शतभिषानक्षत्रेषु यदि भौमवासरः, तदा सर्वमङ्गलनाशदो भवति। अश्विनी–भरणी–मूल–रेवती–धनिष्ठा–आर्द्रा–नक्षत्रेषु यदि बुधवासरः, तदा सर्वशोभननाशदः स्यात्। उत्तराफाल्गुनी–रोहिणी–चित्रा–श्रवण –मृगशीर्षनक्षत्रेषु यदि गुरुवारस्तदा स शुभकार्येषु निधनप्रदः स्यात्। आश्लेषा–विशाखा–अनुराधा–मृगशीर्ष–रोहिणी–मघानक्षत्रेषु यदि शुक्रवासरः, तदा सर्वाणि मङ्गलकार्याणि वर्जयेत्। उत्तराफाल्गुनी–रेवती–पुष्य–पुनर्वसु–हस्त–श्रवणनक्षत्रेषु यदि शनिवासरः, तदा शुभकार्येषु निन्दितः स्यात्। एषु योगेषु कृतं सर्वकर्म विनश्यति, यथा विवाहे स्त्री वैधव्यं प्राप्नोति, उपनयनादिसंस्कारे बटुः पातककृद् भवेत्, किन्तु वारेशे बलसंयुक्त एते योगा बलहीना भवन्ति, तत्र न कोऽपि संशयः। हस्त–धनिष्ठानक्षत्रयोः प्रथमचरणं, विशाखार्द्रानक्षत्रयोः द्वितीयचरणं, उत्तराभाद्रपदनक्षत्रस्य तृतीयचरणं तथा च चतुर्थचरणं भरणीमूलनक्षत्रयोः–एते योगा दिने मृत्युप्रदाः किन्तु रात्रिषु एते दोषा न भवन्ति, अतः शुभकार्येषु सदा वर्जयेत्। अश्विनी–आश्लेषानक्षत्रयोः प्रथमचरणं, भरणीमूलनक्षत्रयोर्द्वितीयचरणं, त्र्युत्तरा(उत्तराफाल्गुन–उत्तराषाढा–उत्तराभाद्रपदा) नक्षत्रयोस्तृतीयचरणं तथा श्रवणनक्षत्रस्य चतुर्थचरणं छिद्रसंज्ञकं कथितम्। एते योगाः सदैव शुभकार्येषु दिवा रोगप्रदाः, न तु रात्रौ कदाचन। रात्रौ शुभप्रदाः। यदि सूर्यचन्द्रौ बलहीने, तदा एते योगा दिने रोगमृत्युप्रदायकाः, अतस्तान् संत्यजेत्। सूर्यादिवारा त्रिगुणिता एकस्मिन्नक्षत्रेण शोधयेत्, तत्रैकादश–द्वादश–षष्ठताराः क्रमेण काणान्धबधिराः

२८१ व.सं. श्लो. ३० तः ३९

स्युः।[२८२]

विशाखा–रोहिणी–कृत्तिका–हस्त–धनिष्ठा–मघानक्षत्राणि रविवारेण युक्तानि, तदा हालाहलविषोपमानि ख्यातानि। उत्तराफाल्गुनी–उत्तराषाढा–उत्तराभाद्रपदा–चित्रा–विशाखा–अश्विनीनक्षत्राणि सोमवारेण संयुक्तानि कालकूटविषोपमानि ख्यातानि। शतभिषा–विशाखा–आर्द्रा–उत्तराषाढानक्षत्राणि भौमवासरेण युक्तानि, तदा गुणघ्नविषसंज्ञकानि ख्यातानि। अश्विनी–भरणी–कृत्तिका–धनिष्ठा–मूलादिनक्षत्राणि बुधवासरेण युक्तानि, तदा सर्वाणि कार्याणि नष्टकारकदोषरूपाणि कथ्यन्ते। उत्तराफाल्गुनी–रोहिणी–मृगशीर्ष–कृत्तिका–आर्द्रा–शतभिषानक्षत्राणि गुरुवासरेण युक्तानि, तदा मङ्गलनाशददोषाणि ख्यातानि। आश्लेषा–विशाखा–ज्येष्ठा–कृत्तिका–मघानक्षत्राणि शुक्रवासरेण युवतानि, तदा महादोषसंज्ञकानि प्रकीर्तितानि। उत्तराफाल्गुनी–रेवती–पुनर्वसु–हस्त–उत्तराषाढादिनक्षत्राणि, यदि शनिवासरेण युक्तानि, तदा विमर्दनदोषः ख्यातः।[२८३]

त्रयोदशांशयुतः सूर्यो यदि चतुर्षु राशिषु संस्थितः, तदा धूमनामा योगः सर्वशुभकार्याणि विनाशयति। धूममण्डलतः शुद्धो व्यतीपातः षड्राशियुतः परिवेषकः प्रकीर्तितः। परिवेषे चक्रयुक्ते विषनामा योगो यदि धनुराशेरष्टमभागयुतः, तदा केतुसंज्ञकोऽपरो विषसदृशः ख्यातः। एतत्प्रकारेण सूर्यस्य पञ्चदोषा ब्रह्मणा कथिताः। पञ्चदोषेषु संयुक्तेषु सूर्येन्दूदयराशिषु विवाहं कृत्वा स्त्री वैधव्यं प्राप्नोति। देवप्रतिष्ठायां कुलनाशो भवति। उपनयनसंस्कारं कारयेत्, तदा बटोः स्वकर्मणा च्युतो व्रात्यो भवति। सीमन्तोन्नयनसंस्करं कृत्वा गर्भनाशफलं प्राप्नोति। नवान्नभोजने मृत्युदो भवति। चौलसंस्कारे व्याधिर्भवति। अत एते पञ्चदोषा माङ्गलिककार्येषु सदा वर्जनीयाः। द्वितीयायां तिथौ धनौ मीनराशौ वा स्थिते, चतुर्थ्यां कुम्भे वृषभे वा राशौ

२८२ व.सं. श्लो. ४० तः ५४
२८३ व.सं. श्लो. ५५ तः ६१

स्थिते, षष्ठ्यां मेषे सिंहे वा राशौ स्थिते, अष्टम्यां मिथुने कन्यायां वा स्थिते, दशम्यां सिंहे वृश्चिके वा, द्वादश्यां तुलायां मकरे वा स्थिते, एते योगा मृत्युदाः स्युः। अतः शुभकार्येषु सदैव निन्दिताः स्युः। तृतीयायां तिथौ सिंहे मकरे वा राशौ स्थिते, प्रतिपद्यां तुलायां मकरे राशौ स्थिते, पञ्चम्यां मिथुने कन्यायां राशौ स्थिते, सप्तम्यां धनुराशौ कर्कराशौ वा, नवम्यां सिंहे वृश्चिके वा राशौ, एकादश्यां धनौ मीने वा स्थिते, त्रयोदश्यां वृषे मीने वा स्थिते, तदा एता राशयः दग्धसंज्ञकाः ख्याताः। दग्धसंज्ञकराशौ स्थिते यत्कर्म कुर्वन्ति, तत्सर्वं विनश्यति। अतोऽखिलेषु शुभकार्येषु तास्त्याज्याः। महागणितमार्गे स्थितो व्यतीपातनामा दोषदः योगः, बलवद्गुणसम्पन्नोऽप्यसौ कुलस्य नाशकर्ता स्यात्।[२८४]

**शून्यनक्षत्राणि –**

अश्विनीरोहिणीनक्षत्रे चैत्रमासे, चित्रास्वातीनक्षत्रे वैशाखमासे, उत्तराषाढानक्षत्रं ज्येष्ठमासे, पूर्वाफाल्गुनीधनिष्ठानक्षत्रण्याषाढमासे, श्रवण–उत्तराषाढानक्षत्रे श्रावणमासे, शतभिषारेवतीनक्षत्रे भाद्रपदमासे, पूर्वाभाद्रपदा–अश्विनीनक्षत्रेऽश्विनमासे, मघाधनिष्ठानक्षत्रे कार्त्तिकमासे, चित्राविशाखानक्षत्रे मार्गशीर्षमासे, अश्विनी–हस्त–आर्द्रानक्षत्राणि पौषमासे, मूलश्रवणनक्षत्रे माघमासे तथा च ज्येष्ठाभरणीनक्षत्रे फाल्गुनमासे स्युः, तदा एतानि नक्षत्राणि शून्यनक्षत्राणि। एतेषु नक्षत्रेषु येन कर्म कृतं, स धनैः सह विनश्यति।[२८५]

**शून्यतिथयः –**

चैत्रमास उभयोः पक्षयोः(शुक्ल एवं कृष्णे च) अष्टमी नवमी च तिथिः, वैशाखमासे उभयोपक्षयोर्द्वादशी तिथिस्त्याज्या। ज्येष्ठमासे शुक्लपक्षे त्रयोदशी तथा कृष्णपक्षे चतुर्दशी तिथिः। आषाढमासे कृष्णपक्षे षष्ठी सप्तमी च तिथिरशुभप्रदा। श्रावणमास उभयोः

---

२८४ व.सं. श्लो. ६४ तः ७३

२८५ व.सं. श्लो. ७४ तः ७७

पक्षयोः(शुक्ले तथा कृष्णे) द्वितीया तृतीया च तिथिः, तथा च भाद्रपदमास उभयोः पक्षयोः(शुक्ले कृष्णे च) प्रतिपद्, द्वितीया च तिथिर्निन्दिता स्यात्। अश्विनमास उभयोपक्षयोः(शुक्ले कृष्णे च ) दशम्येकादशी च तिथिः, कार्त्तिकमास उभयोः पक्षयोः पञ्चमी, चतुर्दशी वा तिथिः, मार्गशीर्षमास उभयोः पक्षयोः(शुक्ल एवं कृष्णे) सप्तम्यष्टमी वा तिथिः, पौषमास उभयोः पक्षयोः(शुक्ल एवं कृष्णे) चतुर्थी पञ्चमी वा तिथिः, माघमासे शुक्ले कृष्णपक्षे च पञ्चमी षष्ठी वा तिथिस्तथा च फाल्गुनमासे शुक्ले कृष्णपक्षे च तृतीया तथा कृष्णपक्षे चतुर्थी तिथिर्निन्दिता स्यात्। एताः शून्याख्या मासतिथयो शुभकर्मविनाशदाः स्युः। तन्मध्ये श्राद्धादिकर्म कर्तुं शक्नोति, किन्तु माङ्गलिककर्म नैवाचरेत्। कुम्भ-मीन-वृषभ-मिथुन-मेष-कन्या-वृश्चिक-तुला-धनु-कर्क-मकर-सिंहराशयश्चैत्रादिमासेषु क्रमेण मासशून्याः कथ्यते। एता मासशून्या राशयो वंश-वित्तविनाशदाः स्युः। अतो बुद्धिमान् ताः परित्यज्य शुभकार्यं कुर्यात्।[२८६]

दिव्य-अन्तरिक्ष-भूमिसम्बन्धितास्त्रिविधा उत्पाताः स्मृताः। उत्पातयुक्तनक्षत्राणि सप्तदिनतः षण्मासपर्यन्तं त्याज्यानि। उत्पातदिनमेवं उत्पाततो नवमदिनं विशेषतस्त्याज्यम्। तद्दिने कृतं, शुभकर्म शीघ्रं विनाशमायाति। नृपसंन्यासिविद्वद्‌यज्ञवदैवज्ञानां मृत्योः पश्चात् त्रिदिनपर्यन्तं शुभकर्म न कारयेत्। गुरु-सौर-चान्द्र-त्रिविधवर्षमानानामादौ तथान्ते त्रिदिनं शुभकार्येषु सदा वर्जयेत्।[२८७]

सूर्यसंक्रान्तिपूर्वं षोडशनाड्यस्तथा च सूर्यसंक्रान्तिपश्चात् षोडशनाड्यो दोषयुक्ताः। अतः शुभकार्येषु सदैव त्याज्याः। अयनसंक्रान्तिदिनं तथा च विषुवसंक्रान्तिदिनं सदैव शुभकार्येषु त्याज्यम्। वैधृतिव्यतीपातौ सदैव ग्रहणसमानौ दोषप्रदौ। अतस्त्रिदिनपर्यन्तं(१ दिनं

२८६ व.सं. श्लो. ७८ तः ८६
२८७ व.सं. श्लो. ८७ तः ९१

पूर्वे, १ दिनं पश्चादेवं तद्दिनम्) त्याज्यम्, शुभकर्म न कारयेत्। उपग्रहो, महादोषो, भूकम्पादिदोषः सदैव मङ्गलकार्येषु त्याज्यः। एते कालकूटविषोपमा उक्ताः। भूकम्पे स्थानं कम्पयति, उल्कायां कुलं दहति, दण्डेन स्वामी विनाशयति तथा च ध्वजः सर्वविनाशकृत् स्यात्। ग्रहणं रात्रिद्वयान्तरे, सन्ध्ययोर्वा भवेत्, तदा पूर्वं पश्चादुभयत्रापि दोषः स्यात्। सूर्य-भौम-शुक्र-बुध-गुरु-शनिराशय एकस्मिन्राशौ स्थिताः, तदा सर्वकर्मविनाशकृत् कण्टकनामा महादोषः स्यात्। अकालवृष्टिनीहारपरिवेषशरासना लत्तापातादयो दोषाः शुभकार्याणां नाशं कुर्वन्ति,अतस्त्याज्याः। रूपादिबलसम्पूर्णा ग्रहेन्द्राः सदा बलिनः स्युः। सूर्यतः शीघ्रगतिकग्रहा अग्रेगमनाद् भानो रश्मिभिर्बलवत्तराः स्युः। सूर्यतः पृष्ठे गमनाद् रश्मिहीनास्तथा व्यत्ययान्मन्दचारिणः स्युः। सर्वकार्येषु सर्वदा चन्द्रतो बलवान् सूर्यः स्यात्। सूर्यस्य राशिणा ज्वलितं पृष्ठनक्षत्रं भस्मसंज्ञकं तथा चाग्रनक्षत्रं धूमसंज्ञकमुक्तम्। अतस्तस्मात् त्रितयनक्षत्राणि(सूर्यनक्षत्रं, सूर्यनक्षत्रात् पूर्वापरनक्षत्रे च) सर्वाणि शुभकर्माणि विनशयन्ति,अतस्त्याज्यानि। भस्मधूमाख्याराशयो यदि शुभग्रहैर्युतास्तदा श्रेष्ठाः। शून्याधिमासाः, त्रिविधगण्डान्तनक्षत्राणि, त्रिविधमहापाताः, त्रितयनक्षत्रराशिसन्धयः- एते सदैव त्याज्याः। संग्रहदोषः, कर्तरीदोषः, सूर्यसंक्रान्तिदोषः, विषनाडिका, ग्रहणोद्भवदोषः, दुःक्षणः, कुनवांशकः, पापग्रहेण विद्धनक्षत्रं, खार्जूरिकदोषः, नक्षत्रसमानचरणदोषः, अष्टमस्थभौमदोषः, षष्ठस्थशुक्रदोषः, षष्ठ-अष्टम-द्वादशचन्द्रदोषः, पञ्चाङ्गशुद्धिरहितदोषः, उत्पातदोषः, अकालवृष्टिदोषः-एत एकविंशतिमहादोषा ब्रह्मणा कथिताः। एते कोटिकोटिभिर्गुणैरपि नैव सीदन्ति। अतस्तस्मादेतेषु दोषेषु शुभकर्म नैवाचरेत्। यद्येतेषु दोषेषु शुभकर्म समाचरेत्, तदा विविधदोषा भवन्ति, ते यथा- यदि विवाहकर्म कारयेत्, नारी वैधव्यं प्राप्नोति। व्रतबन्धने बटोर्मृत्युर्भवेत्। देवप्रतिष्ठास्थापने ग्रामनाश इति फलं प्राप्नोति। सीमन्तोन्नयने गर्भनाशः, नवान्नभोजने कर्तुर्मृत्युर्भवेत्। कृषिकर्म कुर्वन् कृषिफलनाशनं भवेत्।

गृहारम्भे कर्तृनाशो तथा च गृहप्रवेशे गृहस्वामिनो मृत्युर्भवेत्। यात्रायां कर्तृनाशः, विशेषतो युद्धादिकार्ये कर्तृनाशः- इति फलं प्राप्नोति। किन्तु यद्येतेषु कार्येषु श्राद्धादिकर्म कुर्वन्नत्यधिकं पुण्यफलं प्राप्नोति। ज्येष्ठानक्षत्रोत्पन्नो जातकः प्रथमचरणे यदि जातस्तदाग्रभ्रातरमग्रभगिनीं वा हन्ति। द्वितीयचरणे सहोदरनाशः, तृतीयचरणे मातृनाशस्तथा चतुर्थचरणे जातकः स्वयं मृतो भवति। ज्येष्ठानक्षत्रोत्पन्ना कन्यका भर्तुरग्रजं नाशयति। ज्येष्ठानक्षत्रस्य चतुर्थचरणोत्पन्ना कन्यका पितृनाशं करोति। ज्येष्ठानक्षत्रस्य प्रथमचरणोत्पन्नो बालस्तस्याग्रजं हन्ति। बालिका विवाहपश्चाद् भर्तुरग्रजं निहन्ति। यदि सा बालिका मूलनक्षत्रोत्पन्ना, तदा विवाहपश्चाद् भर्तुर्मातापित्रोर्मृत्युदायका भवेत्। धनिष्ठानक्षत्रस्य प्रथमद्वितीयपादयोः दोषो भवेत्, तृतीये स्वल्पदोषः, किन्तु चतुर्थचरणं पितरं हन्ति। अतो धनिष्ठानक्षत्रस्य चतुर्थचरणोत्पन्नो बालो बालिका वा जायते, तदा पीडारिष्टनिवृत्यर्थं मूलवच्छान्तिं कुर्यात्। मूलनक्षत्रोत्पन्नो बालो बालिका वा शीघ्रं श्वशुरं हन्ति। मूलनक्षत्रस्य चतुर्थचरणोत्पन्नो जातकः स्वयं नैव हन्ति। मूलनक्षत्रस्य सदृशमाश्लेषानक्षत्रोत्पन्नबालिकानां फलं ज्ञेयम्। आश्लेषानक्षत्रोत्पन्ना बालिका भर्तुरग्रजं तथा च विशाखानक्षत्रोत्पन्ना बालिका देवरं हन्ति। ज्येष्ठानक्षत्रोत्पन्नो बालः स्वसामग्रजां हन्ति। किन्तु ज्येष्ठानक्षत्रोत्पन्ना बालिका स्वाग्रजभ्रातरं न हन्ति। ज्येष्ठानक्षत्रस्य चतुर्थचरणोत्पन्ना बालिका भर्तुरग्रजस्य नाशं करोति। अत एतेषां दोषशमनार्थं विप्रेभ्यो गोत्रयं दद्यात्। यदि गोत्रयदानेऽसमर्थस्तदा भक्तितो गोद्वयमेकमेव वा दाने दद्यात्। आश्लेषा-ज्येष्ठा-रेवतीनक्षत्राणां तेषामग्रिमनक्षत्राणान्तरालमर्थात् सन्धौ भवेत्, तदा अभुक्तसंज्ञनक्षत्रं कथ्यते। तस्मिन् प्रहरप्रमाणकाले जनितं पुत्रं पुत्रीं वा त्यजेत्। मूलनक्षत्रस्य प्रथमचरणोत्पन्नो जातकः पितरं हन्ति। द्वितीयचरणोत्पन्नो जातकः स्वजननीं हन्ति। तृतीयचरणोत्पन्नो जातको धननाशं करोति तथा च चतुर्थचरणोत्पन्नो जातकः शुभफलं प्राप्नोति। आश्लेषानक्षत्रोत्पन्ने जातके विपरीतक्रमेणोपर्युक्तफलानि भवन्ति। आश्लेषानक्षत्रस्य प्रथमचरणोत्पन्नो जातकः

शुभफलं प्राप्नोति, द्वितीयचरणोत्पन्नो जातको धननाशं करोति, तृतीयचरणोत्पन्नो जातकः स्वजननीं हन्ति। तथा च चतुर्थचरणोत्पन्नो जातकः पितरं हन्ति। हीननक्षत्रयोरुत्पन्नो जातकस्तथा च गण्डादिदोषनिवृत्यर्थं जातकस्याभ्युदयाय पितामहोक्तां रुचिरां च शान्तिं, दैवज्ञो हिताय सम्यक् कथयेत्। चित्रानक्षत्रस्य पूर्वार्धं, पुष्यमध्ये द्विपादं(द्वितीयचरणं) पूर्वाषाढानक्षत्रस्य तृतीयचरणं तथा उत्तराषाढानक्षत्रस्य प्रथमचरणोत्पन्नो बालो मातापितरौ भ्रातरं चात्मनाशं कारयेत्। उत्तरानक्षत्राणां(उ.फा.-उ.षाढा-उ.भा.) दोषः, द्विमासपर्यन्तं, पुष्यनक्षत्रस्य त्रिमासपर्यन्तं, पूर्वाषाढानक्षत्रस्याष्टमासपर्यन्तं तथा च चित्रानक्षत्रस्य दोष; षण्मासपर्यन्तं भवति। आश्लेषानक्षत्रस्य नवमासपर्यन्तं, मूलनक्षत्रस्य अष्टाब्दं, ज्येष्ठानक्षत्रस्य पञ्चदशमासपर्यन्तं दोषो भवेत्, किन्तु पुत्रदर्शनवर्जित एते दोषा न भवेयुः। ज्येष्ठान्त्यपादघटिका तथा मूलनक्षत्रस्य प्रथमचरणमभुक्तमूलं कथ्यते। मूलाद्यपादस्य सार्धद्वितयघटिका अभुक्तमूलं कथ्यते। अतो यो नक्षत्रोत्पन्नो बालो बालिका वाष्टवर्षपर्यन्तं परित्यजेत्। अभुक्तमूलं परित्यजेत्, अन्यगण्डदोषेषु शान्तिकर्म बुद्धिमान् कुर्यात्। तथा च शास्त्रोक्तरीत्या सूतकान्तमासे तृतीये वत्सरान्ते वावश्यं कुर्यात्। बुद्धिमान् मातृगण्डोत्पन्नस्य जातकस्य शान्तिं दोषनिवृत्यर्थं सूतकान्ते कुर्यात्। मूलाद्यपादो यदि दिनभागे स्यात्, तदा तत्रोत्पन्नो जातकः पितुर्नाशकारणं स्यात्। द्वितीयचरणं यदि रात्रिभागे तदा तत्रोत्पन्नो जातको मातुर्नाशकारणं स्यात्। मूलाद्यपादो यदि रात्रिभागे तदात्मनो विनाशः स्यात्। न तु पितुर्नाशो भवति। यदि द्वितीयचरणं दिनभागे, तदा दोषो मातुरल्पोऽपि न स्यात्।[२८८]

**गण्डदोषशान्तिविधिः —**

ईशान्यां, प्राच्यामुदीच्यां वा दिश्यष्टभिर्हस्तैश्चतुर्भिर्वा समन्ततो मण्डपं कल्पयेत्।

२८८ व.सं. श्लो. ९२ तः १३०

कदलीस्तम्भसंयुक्तमाम्रपल्लवराजितं पुष्पमालायुतं, सम्यक् तूर्यघोषं निनादं कुर्यात्। चतुर्द्वारं तोरणाद्यैः समायुक्तं, पिष्टेन गोमयमण्डलेन विलिप्य सर्वं कल्पयेत्। ग्रहयज्ञोक्तमार्गतः कुण्डं निर्मितं भवेत्। पुनः पञ्चगव्यं पञ्चामृतं पञ्चत्वक्पल्लवानि च रोचनं, कुङ्कुमं, शङ्खः, गजदन्तं, गुग्गुलं, सद्बीजाश्च, शतौषध्यः, सुगन्धकलमृत्तिका- एतानि कल्पयित्वा शतच्छिद्रं बृहत्कुम्भं शिरोदेशे धारयेत्। विद्वानाचार्यस्ततो राज्याभिषेकं कारयेत्। वेदपारङ्गताचार्यश्चतुःकुम्भानां जलमब्लिङ्गैर्जलमन्त्रकैरभिमन्त्रितं कृत्वा स्नानं कारयेत्। अनेकदीपमालिकान्तैः स्नातुर्नीराजनं कुर्यात्। पुनः कुङ्कुम-माल्याम्बरौ दत्त्वा निर्ऋतिं द्विजांश्च प्रार्थयेत्। अनेन सुकृतेनैव निर्ऋतिः प्रीयतामिति गृह्णीयात् तेभ्यः पूजाहोमजपादिकं सुकृतम्। पुन आचार्याय वृषं दत्त्वा लोहपिण्डं सदक्षिणं दद्यात्। पुनः शक्त्यनुसारेण बीजसहितं धनयुक्तं प्रतिमादानं कुर्यात्। स्ववित्तानुसारेणाचार्येभ्यो द्विजेभ्यश्च धनं दद्यात् । पुनरङ्गजपाकेभ्यश्च भयलोभविवर्जितं दक्षिणाप्रदानं कुर्यात्। तथा च तेषां परिवाराणामपि वस्त्रालंकारसंयुवतां धेनुसहितां दक्षिणां दद्यात्। पुनर्ब्राह्मणान् भोजयेत्, तत्पश्चादाशीर्वादपुरःसरम्। एवं यः कुर्यात् स गण्डदोषात् प्रमुच्यते। एतत्सर्वं शान्तिकर्म आश्लेषादिनक्षत्रोत्पन्नानां जातकानां समानरूपेण भवति। सर्पेभ्यः स्वाहा- इति मन्त्रमुक्त्वा ततः जुहुयात्। आश्लेषाभ्यः स्वाहा, दन्दशूकेभ्यः स्वाहा - इति होममन्त्रैर्जुहुयात्। पूर्ववदष्टभिर्वाक्यैः - इदं सर्पेभ्यः- इति जुहुयात्। मन्त्रस्य ऋषिरास्तिकः, छन्दस्त्रिष्टुप् तथा च देवता सर्पाः। नमोस्तु सर्पेभ्यः -इति मन्त्रेण पूर्ववत् पूजनं कारयेत्। मन्त्रस्य छन्दो बृहती, अधिदेवता सर्पाः , तथा च ऋषिरास्तिकः , मन्त्रः सर्वदुःखविनाशदः स्यात्। पितामहानुसारेण दोषनिरूपणमुक्तम्। तथा च गुणापवादः पृथक् पृथक् कथ्यते।[२८९]

---

२८९ व.सं. श्लो. १३१ तः १४८

## १.५.१४ गुणदोषापवादाध्यायः

वृद्धवसिष्ठसंहिताग्रन्थे त्रिचत्वारिंशदध्याये गुणदोषापवादनामक एकशताधिकद्विसप्तति( १७२ )श्लोकाः सम्मिलिताः।

दैवज्ञानां हितार्थाय दोषाणामपवादकोऽध्यायः कथितः, यद्वत् कलियुगेऽधर्मेण जितो धर्मः, पुण्यं पापचयेन च, तद्वद्दोषेण गुणसमूहा नष्टा भवन्ति। निर्देशमात्रेण एते गुणा नष्टा भवन्ति। अन्यत्र निश्चयेन प्रशंसन्ते। वारेणोत्पातसंज्ञकयोगानां गुणं नष्टं भवति।[२९०]

श्रेष्ठयोगो महाबलिनं मृत्युयोगं हन्ति, यथा सर्पो मूषकं हन्ति। शुभयोगो महाबलिनमर्धयोगं हन्ति, यथातिगर्वितो मृगेन्द्रः कृष्णमृगं निहन्ति। कल्याणयोगो महाबलवन्तं काणयोगं निहन्ति, यथानिलोऽखिलतृणराशिसमूहं नाशयति। वर्धमानयोगः पङ्गुयोगं हन्ति, यथा सुगुणसंपन्नमुग्रकालो नाशयति। सुधायोगश्चञ्चलं बधिरयोगं च हन्ति, यथा वृकोऽजसमितिम्। बलिनो गुणसंपन्ना महायोगा निश्चयेन दग्धयोगं निहन्ति, यथा मेहः शरीरम्।[२९१]

सुवर्णगन्धपुष्पाणि तथा च रक्तगन्धोदकानि, सुवर्णेन प्रमाणेन तदर्धेन वा पुनर्वित्तशाठ्यविवर्जितं निर्ऋतिप्रतिमां कुर्यात्। श्वेतसूक्ष्मवस्त्रैः षोडशाष्टौ वा विप्रान् वरयेत्। तत्पश्चात्पुनः स्वस्तिवाचनपूर्वकं प्रधानाचार्यमेतेषां श्रेष्ठं वरयेत्। प्रतिमार्चन ईशानादिषु चतुष्कोणेषु कलशं पूजयेत्। एवं पृथक् पृथङ् मधुपर्केण युक्तः, द्वारेष्वष्टौ जापकान् पूर्ववच्चाङ्गजापकान् पूर्णजलैः कलशान् ईशानादिचतुष्कोणेषु स्थापयेत्। पूर्वोक्तद्रव्यसंयुक्ताः कलशाः सुशोभितश्वेतवर्णतण्डुलोपरि संस्थाप्योपचारैः पूजयेत्। अब्लिङ्गैर्वारुणैर्मन्त्रैः शुक्लपुष्पाक्षतादिभिस्तत्कुम्भजलं स्पृष्ट्वा कुशकूर्चैर्जपादिकान् कुर्यात्। देवतानां

---

२९० व.सं. श्लो. १ तः ४

२९१ व.सं. श्लो. ५ तः १०

तन्मन्त्रैर्वालसरहितं ध्यात्वा भद्राग्निः- इति सूक्तस्य द्वे जपेत्। ततः पुनर्दश-ऋचामनुष्टुप् छन्दः, वामदेवोऽग्निर्देवतादीनां प्रथमं पञ्च, सप्त वा आ नो भद्रा इति सूक्तस्य पाठं कुर्यात्। राहूगणसुतस्यैवं स्मरणं कुर्यात्। यः साक्षान् नारायणसूक्तद्वारा देवताः पूजयेत्। शतच्छिद्रं बृहत्कुम्भं मध्यभागे स्थापयेत्। तदनन्तरं पश्चिमाभिमुखं निर्ऋतिदेवतामर्चयेत्। मोषुणमन्त्रेण तथा श्वेताम्बराक्षतादिभिः पूजयेत्। मोषुणमन्त्रस्य ऋषिः प्रस्कण्वः कथितः। तस्य देवता निर्ऋतिस्तथा छन्दो गायत्री स्यात्। सा क्लेशनाशिनी, कृष्णवर्णा करालमुखी तथा खड्गचर्मधारणकर्त्री स्यात्। ऋग्वेद-यजुर्वेद-सामवेदानां पूर्वद्वारतः क्रमात् पूर्व-दक्षिण-पश्चिमदिशि जपं कुर्यात्। तथा च जितेन्द्रिय आलस्यरहितोऽथर्ववेदस्य मन्त्राणामुत्तरदिशायां जपं कुर्यात्। षडङ्गजापकान् तत्र तत्तन्मन्त्राणां जपं कुर्वन् पुनस्तैर्मन्त्रैः सम्पूर्णग्रहाणां लोकपालानर्चयेत्। जितेन्द्रियाणां मूलप्रजामिति मन्त्रद्वयस्य ऋषिः प्रस्कण्वः। तथा च देवता निर्ऋतिरेवमष्टोत्तरसहस्रं शतं वा जपः पापविमोचनः स्यात्। मूलं प्रजामित्यष्टौ वाक्यानां द्वारा विनियोगपूर्वकमर्चयेत्। तदनन्तरं स्वगृह्योक्तविधानेन कुण्डेऽग्निं स्थापयित्वाग्निकुण्डे प्रजापतये स्वाहा – इति मन्त्रेणाष्टोत्तरशतं, प्रत्येकं मूलं प्रजामिति इति अष्टौ वाक्यानां, मन्त्रद्वयेन वा जुहुयात्। तत्र सूर्य-सोम-निर्ऋतिदेवतानां सम्बन्धितमन्त्रैरश्वत्थसमिधां तिलव्रीहीन्हुत्वा व्याहृतिभिस्ततः जुहुयात्। पुनर्जपादिकं पश्चात् स्वयं भक्तिपूर्वकं मङ्गलघोषैश्च स्नानकर्म समाचरेत्।[२९२]

मघानक्षत्रस्य प्रथमचरणे यदि बालकस्य जन्म, तदा त्रयाणामभिषेकं समाचरेत्। इतरत्र मात्रा सह शिशोरभिषेकं न समाचरेत्। एतद्ग्रहजन्यनक्षत्रयोगः पूर्णयोगं निहन्ति। यथा गोसमितिं व्याघ्रश्चोद्धतः खलसंयुतः। अचिकित्सगदायोगः शङ्कयोगं निहन्ति, यथा काकः पुरोडाशम्। ग्रहैः कृतो मृत्युयोगो महागुणवान्नमृतसंज्ञकं योगं निहन्ति, यथाग्निना कारणेन

२९२ व.सं. श्लो. ११ तः ३५

विशालं वनं दग्धं भवति। अग्निजिह्वाह्वययोगदोषो पद्मयोगस्य सम्पूर्णगुणान् अचिरात् शीघ्रं हन्ति, यथा नकुलः पन्नगम्। आनन्दसंज्ञकगुणो विषयोगस्य दोषसमूहान्, लग्नोत्पन्नगुणान् नाशयति, यथा व्याघ्रः कृष्णमृगम्। ये वर्षान्ता एवं पक्षान्ता दोषा दशसहस्रगुणसञ्चयान्, मासान्तदोषान् कोटिगुणसञ्चयान् नाशयति। उपप्लवभवो दोषो गुणसञ्चयं हन्ति। तथा नक्षत्रोत्पातजो दोषः कर्तुर्धनं विनाशयति। महाशूलयोगः सिद्धियोगं निहन्ति, यथा बलसम्पन्नो राहुर्बलिनं चन्द्रं हन्ति। अत्यधिकबलवान्दुष्टयोगः पीयूषयोगं हन्ति, यथा नानातरुविमण्डितमखिलवनं दावाग्निकारणेन नष्टं भवति। कपिलसंज्ञकमहायोगो बलिनं दोषकम्पनं शकटोपमं हन्ति। यथानृतं सुकृतं हन्ति। अशनिर्नाम योगो यः समुद्रं योगवल्लभं हन्ति,यथा राघवाग्निशरो युद्धे शम्बरं हन्ति। जीवशुक्रयोः समसप्तकयोगो मूढसमो दोषो निःसंशयेन नाशं याति। महाकुलिकयोगो वापीयोगं तथान्यान्यमहागुणान् निहन्ति, यथाग्निरिन्धनं निहन्ति। हालाहलसंज्ञकयोगो मौसलाख्यं तथा लग्नोत्पन्नान् अन्यान्यगुणान् निहन्ति, यथा कितवोऽतिधनिकान् नाशयति। नक्षत्रलक्षितो योगः सदैव स्वयोगं तथान्यगुणान् निहन्ति, यथा स्वैरिणी स्त्री स्वकुलं निहन्ति। पुण्डरीकसंज्ञकमहायोगः पक्षच्छिद्रोत्पन्नो नाडिकादोषान् हन्ति, यथा श्येनो निःसंशयेन पक्षिगणान् हन्ति। गुणशेखरसंज्ञकयोगो रविवारादिसम्भवान् पापयोगान् हन्ति, यथा पुरुषः स्त्रीरजांसि हन्ति। मृत्युयोगो दिनसमये मृत्युदो न च रात्रिषु। धूर्जटियोगो मृत्युयोगं नाशयति, यथा सन्निपातो नरं नाशयति। गुणभास्करयोगो दिने(केवलं) रोगप्रदः, यथा मेहरोगिणः स्त्रीसङ्गः। महाहलाहलसंज्ञकयोगो गुणपार्श्वसंज्ञकयोगं हन्ति, यथा बली राहुस्तारापतिं चन्द्रं ग्रासयति। महाकाणान्धबधिरादियोगाश्चन्द्रशेखरयोगं नाशयति, यथा मेघचयं चण्डमहानिलः। गुणमर्दनयोगः श्रीवत्सयोगं हन्ति, यथा विप्रनिन्दा स्वार्जितं धर्मसञ्चयम्। रविवारादिसम्भूताः कालकूटविषाह्वया योगाः सिंहयोगं हन्ति, यथा गुरुनिन्दा जीवितं नाशयति। शार्दूलयोगो

धूमयोगं हन्ति, यथा क्रोधस्तपोराशिं चिरकालमुपार्जितम्। व्यतीपातान्तरालोत्पन्नदोष इन्द्रयोगं तथा लग्नोत्पन्नान् अन्यगुणान् हन्ति, यथा पांशुला स्वकुलं हन्ति। रत्नमालायोगोऽतिभीषण: परिवेधसंज्ञकयोगं हन्ति, तथा लग्नगुणोत्पन्नोऽन्ययोगान् यथा पञ्चगव्यं मद्यलव:। इन्द्रधनुषयोगदोष: कल्पतरुगुणान् हन्ति, यथाश्मरी नामा महारोग: शीघ्रं शरीरं नाशयति। केतुसंज्ञकमहायोगो गुणमणिनामानं योगं सदैव नाशयति, यथा भगन्दरनामा महारोगो देहधारिणं हन्ति। विभीषणाकारो निर्घातसंज्ञकयोगो गुणार्णवमहायोगं हन्ति, यथा मेहरोगो नरम्। मेघदोष: सुदर्शननामा महायोगं हन्ति, यथाजीर्णरोग: शीघ्रमुत्तमं श्रेष्ठं मनुष्यं नाशयति। कुलिकसंज्ञकयोगो गुणसागरयोगं निहन्ति, यथावस्थादोषोऽखिलधातुसमूहान् नाशयति। उल्कासंज्ञकयोगो महाबलवन्तं पुण्ययोगं निहन्ति, यथा स्नुहिवृक्षक्षीरलवो निर्मलं शरीरम्। महाबलवान् विद्युद्दोषो शीघ्रं शुभयोगं हन्ति, यथा गुणानां निचयं शुद्धान्नं लशुनम्। पातचण्डीशोत्पन्नदोष: सिद्धातिथिं तथा महानन्यान् गुणान् हन्ति,यथा श्वा हव्यसञ्चयम्। लत्तादोषो विजयसंज्ञकमहायोगस्तथा लग्नोत्पन्नान्यगुणान् हन्ति, यथा आन्त्रवृद्धिस्तनुम्। निर्घातसंज्ञकयोगो ब्रह्मदण्डनामानं महायोगं हन्ति, यथा क्षीरं मद्यलव:। निर्घातसंज्ञकयोगो ब्रह्मदण्डनामानं महायोगं हन्ति, यथा पिशुन: स्नेहसञ्चयम्। क्षेपयोग: कामधेनुमहायोगं हन्ति, यथा क्षयरोगो विपुलं शुभशरीरं नाशयति। सम्वर्तसंज्ञकमहायोग: प्रभंजननामयोगं नाशयति, यथा महावृक्षं कोटरस्थोऽनल:। महाबलवान् कालदण्ड इन्द्रदण्डमहायोगं हन्ति, यथा कफो रोगो वज्रसन्निभं शरीरम्। एकार्गलसंज्ञकमहायोग इन्द्रदण्डमहायोगं हन्ति, यथा पूर्णगर्भं सन्निपातज्वर:। गण्डान्तसंज्ञकयोगोऽभिजित्संज्ञकयोगं हन्ति, यथा मृगव्याधोऽखिलं पक्षिसंघम्। क्रूरग्रहैर्विद्धदोषो गोधूलिकं शुभं हन्ति, यथा महोदररोगो दृढतरं कायम्।[२९३]

---

२९३ व.सं. श्लो. ३६ त: ८२

अमावस्यातिथिः शुभग्रहकृतं शुभफलं तथा च लग्नलग्नांशकगुणान् हन्ति सत्तनुं राजयक्ष्मेव। ग्रहजन्मदोषः शुभलग्ने स्थितस्य गुरोः शुभफलं हन्ति, यद्वन्महाबलवान् राहुस्तारापतिं हन्ति। प्रतिसूर्य- लग्न-लग्ननवांशोत्पन्नः शुभयोगान् शीघ्रं नाशयति, यथा कुठारो विटपम्। प्रतिचन्द्रप्रतिशुक्रकृतशुभं तथा लग्नषड्वर्गसम्भूतः शुभफलान् हन्ति, यथा मेघसंघमनिलः। परिवेषसंज्ञकदुष्टयोगः, लग्न-लग्ननवांशोत्पन्नान् गुणान् तथा च शुभग्रहकृतशुभफलान् निहन्ति, यथा मक्षिकाभोजनम्। नीहारदोषो लग्नकृतान्, सौम्यग्रहकृतान् शुभफलान् हन्ति, यथा श्राद्धं वृषलीपुत्रकः। अकालवृष्ट्युत्पन्नदोषः सकलान् गुणसञ्चयान् निहन्ति, यथा पांशुला नितरां स्वकुलं महत्। अकालगर्जितो दोषः सकलान् गुणसञ्चयान् निहन्ति, यथा मेघवृन्दं तारकामण्डलम्। दिग्धूमसंज्ञकदोषः सकलान् गुणसञ्चयान् निहन्ति, यथा दुर्वाससः शापो गर्वितसुरेन्द्रम्। दग्धलग्नोत्पन्नदोषः सकलान् गुणसञ्चयान् निहन्ति, यथा महावह्निरिन्धनानां सञ्चयम्। शून्यनक्षत्रोत्पन्नदोषः सकलान् गुणसञ्चयान् निहन्ति, यथा महावृष्टिः सकलभूतसञ्चयम्। शून्यतिथेर्जातो दोषः सकलं गुणसञ्चयं निहन्ति, यथा वैनतेयः सर्वं महत् सर्पकुलम्। सर्वे मण्डनाध्यायगुणापवादाश्चिन्तनीयाः। सम्पूर्णगुणापवादः कथितः। दोषापवादः कथ्यते। प्रबलदोषा अपि कलौ युगे सीदन्ति। कारणं दोषाः सदैव पापरूपास्तथा च गुणाः सदा पुण्यरूपाः। आलस्योपहतः पादः, पादः पाखण्डमाश्रितः, पादो राजानं सेवते, पादः कृषिमुपाश्रितः। एकं पादं त्रयः पादा दिने दिने भक्षयन्ति। तथापि पादा वर्धन्ते, यद्यपि पादत्रयं क्षीणतां याति। यथा दैत्या देवताद्वारा हृताः, तद्वत् समस्तदोषा विविधयोगोत्पन्नाः शुभग्रहोत्पन्नाः, लग्नोत्पन्नास्तथा षडवर्गोत्पन्नगुणानां कारणेन नष्टा भवन्ति। यत्र गुणैर्विपरीतदोषनाशनोल्लेखः, तत्र नामतो निर्देशो ज्ञेयः। नान्यत्र। तत्रैव परस्य च प्रशंसां कुर्यात्। उत्पातयोगेनोत्पन्नो दोषो निश्चयेन चरयोगं हन्ति, यथा महाबली सिंहो गजसमूहान् नाशयति। महाबली श्रेष्ठयोगो मृत्युयोगं निहन्ति, यथा

भास्करस्योदयस्तिमिरं नाशयति। शुभयोगोऽन्धयोगोत्पन्नदोषान् निश्चयेन नाशयति, यथा जन्मशतोद्भवं पापं हरिकथालापः। कल्याणदोषः काणयोगकृतदोषं हन्ति, यथा शार्दूलो मृगसंहतिमिव। वर्धमानकयोगः पङ्कयोगं निहन्ति, यथा महाबलः श्येनो काकानां संहतिम्। सुधायोगो बधिरसंज्ञकयोगं निहन्ति, यथा महाबलो वैनतेयो भुजङ्गसंहतिम्। महायोगो राक्षसयोगोत्पन्नदोषान् निहन्ति, यथा दाशरथेः शरो दैत्यानां संहतिम्। महाबलो महायोगो दग्धयोगोत्पन्नदोषान् निहन्ति, यथा पञ्चाक्षरी मन्त्रः कोटिजन्मकृतं महापापं नाशयति। पूर्णयोगो ग्रहजन्मकृतदोषान् निहन्ति, यथा महादावानलः सम्पूर्णवनं नाशयति। महाबलः शङ्खयोगो गदायोगदोषं निहन्ति, यथामितविक्रमी मार्जार आखून् शीघ्रं नाशयति। अमृतसंज्ञकयोगो ग्रहैः कृतं मृत्युयोगं नाशयति, यथा संजीवकमन्त्रो विषसमूहान् नाशयति। पद्मयोगोऽग्निजिह्वद्वयं निहन्ति, यथा धनरहितो बलसम्पन्नो गुरुः सर्वकुलमुद्धरति। आनन्दसंज्ञकयोगो विपद्योगं निहन्ति, यथैकादशीव्रतं जन्मशतोद्भवं पापं नाशयति। सिद्धियोगो नक्षत्रसन्धिकृतदोषान् निहन्ति, यथोद्धतवायुर्भृशं सञ्चयान् नाशयति। सिद्धा तिथिः स्वयं योगान्तरालकं दोषं हन्ति, यथा भागीरथी जलं जन्मशतोद्भवं पापं नाशयति। यद्वन्मासान्तत्रिदिनं दोषो गुणकोटिभिर्वषैर्न भवति, तद्वद्वर्षान्ते पक्षदोषोऽपि न सीदति। उपप्लवनक्षत्रोत्पन्नदोषः, उत्पातनक्षत्रोत्पन्नदोषः, पापग्रहैर्विद्धनक्षत्रदोषस्तथा च पापराशौ स्थितनक्षत्रदोषः– एते चत्वारो दोषा अत्यन्तबलिनः कथिताः। एते चत्वारो दोषाः सर्वदा गुणानां कोटिकोटिभिर्नैव सीदन्ति। सिद्धियोगो महाशूलसंज्ञकदोषं नाशयति, यथा कृष्णाष्टमी व्रतं जन्मशतोद्भवं पापं नाशयति। पीयूषसंज्ञकयोगो दुष्टयोगोत्पन्नदोषान् शीघ्रं नाशयति, यथा सुदर्शनमहाचक्रं राक्षसानां क्षयं करोति। कपिलसंज्ञकयोगः शकटयोगं हन्ति, यथा शङ्करस्य तृतीयनेत्रोद्भवानलः कामदेवं नाशयति। समुद्रसंज्ञकयोगोऽनिलसंज्ञकयोगदोषान् निहन्ति, यथा महावायुर्महद् वारिवाहचयम्। गुरुशुक्रयोः स्वोच्चराशौ मित्रराशौ स्थितत्वे मृत्युतुल्यमहादोषं विनाशयति।

वापीयोगो महाकुलिकयोगदोषं निहन्ति, यथा महानकुलसमूहाः सर्पाणां समूहान् नाशयति। अमृतयोगो हालाहलयोगदोषं निहन्ति, यथा भागीरथी स्नानं जन्मशतोद्भवं पापं नाशयति। पुण्डरीकयोगः पक्षच्छिद्रोक्तनाडीनां दोषं हन्ति, यथा भगवान् शङ्करस्त्रिपुरं हन्ति। गुणशेखरयोगो रविवारादिसम्भूतपापयोगान् निश्चयेन हन्ति, यथा राघवो रावणं हन्ति। महाबली धूर्जटियोगो दिवैव मृत्युदयोगं हन्ति, यथा पावक इन्धनसमूहान् नाशयति। महाबली गुणभास्करयोगो दिवैव रोगदयोगं हन्ति, यथा पावको विपिनम्। गुणभास्करयोगो महाहलाहलयोगं हन्ति, यथा कार्त्तिकेयस्तारकासुरं हन्ति। चन्द्रशेखरयोगो महाकाणान्धबधिरान् योगदोषान् हन्ति, यथा भगवान् श्रीरामो वालिनं हन्ति।श्रीवत्ससंज्ञकयोगो गुणमर्दनयोगाख्यं हन्ति, यथा प्रबलोऽनिलः प्रचण्डमहावृक्षान् नाशयति। सिंहयोगो रविवारादिसम्भूतान्कालकूटाख्ययोगान् हन्ति, यथा पञ्चाक्षरी मन्त्रः पापं हन्ति। शार्दूलयोगो धूमयोगदोषान् हन्ति, यथा श्रेष्ठब्राह्मणः पातकं नाशयति। सिद्धियोग उपग्रहयोगदोषान् निहन्ति, यथा बलातैलमर्दनेन वातरोगो नष्टो भवति। इन्द्रयोगो व्यतीपातयोगदोषान् शीघ्रं सदैव नाशयति, यथा ब्रह्मवादी सांसारिकसुखान् नाशयति। महाबलो वा रत्नमालायोगः परिवेषाख्ययोगदोषान् निहन्ति, यथा भगवान् शङ्करस्त्रिपुरासुरं हन्ति। कल्पतरुयोग इन्द्रधनुषाख्यं तथा च महाबलवान् बाणयोगदोषान् निहन्ति, यथा कुपुत्रः स्वकुलं हन्ति। महाबलवान् गुणमणियोगो वातसंज्ञकयोगदोषान् निहन्ति, यथा प्रणवः(ॐकारोच्चारणं) पापसञ्चयं हन्ति। गुणार्णवयोगो निर्घातसंज्ञकयोगोत्पन्नदोषान् निहन्ति, यथा निरन्तरहरिस्मृतिः पापसञ्चयान् हन्ति। सुदर्शनो महायोगो निर्घातसंज्ञकयोगोत्पन्नदोषान् निहन्ति, यथा भगवतः शङ्करस्य नमनं पापसंचयं नाशयति। गुणसागरयोगः कुलिकसंज्ञकयोगोत्पन्नदोषं निहन्ति, यथा हिङ्ग्वादिको महारोगं नाशयति। महाबलो पुण्ययोग उल्कायोगोत्पन्नदोषान् निहन्ति, यद्वत् श्वेतार्कमूलकमश्मरीसंज्ञकरोगं हन्ति। शुभयोगा महाबलिनं विधुदोषं निहन्ति, यथा स्नुहिक्षीरं

महोदरव्याधीन् नाशयति। सिद्धा तिथिश्चण्डायुध-चण्डीशयोगोत्पन्नदोषान् निहन्ति, यथा सुदृढकाया आन्त्रवृद्धिं नाशयति। विजयाख्यो महादोषो लाक्षादोषं हन्ति, यथा बली शिग्रुमूलं नयनजपुष्पं हन्ति। ब्रह्मदण्डयोगो निर्घातसंज्ञकयोगोत्पन्नदोषान् निहन्ति, यथा वीरसंयुतं नलजं नेत्ररोगं नाशयति। कामधेनुर्महायोगो धूम्रयोगं निहन्ति, यथा महाबली कल्याणघृतमुन्मादरोगं हन्ति। ब्रह्मदण्डयोगः क्रकचसंज्ञकयोगोत्पन्नदोषान् निहन्ति, यथा गण्डीरो राजरोगं(क्षयरोगं) हन्ति। प्रभञ्जनो महायोगः संवर्तकसंज्ञकयोगोत्पन्नदोषान् निहन्ति, यथा शतावरीघृतं मूत्रकृच्छं हन्ति। इन्द्रदण्डी महायोगो महाबलिनः कालदण्डोत्पन्नदोषान् निहन्ति, यथा त्रिकटुकमौषधं कासश्वासरोगान् नाशयति। इन्द्रदण्डयोग एकार्गलमहादोषान् निहन्ति, यथा भगवान् शङ्करः कालकूटविषं हन्ति। अभिजित्संज्ञकयोगः सम्पूर्णगण्डान्तदोषान् हन्ति, यथा नृपस्य राजसूययज्ञः सम्पूर्णपापं नाशयति।[२९४]

गोधूलिको महायोगो पापग्रहैर्विद्धनक्षत्रदोषान् निहन्ति, यथा लक्ष्मीपतेः स्मृतिः सम्पूर्णपापसमूहान् नाशयति। केन्द्रे स्थिताः शुभग्रहास्त्रिद्युस्पृग्दोषं सदैव हन्ति, यथाशून्यशयनव्रतं पापसमूहान् नाशयति। केन्द्रे स्थिताः शुभग्रहाः प्रतिसूर्यनामदोषं हन्ति, यथा पिशुनः सकलं स्नेहसञ्चयं नाशयति। लाभस्थाने स्थितश्पूर्णचन्द्रमाः प्रतिचन्द्रकृतं दोषं हन्ति, यथा सुलब्धाध्यापको द्विजः पापसमूहान् नाशयति। त्रिषडायगतो रविः(३-६-११ वा स्थाने स्थितः सूर्यः) नीहारदोषं हन्ति, यथाम्लरसो क्षीरचयं नाशयति। केन्द्रे स्थिताः शुभग्रहा अकालगर्जितदोषं हन्ति, यथा शङ्करस्य पाशुपतास्त्रं राक्षसं हन्ति। महाबली गुरुरकालवृष्ट्योत्पन्नदोषं हन्ति, यथा भगवतो रामस्य शरः खरनामानमसुरं हन्ति। लाभस्थाने गताः शुभग्रहा दिग्धूमनामानं दोषं हन्ति, यथा हरेः पादोदकं पापसमूहान् नाशयति। षड्वर्गोत्पन्ना बलिनः शुभग्रहाः परिवेषकृतं दोषं हन्ति, यथा व्रतिनः पापांशसंस्थितस्य चन्द्रस्य

---

२९४ व.सं. श्लो. ८३ तः १५४

दोषं नाशयति। दशम-एकादशस्थाने स्थितश्चन्द्रमा महाप्रभञ्जनदोषं हन्ति, यथा शिवरात्रिव्रतं पापसञ्चयान् हन्ति। लाभस्थाने गतो भौमो दग्धलग्नोद्भवदोषं हन्ति, यथा कृष्णाष्टमीव्रतं महापापं नाशयति। षष्ठस्थाने स्थितो भौमः शून्यनक्षत्रोत्पन्नदोषं हन्ति, यथा तप्तकृच्छव्रतं महापापं नाशयति। लाभस्थाने स्थितः शुभग्रहः शून्यतिथेर्जातं दोषं हन्ति, यथा कृच्छ्रसान्तपनं व्रतं महापापं नाशयति। सिद्धा तिथिः स्वयं त्रिद्युस्पृग्दोषं हन्ति, यथा दावानलो सम्पूर्णवनं नाशयति। गुणा दोषापवादैः शमं यान्ति, किन्तु कदाचिद्गुणकोटिभिर्महादोषाः शमनं न यान्ति। अतो गुणाश्च दोषाश्च गुणापवादान्दोषापवादांश्च सम्यग्विचिन्त्य दैवज्ञो मङ्गलेषु खलु गुणाधिकं दोषानामल्पकालं कथयेत्।[२९५]

## १.५.१५ वर्षेशादिनिर्णयफलाध्यायः

वृद्धवसिष्ठसंहिताग्रन्थ एकादशाध्याये वर्षेशादिफलनिर्णयनामके पञ्चाशत्(५०)श्लोकाः सम्मिलिताः।

ब्राह्मं-दिव्यं-मानवं-पित्र्यं-सौरं-चान्द्रं-गौरवं-सावनं-नाक्षत्रम्- एतानि नवमानानि सन्ति, तेषां प्रयोजनं पृथक् पृथग्वर्तते। ब्राह्ममानेन विज्ञानविधौ नित्यमायुः प्रमाणिता। तद्वन्मानव-पित्र्य-चान्द्रादिमानं विजानीयात्। प्रभवादिषष्ठ्यब्दफलं गुरोर्मानतो ज्ञेयम्। यन्मासे सूर्यस्तप्तो भवति, तथा चाद्यलवे वासवस्तारकायां दृश्येत्, दिनस्य संक्रान्तिवशात् सौरं तथा च सूर्यस्य भगणभ्रमणेन नाक्षत्रमानम्, त्रिंशद्दिनानि सावनमानस्तथा मासाद्यारभ्यामावास्यापर्यन्तं चान्द्रमानं कथ्यते। दिनप्रमाणेनायनं तथा सम्पूर्णसंक्रान्तिकालस्य निर्णयं कारयेत्। कृतादिमानं सम्पूर्णसूर्यादिग्रहाणां प्रमाणतः सौरमानप्रमाणेन विगृह्यते। सूर्यस्य

---

२९५ व.सं. श्लो. १५५ तः १७२

सम्यक्स्थित्यनुसारेण नाक्षत्रमानं निरीक्षितव्यम्। नृगर्भवृद्धिः, प्रबल-ऋतुकालस्तथा सूतकादिनिर्णयः सावनमानेन कर्तव्यः। विवाहः, यज्ञोपवीतं, प्रतिष्ठा, तिथिः, व्रतं, क्षौरं, महोत्सवादिपर्व, वास्तुगृहप्रवेशादिनिर्णयश्चान्द्रमानेन कर्तव्यः।[२९६]

चैत्रशुक्लप्रतिपद्दिने यो वारः स्यात्, तद्वारस्वामी वर्षस्य नृपः स्यात्। सूर्यस्य मेषसंक्रमणदिने यो वारः स्यात्, तद्वारस्वामी वर्षस्य मन्त्री भवेत्। सूर्यस्य कर्कसंक्रान्तिदिने यो वारः स्यात्, तद्वारस्वामी सस्याधिपतिर्भवेत्। सूर्यस्य तुलासंक्रान्तिदिने यो वारः स्यात्, तद्वारस्वामी रसाधिपतिर्भवेत्। अत एतेषां चतुर्णां पृथक् पृथक् फलं कथयेत्।[२९७] मेषसंक्रमणदिने यो वारः स्यात्, स वर्षाधिपतिस्तथा चैत्रमासस्य शुक्लप्रतिपद्दिने यो वारः स्यात्, तद्वारस्वामिनं सेनापतिं विजानीयात्। हूण – वङ्ग – खश – मागध – पौण्ड्रदेशेषु वर्षाधिपतिसेनापतयोः प्रभावः स्यात्।[२९८]

**सूर्यादिग्रहाणां राजफलम् —**

वर्षाधिपतिर्यदि सूर्यः, तदा मध्यमवृष्टिप्रदानं करोति। मध्यप्रभवनक्षत्रगणास्तथा चन्द्रमा आकाश आच्छादितो भवति। निखिलनृपगणाः शत्रोर्वधोत्सुकास्तदर्थमुद्यमं कुर्वन्ति। तथा पृथिव्यामुपर्यनेकबलवन्तो योद्धारो नित्यं विचरन्ति। वर्षाधिपतिर्यदि चन्द्रमास्तदा धरित्री गोधूमशालीक्षूमती च भवति। विचित्रपुष्पैर्युता यज्ञा वेदनादैर्विभान्ति। गावः पयसा प्रभूतं दुग्धं ददति। वर्षाधिपतिर्यदि भौमस्तदा धरित्री चौराग्निशत्रुगणयुता भवति। नृपगणाः परस्परं युद्धं कुर्वन्ति। जना रोगेण पीडिता भवन्ति। तथा सस्यं जलेन परिपूर्णं भवति। वर्षाधिपतिर्यदि बुधस्तदा धरित्र्यामुपरि वायुः प्रभूतो भवति। मध्यमा वृष्टिर्भवति। जना रोगेण, राजकोपेन

---

२९६ व.सं. श्लो. १ तः ७
२९७ व.सं. श्लो. ८,९
२९८ व.सं. श्लो. १०

पीडिता भवन्ति। सस्यं श्रेष्ठं भवति। तथा लिपिकाराणां लेखकानां वृद्धिर्भवति। वर्षाधिपतिर्यदि गुरुस्तदा भूपतिर्विप्राणां सह यज्ञकार्यार्थे तत्परो भवति। नृपः प्रजापालनशीलयुक्तो भवति। मध्यमा वृष्टिर्भवति। सर्वे दोषा लयं यान्ति। तथा समस्तप्रजाः स्व-स्वकर्मसक्ताः स्युः। वर्षाधिपतिर्यदि शुक्रस्तदा नानाविधोद्यान-तडाग-वापी-कूपादिजलाशया जलेन परिपूर्णा भवन्ति। सम्पूर्णपृथ्वी सस्यपूर्णा । ब्राह्मणक्षत्रियैः पृथ्वी शोभमाना भवति। वर्षाधिपतिर्यदि शनिस्तदा मध्यानि सस्यानि, विचित्रा वृष्टिर्भवति। जनाश्चौरैः – रोगैः – राजकोपेन च पीडिता भवन्ति। यदुत्तरं सस्यभयं तथा कुधान्यं प्रभूतं स्यात्।[२९९]

**सूर्यादिग्रहाणां मन्त्रिफलम् ---**

यदि सूर्यो मन्त्री, तदा सततं विचित्रवर्णानि सर्वसस्यानि तथा धान्योत्पन्नं भवति। नृपा अत्याधिकं कोपं कुर्वन्ति। वन-वाटिकया पीडिता भवन्ति। यदि चन्द्रमा मन्त्री, तदा धरित्री नानाविधसस्येन पूर्णा भवति। ब्राह्मण-सज्जन-पशूनां वृद्धिर्भवति। कानन-फल-पुष्प-जल(तोय)-जन्तूनां वृद्धिर्भवति। यदि भौमो मन्त्री, तदा दहन-प्रहरण-रोगाणामेवं वायुविकाररोगाणामतुला भीतिः स्यात्। तथा सस्यसञ्चयं शोषं समुपैति। यदि बुधो मन्त्री तदा निरन्तरं प्रभूतवायुर्वाति। धरित्री मध्यमफलदा विभाति तथा देव-देवीसमाना शोभायमाना भवन्ति। यदि गुरुर्मन्त्री, तदा सुवृष्टिकारणेन धरित्री बहुसस्यपूर्णा भवति। समस्तजगज्जलेन परिपूर्णं भवति, तथा नृपा युद्धकार्यार्थमुद्यमं कुर्वन्ति। यदि शुक्रो मन्त्री, तदा जना मार्गे सततं उच्चालिताः स्युः। विप्रा यज्ञकार्यार्थमुद्यमं कुर्वन्ति। तथा समस्तजना

---

२९९ व.सं. श्लो. ११ तः १७

हृदयेऽनिमिषमानन्दमनुभवन्ति। यदि शनिर्मन्त्री, तदा वारिधरा वारि न मुञ्चन्ति। तथा आकाशं सदैव प्रभया रहितं दृश्यते।[300]

## सूर्यादिग्रहाणां धान्याधिपफलम् —

यदि सस्याधीशः सूर्यस्तदा भूमौ विरलानि सर्वसस्यानि भवन्ति। ईतिभयमतिविपुलं स्यात्। कुलित्थ-चणकादिकं सम्पूर्णमुत्पन्नं भवति। यदि सस्याधीशश्चन्द्रमास्तदा सम्पूर्णपृथ्वी सुविस्तृता, रमणीया दृश्यते। तथा च फल-पुष्प-सस्य-वारिभिरमिता वृद्धिर्भवति। यदि सस्याधीशो भौमस्तदा भुवि सर्वे महोष्णभयात् पीडिता भवन्ति। सस्यनिचया सीदन्ति। क्वचित् क्वचित् शस्त्रभयं भवति। यदि सस्याधीशो बुधस्तदाग्निना कारणेन सस्यं नष्टं भवति। अत्यधिक –मध्यमवृष्टिर्भवति। तथा चापरधान्यं विपुलमुत्पन्नं भवति। यदि सस्याधीशो गुरुस्तदा पृथिवी बहुविधसस्यार्घसम्पूर्णा भवति। तथा च टङ्कणमागधदेशे मध्यमसस्यार्घवृष्टिर्भवति। यदि सस्याधीशः शुक्रस्तदा पृथिवी बहुविधफलपुष्पसम्पूर्णा भवति। जगति देवकृपया समस्तजनाः पृथिव्यां शोभायमानाः सन्ति। यदि सस्याधीशः शनिस्तदा क्षितितले मध्यमसस्यं राजभयं च विद्यते। कोद्रव-कुलित्थचणका माषा मुद्गाश्च विपुलमात्रया समुत्पन्ना भवन्ति।[301]

## सूर्यादिग्रहाणां रसेशफलम् —

यदि सूर्यो रसेशस्तदा तद्वर्षे चन्दन-कुङ्कुम-गुग्गुल-तिलतैल-एरण्डतैलमुख्यानि प्रचुरमात्रया भवन्ति। यदि चन्द्रमा रसेशस्तदा इक्षुविकारः, क्षीरविकारः, सर्वतैलानां विकारः

---

३०० व.सं. श्लो. १८ तः २४
३०१ व.सं. श्लो. २५ तः ३१

स्यात्। तथा च गन्धयुतानि सर्वाणि सुलभानि भवन्ति। यदि भौमो रसेशस्तदा चन्दन-कर्पूर-कुङ्कुमानि, सर्वे रसनिचयास्तथा मधुरवस्तूनि दुर्लभाणि भवन्ति। यदि बुधो रसेशस्तदा पिप्पली-शुण्ठी-हिङ्गुल-लशुनानि घृततैलादिकमिक्षूद्भवसकलवस्तूनि दुर्लभाणि सन्ति। यदि गुरू रसेशस्तदा चन्दन-कर्पूर-कन्दमूलानि रसानि सुलभानि सन्ति। तथा चाखिलानि कुङ्कुमाद्यानि सीदन्ति। यदि शुक्रो रसेशस्तदा सुगन्धवस्तूनि निर्गन्धवस्तूनि रसादिकानि, सम्पूर्णक्षाराणि कन्दमूलफलानि तथा च बहूनि पुष्पाणि जायन्ते। यदि शनी रसेशस्तदाखिलानि रसान्येव धरित्र्यां सुदुर्लभानि भवन्ति। तथा च सुगन्धवस्तूनि घृत-इक्षु-कन्दमूलानि तथा चान्यानि वस्तूनि पृथिव्यां सुलभानि भवन्ति। शकाब्दसङ्ख्यया त्रिभिर्गुणिते सप्तभिर्विभाजिते शेषं प्राप्तं भवति, तच्छेषस्य द्विगुणिता पञ्चयुता वृष्टिर्भवति। शकाब्दसङ्ख्यया त्रिर्भिगुणिते सप्तभिर्विभाजिते यच्छेषं प्राप्तं भवति, तत्क्रमेण धान्य-तृण-शीत-उष्ण-वायु-प्रजा-समृद्धिं तथा नृपाणां क्षयं विजानीयात्। शकाब्दलब्धिक्रमेण पुण्यं तथा पापं ज्ञातव्यम्। एतत्प्रकारेण दैवज्ञः सम्यङ् निरीक्ष्य प्रतिवर्षमेवं सम्यक् फलं वदेत्।[३०२]

स्वस्वामिवर्षाधिपो वत्सरैस्त्रिगुणिते, पञ्चयुते पञ्चदशभाजिते यच्छेषं भवति, तच्छेषमितो व्ययः स्यात्। क्षुधादिनिर्णयार्थे शकाब्दसङ्ख्यया चतुर्गुणिते सप्तभिर्भाजिते यच्छेषं लब्धं भवति, तच्छेषं द्विगुणीकृत्यैकेन मिश्रयेत्(योगं कृते), तेन क्षुध्-तृट्-निद्रा-आलस्य-उद्यम-शान्ति-क्रोध-लोभ-भेद-मैत्री -आदिकं ज्ञेयम्। तथा चाभीष्टशकाब्दं त्रिगुणिते सप्तभिर्भाजिते यल्लब्धं भवति, तेन त्रिभाजित उत्साहपुण्यपापानि यथाक्रमं ज्ञेयानि। तथा च शेषं द्विगुणीकृते पञ्चयुते क्रमेण वृष्टि-अन्न-तृण-शीत-तेजः -वायुसंज्ञका भवन्ति। एतत्प्रकारेण सर्वलोकानां विग्रहश्च पुनः पुनर्ज्ञायते।[३०३]

---

३०२ व.सं. श्लो. ३२ तः ३८

३०३ व.सं. श्लो. ३९ तः ४४

शकाब्दसङ्ख्यया चतुर्गुणिते सप्तभिर्विभक्ते यल्लब्धं भवति, तेन चतुर्भाजिते यच्छेषं भवति, तच्छेषः पुनर्द्विगुणित एकेन मिश्रिते तदा प्राग्वत्प्रजायते। यथा क्षुध्-तृट्-निद्रा-आलस्य-उद्यम-इत्यादीनि। शकाब्दसङ्ख्यया पञ्चभिर्गुणिते शेषलब्धं पञ्चभाजिते क्रमेण क्रोध-दण्ड-भेद-इच्छाग्नि-रसा ज्ञेयाः। यच्छेषं भवति, तत्पुनर्द्विगुणिते पञ्चयुते शेषं सौख्यं भयं क्लेशं युद्धं तथा वातोत्सवो ज्ञेयः। शकाब्दसङ्ख्यया सप्तगुणिते नवभाजिते यच्छेषं लब्धं भवति, तेन द्विगुणिते त्रिभिर्युते क्रमेण शलभ-मूषक-दैविक-हिम-ताम्रभयं स्वचक्रं तथा परचक्रं ज्ञेयम्।[३०४]

---

३०४ व.सं. श्लो. ४५ तः ५०

SMT. HAN... LIBRARY
The M.S. University ... Baroda

# खगोले सूर्यादिग्रहाणां स्थितिः




From: Internet www. google




नवग्रह, गीताप्रेस, गोरखपुर, पृ. ३

## १.५.१६ अर्कचाराध्याय :

वृद्धवसिष्ठसंहिताग्रन्थे द्वितीयाध्याय अर्कचारानामके पञ्चविंशति(२५)श्लोकाः सम्मिलिताः।

जगति शुभाशुभज्ञानार्थं, क्षयाधिमासनिर्णयः, विवाह-संक्रान्ति-दिनार्धनिर्णयः, एवं सर्वप्रपञ्चोऽर्कचाराधीनः स्यात्। मकरादिषड्राशयः(मकर-कुम्भ-मीन-मेष-वृषभ-मिथुनराशयः) उत्तरायणं कथ्यते। कर्कादिषड्राशयः(कर्क-सिंह-कन्या-तुला-वृश्चिक-धनु-राशयः) दक्षिणायनं कथ्यते। शिशिरादिक्रमेण षड्ऋतव अर्कस्य भोगः कथितः। तत्र ऋतुकालः सूर्यस्य राशिद्वयभोगकालः कथ्यते। यत्समये सूर्यो मकरकुम्भराश्योः स्थितः, तदा शिशिर-ऋतुः कथ्यते। यत्समये सूर्यो मीनमेषराश्योः संस्थितः, तदा वसन्त-ऋतुः कथ्यते। यत्समये सूर्यो वृषभमिथुनराश्योः संस्थितः, तदा ग्रीष्म-ऋतुः कथ्यते। यत्समये सूर्यः कर्कसिंहराश्योः संस्थितः, तदा वर्षा-ऋतुः कथ्यते। यत्समये सूर्यः कन्यातुलाराश्योः संस्थितः, तदा शरद्-ऋतुः कथ्यते। यत्समये सूर्यो वृश्चिकधनराश्योः संस्थितः, तदा हेमन्त-ऋतुः कथ्यते।[३०५]

मेषादिद्वादशराशयश्चैत्रादिमासक्रमेण स्युः। अथ क्रान्तिवृत्तस्य द्वादशभागा विभाजिता द्वादशराशयो भवन्ति। तत्र आद्या राशिर्मेषराशिः स्यात्, तदनन्तरं वृषभ-मिथुन-कर्क-सिंह-कन्या-तुला-वृश्चिक-धनु-मकर-कुम्भ-मीन-एता द्वादशराशयो भवन्ति। एतत्प्रकारेण चैत्रमासादारभ्य कृतस्तदनन्तरं वैशाख-आषाढ-श्रावण-भाद्रपद-अश्विन-कार्त्तिक-मार्गशीर्ष-पौष-माघ-फाल्गुन- एते द्वादशमासाः कथिताः। प्रत्येकमासे सूर्यस्य राशिसंक्रमणं स्यात्। चैत्रमासकाले सूर्यः मेषराशौ स्थितः, वैशाखमासे वृषभराशौ स्थितः, ज्येष्ठमासे मिथुनराशौ स्थितः- एवंप्रकारेणान्येषां ज्ञेयम्। क्षयाधिमासेषु समागतेषु नियतमर्कचारवशतो विनापि

---

३०५ व.सं. श्लो. १,२

चलन्ति। सर्वेषु मासेष्वधिमासः स्यात्। किन्तु क्षयमासस्तुलादित्रयमासः कथितः। अथ कार्त्तिकादित्रयमासेषु क्षयमास उक्तः। अधिमासात् पूर्वभवो संसपर्कः, तथा पश्चादंहस्पतिरिति नाम्ना कथ्यते। एकस्मिन्मासस्य अमावास्यातो द्वितीयमासस्यामावस्यामुल्लङ्घ्य सूर्यस्य संक्रान्तिर्भवेत्, तदा यो मासः स अधिकमासः कथ्यते। यस्मिन् चान्द्रमासे सूर्यस्य संक्रान्तिर्न भवेत्, तदा स अधिमासः कथ्यते। आद्यन्तदर्शयोर्मध्ये तयोराद्यन्तयोर्यदा द्वितीयसंक्रान्तिर्भवेत्, एकस्मिन् चान्द्रमासे सूर्यस्य द्विवारं संक्रमणं स्यात्, तदा क्षयमासो भवेत्। यज्ञोपवासतीर्थयात्राविवाहकर्मादिकृतं नष्टं भवति।[३०६]

यदि सूर्योऽश्विनीभरणीनक्षत्रयोः स्थितस्तदा वृष्टिर्भवेत्, या जनानां क्षेमकरी भवति। यदि सूर्यः कृत्तिकानक्षत्रे स्थितः, तदा वृष्टिर्भवति। यदि सूर्यः रोहिणीमृगशीर्षनक्षत्रयोः स्थितः, तदातुलसुभिक्षं भवति। यदि सूर्यस्यार्द्रानक्षत्रप्रवेशकाले वृष्टिर्भवति, तदा ईतिभयं तथानर्घता स्यात्। शेषेषु पादत्रितयेष्वल्पवृष्टिस्तथा महद्रोगभयं स्यात्। सूर्यस्यार्द्रानक्षत्रप्रवेशो यदि दिने स्यात्, तदा जगति विपत्तिर्भवति। सस्यस्य नाशस्तथा स्वल्पवृष्टिर्भवति। यदा रात्रौ प्रवेशः, तदा क्षेमं, सुभिक्षं, सस्यवृद्धिस्तथात्यन्तं जनानुरागो भवति। यदि सूर्यः पुनर्वसुतः दशकेषु नक्षत्रवृन्देषु (पुनर्वसु–पुष्य–आश्लेषा–मघा–पूर्वाफाल्गुनी–उत्तराफाल्गुनी–हस्त–चित्रा–स्वाती–विशाखा) स्थितः, तदा जनानां प्रीतिर्भवेत्। किन्तु नृपाणां कलहो भवति। यदि सूर्योऽनुराधानक्षत्रतो नक्षत्रत्रयेषु(अनुराधा–ज्येष्ठा–मूलनक्षत्रेषु) स्थितो तदा जना नीरोगिणः भवेयुः। यदि सूर्यः पूर्वाषाढानक्षत्रे स्थितः, तदा तत्सार्धं त्रितयेषु दिनेषु विद्युत्–मरुत्–जलघनैश्च युक्ते वृष्टिः स्यात्। यदि सूर्य उत्तराषाढा–श्रवण–धनिष्ठा–शतभिषा–पूर्वाभाद्रपदा–उत्तराभाद्रपदादिनक्षत्रेषु स्थितः, तदा सुभिक्षं स्यात्।

---

३०६ व.सं. श्लो. ३ तः ७

यदि सूर्यो रेवतीनक्षत्रे स्थितः, तदा छत्रभङ्गः स्यात्।[३०७]

राहोः पुत्रास्तामस-कीलकादिनामानो यदि कबन्ध-काक-उष्ट्र-शृगालरूपेण सूर्यमण्डलोपरि दृश्येयुः, तदा हयमातङ्गनृपभीतिरिति फलं ज्ञेयम्। यदि छत्र-ध्वज-अंकुश-गो-वृष-अश्व-दण्ड-अस्त्र-भद्रासन-सिंहरूपादिचिह्नं रविमण्डलोपरि दृश्येयुः, तदा भयप्रदं स्यात्। तथा जगति विपत्तिर्भवेत्। श्वेतवर्णरविमण्डलो द्विजान् हन्ति। रक्तवर्णो रविमण्डलो नृपान् हन्ति। पीतवर्णरविमण्डलो वैश्यान् हन्ति। तथा कृष्णवर्णरविमण्डलः शूद्रान् हन्ति। यदि रविमण्डलं रक्तमूर्ध्वमुखं, तदा सेनापतीनां तथा विचित्रवर्णं तदा पुरोहितानां नाशं करोति। यदि रविमण्डलं धूम्रवर्णसमानमधोमुखम्, तदा नृपनाशकं, वृष्टिकृत् च स्यात्। एवंप्रकारेण मण्डलवर्णतश्च तामसकीलकानां फलमुक्तम्।[३०८]

यदि ग्रीष्म-ऋतुकाले मण्डलवर्णो लोहितवर्णः, तदा लोकानां भीतिदायकः स्यात्। यदि हेमन्त-ऋतुकाले मण्डलवर्णः पीतवर्णः, तदा व्याधिभयं स्यात्। यदि वर्षा-ऋतुकाले मण्डलवर्णः कृष्णवर्णः, तदा वृष्टिकारकः स्यात्। इन्द्रधनुःसमानं सूर्यमण्डलं खण्डितम्, तदा तत्र परस्परं भूपविरोधः स्यात्। यदि सूर्यमण्डलं मयूरपिच्छसमानं कान्तिमद् दृश्येत, तदा द्वादशवर्षपर्यन्तं धरित्र्यां वृष्टिर्न भवेत्। यदि सूर्यमण्डलं शशरुधिरसमं रक्तवर्णं भवेत्, तदा नृपाणां मध्ये परस्परयुद्धं भवति। यदि सूर्यमण्डलस्य वर्णश्चन्द्रसमानवर्णः, तदान्यो राजा भवति। वर्तमाननृपस्य नाशो भवति। यदि सूर्यबिम्बं श्यामवर्णं तदा कीटभयं स्यात्। यदि सूर्यबिम्बं भस्मसमानं कान्तिमत्, तदा जगद्भयमाप्नोति। अर्कस्योदयास्तकाले पक्षं, पक्षार्धमेव वा सततं प्रकटं परिवेषयति यद्युल्कापतनम्, तदा नृपाणां महाभीतिः। यद्युपसूर्यः सन्ध्यासमये दृश्येत्, तदा प्रचुरमात्रायां धननाशः स्यात्। तथा निश्चयेन शीघ्रं सलिलभयमेवं नृपकलहो

---

३०७ व.सं. श्लो.८ तः १३

३०८ व.सं. श्लो.१४ तः १७

भवेत्। सूर्यमण्डलस्य वर्णो यदि वसन्त–ऋतौ कुङ्कुमसमानस्तदा शुभप्रदः। सूर्यमण्डलस्य वर्णः कपिलसन्निभस्तदानन्दप्रदः। सूर्यमण्डलस्य वर्णो यदि शिशिर–ऋतौ ताम्रनिभः कपिलो वा तदा सुभिक्षं भवति। सूर्यमण्डलस्य वर्णो यदि ग्रीष्म–ऋतौ स्वर्णसमानः, विचित्रवर्णसमानस्तदा नृणां क्षेमशुभप्रदश्च भवति। यदि पङ्कजवर्णसमानस्तदा सम्पूर्णजनानां तृप्तिप्रदः स्यात्। सूर्यमण्डलस्य वर्णो यदि वर्षा–ऋतौ कमलपुष्पसमानः शोभनश्च तदा वृष्टिं करोति। तथा सस्यवृद्धिं करोति। यदि सूर्यमण्डलस्य वर्णः शरद्–ऋतौ रक्तवर्णः, तदा विपुलकीर्तिप्रदः, सौभाग्यप्रदश्च । यदि सूर्यमण्डलस्य वर्णो हेमन्त–ऋतौ रक्तवर्णः, तदा सस्य–सम्पत्तिवृद्धिं करोति। एवंप्रकारेण सूर्यस्य चारं ज्ञात्वा पश्चाद् दैवज्ञः सर्वं शुभाशुभमादिशेत्।[३०९]

---

३०९ व.सं. श्लो. १८ तः २५



HANSA MEHTA LIBRARY

नवग्रह, गीताप्रेस, गोरखपुर पृ. ५

## १.५.१७ चन्द्रचाराध्याय :

वृद्धवसिष्ठसंहिताग्रन्थे तृतीयाध्याये चन्द्रचारानामके द्वाविंशति(२२)श्लोकाः सम्मिलिताः।

ग्रहचारेष्वमृतकिरणैर्विपुलः, निखिललोकानां सुन्दरश्च चन्द्रः। तस्य चन्द्रचारस्य सदसत्फलं कथितम्। चन्द्रमाः प्रतिमासं कृष्णपक्षचतुर्दश्यन्तेऽस्तंगतो हीनो भवति। स निरन्तरममावस्यान्ते राश्यादिभिः सततं तुलितो भवति। निर्मलप्रतिपद्यन्ते भास्करान्मुक्तश्चन्द्र उदयं संयाति। तथा सूर्यापेक्षया द्वादशांशविवृद्ध्या चन्द्राच्च तिथयः संभूताः।[३१०]

यदि चन्द्रमा मीन–मेषराश्योः स्थितः, अभ्युदितशृङ्गं याम्यान्नतं भवेत्, तदा सुभिक्षमिति फलं प्राप्नोति। यदि चन्द्रमा वृषभ–कुम्भराश्योः स्थितः,अभ्युदितशृङ्गं समानं तदा समस्तजगति जनानुरागः स्यात्। यदि चन्द्रमा मिथुन–मकरराश्योः स्थितः, अभ्युदितशृङ्गं सौम्योन्नतं भवेत्, तदा मासद्वयपर्यन्तं जनानां स्वास्थ्यं भवति। यदि चन्द्रमाः कर्क–धनुराश्योः स्थितः, अभ्युदितशृङ्गं सौम्योन्नतं भवेत्, तदा क्षेम एवं सुवृष्टिः स्यात्। यदि चन्द्रमा सिंह–वृश्चिकराश्योः स्थितः,अभ्युदितशृङ्गं सौम्योन्नतं भवेत्, तदा सुवृष्टिर्भवति। यदि चन्द्रमाः कन्या–तुलाराश्योः स्थितः,अभ्युदितशृङ्गं सौम्योन्नतं भवेत्, तदा रोगरहितातीववृष्टिर्भवति। एवं चन्द्रस्याभ्युदितक्रमेण जगति क्षेमं सुभिक्षं भवति। तथा विपरीतेनोदिते नृपाणां कलहं तथा च समस्तनाशं करोतीति फलं प्रोक्तम्।[३११]

चन्द्रस्य शृङ्गं यदि व्रीहियवाकारं तदा वृष्टिस्तथा च यदि पिपीलिकाकारं तदा महर्घता, एवं पूर्वोक्तफलनाशो भवति। चन्द्रस्याभ्युदितशृङ्गं विशालं तदा वृद्धिः स्यात्। यद्यभ्युदितशृङ्गं लघु तदानर्घता स्यात्। यद्यभ्युदितशृङ्गमधोमुखं तदा नृपहानिर्भवेत्। यद्यभ्युदितशृङ्गं दण्डाकारं

३१० व.सं. श्लो. १तः३

३११ व.सं. श्लो. ४ तः ७

तदा नृपसमूहानां भीतिर्भवेत्। यदि चन्द्रस्य नूतनं शृङ्गं शनिना वेधितं तदा किरातानां हानिर्भवेत्।

यदि चन्द्रस्य शृङ्गं भौमेन वेधितं तदा क्षुरशस्त्रभीतिरतुला स्यात्। यदि चन्द्रस्य शृङ्गं बुधेन वेधितं तदा दुर्भिक्षं, वृष्टिभयं स्यात्। यदि चन्द्रस्य शृङ्गं गुरुणा वेधितं तदा श्रेष्ठा नृपाः परस्परं युद्धे विलयं यान्ति। यदि चन्द्रस्य शृङ्गं शुक्रेण वेधितं तदा लघुनृपा युद्धे विलयं यान्ति। कृष्णपक्षे प्रजा विकला भवति। शुक्लपक्षे प्रजा विकला न भवति। शुक्लपक्षे यदि शृङ्गस्य वृद्धिस्तदा द्विजानां सततं क्षेमाभिवृद्धिर्भवेत्। किन्तु कृष्णपक्षे शृङ्गस्य वृद्धिस्तदा शूद्रानां वृद्धिः स्यात्। विपरीतेन हानिर्भवेत्।[312]

यत्समये चन्द्रमा पूर्वाषाढा-उत्तराषाढा-मूल-ज्येष्ठा-विशाखा-मृगशीर्ष-चित्रा-अनुराधा-रेवतीनक्षत्राणां दक्षिणभागगतस्तदा जनानामीतिभयमग्निभयं च करोति। राज्येऽतीव दुर्भिक्षं तथा च युद्धं भवति। अनुक्तनक्षत्राणां॰ याम्यभागे स्थितः, तदा नृपाणां कलह एवमत्यधिकवृष्टिः स्यात्। यदि चन्द्रमा रोहिणीं मघानक्षत्रं वा भिनत्ति तदा प्रजानामन्तः प्रलयो वा भवेत्। यदि चन्द्रमा नक्षत्राणामुत्तरभागगतस्तदा जनानुरागं सततं करोति। यदि चन्द्रमा नक्षत्राणां याम्ये गतस्तदाप्रीतिरतीवदुःखं च करोति। रेवतीनक्षत्रतः षण्नक्षत्राणि नाम्ना रेवती(१) अश्विनी(२) भरणी(३) कृत्तिका(४) रोहिणी(५) मृगशीर्ष (६) आर्द्रानक्षत्रतो दशनक्षत्राणि नाम्ना- आर्द्रा(१)-पुनर्वसु(२)-पुष्य(३)-आश्लेषा(४)-मघा(५)-पूर्वाफाल्गुनी(६)-उत्तराफाल्गुनी(७)-हस्त(८)-चित्रा(९)-स्वाती(१०)विशाखा(११)-अनुराधा (१२)ज्येष्ठानक्षत्रतो नवनक्षत्राणि नाम्ना- ज्येष्ठा(१)-मूल(२)-पूर्वाषाढा(३)-उत्तराषाढा-(४)-श्रवण(५)-धनिष्ठा(६)-शतभिषा(७)-पूर्वाभाद्रपदा-(८)उत्तराभाद्रपदा (९) एतानि नक्षत्राणि क्रमेण पूर्वार्ध-मध्यभाग-अपरभागेषु भवन्ति, तेषां विभिन्नं फलम्।

---

३१२ व.सं. श्लो. ८ तः १२

यदि चन्द्रमा उपर्युक्तनक्षत्रेषु पूर्वार्धभागेषु स्थितस्तदा विवाहिता नारी पतिप्रिया स्यात्। यदि मध्यमभागेषु स्थितः, तदा तयोर्नृनार्योः परस्परं प्रेम वर्धते। यदि परभागेषु स्थितस्तदा भर्ता वनिताप्रियः स्यात्। शतभिषा-आश्लेषा-आर्द्रा-ज्येष्ठा-भरणी-स्वातीनक्षत्राणि जघन्यसंज्ञकनक्षत्राणि। तेषु चन्द्रमाः स्थितस्तदा निःसंशयेन अनर्घता स्यात्। पुनर्वसु-विशाखा-उत्तराफाल्गुनी-उत्तराषाढा-उत्तराभाद्रपदा-रोहिणी-एतानि नक्षत्राण्यध्यर्धसंज्ञक-नक्षत्राणि स्युः। तत्र स्थितो धान्यं महर्घं करोति। अश्विनी-कृत्तिका- मृगशीर्ष- पुष्य- मघा-पूर्वाफाल्गुनी- हस्त- चित्रा-अनुराधा-मूल-पूर्वाषाढा-श्रवण -धनिष्ठा-पूर्वाभाद्रपदा-रेवती(शेषाणि नक्षत्राणि) समाह्वयसंज्ञकनक्षत्राणि स्युः। तत्र प्रत्येकमासे समर्घं करोति।एवं मणि-जीव-धातु-मूलोर्ण-कर्पूर-रसादिकानां समर्घतां महर्घतां ज्ञात्वा दैवज्ञः प्रजानां समर्घवस्तूनां संग्रहार्थं वदेत्। एतानि जघन्यादिनक्षत्राण्युक्तफलानि विवाह-जन्मादिफलानामभिवृद्धये विनियोजनीयानि।[३१३]

कुन्द- कुमुद- निर्मल- श्वेत- कोमल- शङ्ख- तप्तरजतामल-वज्रकान्तिसमश्चन्द्रमा यन्मासेऽभ्युदितः स प्रजानां क्षेम तथातुलसुभिक्षं कुरुते।[३१४]

---

३१३ व.सं. श्लो. १३ तः २१

३१४ व.सं. श्लो. २२




नवग्रह, गीताप्रेस, गोरखपुर पृ. ५०

## १.५.१८ भौमचाराध्याय :

वृद्धवसिष्ठसंहिताग्रन्थे चतुर्थाध्याये भौमचारनामके पञ्चदश(१५)श्लोकाः सम्मिलिताः।

यस्माद्भूमिसुतस्य चारं विना जगतः सुसम्यक् शुभाशुभमुत्तमं ज्ञानं न जायते, तस्मात् तज्ज्ञानं समासतः कथितम्।[३१५]

यन्नक्षत्रे भौमस्योदयो भवेत्, तस्मात्(तन्नक्षत्रात्) नवम–अष्टम–सप्तमनक्षत्रगतो वक्री स्यात्, तदा जनानां वह्निभयं व्याधिभयं च करोति। यदि भौमः स्वोदयनक्षत्राद् एकादश–द्वादश–दशमनक्षत्रगतो वक्री स्यात्, तदा अश्रुमुखसंज्ञको भौमोऽर्घविवृद्धिं तथा रसादिकानां नाशं करोति। यदि भौमः स्वोदयनक्षत्रात् त्रयोदश–चतुर्दशनक्षत्रगतो वक्री स्यात्, तदा व्यालमुखाभिधानो भौमो जनानां भयकारी स्यात्। किन्तु तत्र सुवृष्टिं, सस्यसमृद्धिं तथा जनानुरागं फलं ददाति। यदि भौमः पञ्चदश–षोडशनक्षत्रगतो वक्री स्यात्, तदा रक्ताननसंज्ञको भौमः सुभिक्षमतिरोगं शत्रुवृद्धिं करोति। यद्यष्टदश–सप्तदशनक्षत्रगतो भौमो विपरीतेन वक्री स्यात्, तदा स मुशलाह्वयोऽर्घभीतिदः स्यात्। क्षितिपालकानां युद्धं भवति तथा समस्तलोकाः क्षयं यान्ति। यदि भौमः पूर्वाफाल्गुनी–उत्तराफाल्गुनी–नक्षत्र उदितो भवति, उत्तराषाढानक्षत्रगतो वक्रितो रोहिणीनक्षत्रेऽस्तङ्गतो भवति, तदा समस्तजनानां मृत्युर्भवेत्। अथवा पृथ्वीमण्डले भूकम्पो भवेत्। यदि श्रवणनक्षत्रेऽभ्युदितो भौमः पुष्यनक्षत्रगतो वक्री स्यात्, तदा प्रतिदिनं समस्तनृपाणां तथा प्रजानां च प्रलयकरः स्यात्। यदि भौमो मघानक्षत्रेऽभ्युदितस्तस्मिन्नेव नक्षत्रे वक्री स्यात्, तदा नृपाणां मृत्युर्भवेत्। तथा नृपाणां कलहं करोति। यस्मिन् दिग्द्वारनक्षत्रे भौमस्योदयस्तथा च तस्मिन्नेव यदि भौमो वक्री स्यात् तदा तद्दिगीशस्य नृपस्य मृत्युर्भवति। यदि मघारोहिणीनक्षत्रगतो भौमो योगतारां च भिनत्ति, तदा

---

३१५ व.सं. श्लो. १

नृपभीतिः स्यात्, तथा भूमिश्चक्रवद् भ्रमति। विशाखा-उत्तराषाढा-रेवतीनक्षत्राणां याम्ये विचरन् कुजो दुर्भिक्षवृष्टिभयकृत् स्यात्, तथा पृथिव्या उपरि नृपाणां युद्धं भवति। सर्वनक्षत्राणामुत्तरे विचरन् कुजः शुभदो भवति। याम्ये विचरन् कुजः सर्वप्राणिनां कृतेऽरिष्टफलदः स्यात्।[३१६]

यदि मेष-सिंह-मीन-धनुराशिस्थितो भौमः शनिर्वा वक्री स्यात्, तदा गो-नर-अश्व-गजपक्षीसमूहानां, समस्तसमूहानां नाशं करोति। अशोकबन्धूकमणिप्रवालसंतप्तताम्रामल-किंशुकसमान एवंविध उदितो भौमो नृपाणां शुभं करोति। तथा प्रजानां वृद्धिं करोति।[३१७]

---

३१६ व.सं. श्लो. २ तः १३

३१७ व.सं. श्लो. १४,१५



SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

नवग्रह, गीताप्रेस, गोरखपुर, पृ. ९

## १.५.१९ बुधचाराध्याय :

वृद्धवसिष्ठसंहिताग्रन्थे पञ्चमाध्याये बुधाचारनामके सप्तदश(१७)श्लोकाः सम्मिलिताः।

बुधस्योदये कदाचिद् दृश्यमाने सर्वजगति विपत्तिर्भवेत्। यथाल्पवृष्टिः, वायुः, अग्निभयं कुत्रचित् तेभ्यो भयमन्यथा वा।[३१८]

ज्येष्ठा-श्रवण-उत्तराषाढा-धनिष्ठानक्षत्रेषु स्वयं बुधो विचरेत्, तदा नृपाणां युद्धं, अतीवपीडा तथा प्रचुरार्घवृष्टिः स्यात्। आर्द्रा-पुनर्वसु-पुष्य-आश्लेषा-मघानक्षत्रेषु यदि बुधो विचरेत्, तदा प्रजानामतुलां पीडां करोति। तथा क्षुर-शस्त्र-अवृष्टि-रोग-शत्रुपीडां प्रबलां करोति। हस्त-चित्रा-स्वाती-विशाखा-अनुराधा-ज्येष्ठा-एतानि षण्नक्षत्राणि विचरन् बुधस्तैलादि(घृत-तैलादीनां)रसादि(मधुरादिरसानां)वस्तूनां समृद्धिं करोति। तथा गवादीन् पीडयति। यदि कृत्तिका-पूर्वाभाद्रपदा-भरणी-आदिनक्षत्रेषु याम्ये विचरेत्, तदात्यधिकमात्रायामग्निकारणात् प्राणिनां दाहं करोति। तथा सप्तधातून् (वसा-रक्त-मांस-मेद-अस्थि-मज्जा-शुक्रादीन्) विकलान् करोति। शतभिषा-मूल-रेवती-स्वाती-अश्विनीनक्षत्रेषु बुधो विचरेत्, तदा जलोत्पन्नानां द्रव्याणां, जलेनाजीविकावतां ,भेषज-अश्व-क्रयविक्रयजीविनां नाशकरो भवति। यदि बुध उत्तराभाद्रपदानाम्नि एकस्मिन्नेव नक्षत्रे विचरेत्, तदा प्रजानां विपुलामयशस्त्रभयमतुलक्षुधाभयं स्यात्।[३१९]

प्राकृत-मिश्र-संक्षिप्र-तीक्ष्ण-योगान्तिक-घोर-पापाः- एते बुधस्य सप्तविधा गतिभेदा विविधफलदाः स्मृताः। स्वाती-कृत्तिका-रोहिणी-भरणीनक्षत्रेषु बुधस्य प्राकृताभिधाना गतिः स्यात्। मघा-मृगशीर्ष-आर्द्रा-आश्लेषानक्षत्रेषु बुधस्य मिश्रा गतिः स्यात्। पूर्वाफाल्गुनी-

---

३१८ व.सं. श्लो. १

३१९ व.सं. श्लो. २ तः ७

उत्तराफाल्गुनी–पुनर्वसु–पुष्यनक्षत्रेषु बुधस्य संक्षिप्रसंज्ञका गतिः स्यात्। उत्तराभाद्रपदा–पूर्वाभाद्रपदा–धनिष्ठा–शतभिषानक्षत्रेषु बुधस्य तीक्ष्णसंज्ञका गतिः स्यात्। मूल–पूर्वाषाढा–उत्तराषाढा–नक्षत्रेषु बुधस्य योगान्तिका गतिः स्यात्। श्रवण–धनिष्ठा–शतभिषा–चित्रा–नक्षत्रेषु बुधस्य घोरसंज्ञका गतिः स्यात्। हस्त–अनुराधा–विशाखा–नक्षत्रेषु बुधस्य पापसंज्ञका गतिः स्यात्। प्राकृतगत्या स्थितो बुधो राजप्रवृत्तिमारोग्यं सस्यवृद्धिं कारयेत्। संक्षिप्रमिश्रयोर्गत्योः सततं मित्रावरोधो भवति। अपरासु गतिषु नियतं सर्वजन्तूनां विपरीतं भवति। अर्थात् तीक्ष्ण–घोरान्तिक–योगान्तिक–पाप–गतिष्वनारोग्यं सस्यनाशो राज्येष्वप्रवृत्तिस्तथा मित्रलाभ इति फलं ज्ञेयम्।[३२०]

विकला–ऋज्वी–अनुवक्रा–वक्राख्या बुधस्य गतिभेदा विविधफलदाः स्युः। तासां विकला गतिर्बलवती स्यात्। विकला गतिः शस्त्रभयकारी तथा रोगकारिणी स्यात्। ऋज्वी गतिर्जनानां शुभकारिणी स्यात्। अनुवक्रा गतिरर्घविनाशकारिणी स्यात्। वक्रा गतिर्नृपयुद्धकारिणी स्यात्।[३२१]

आषाढ–श्रावण–पौष–वैशाखमासे यदि बुध उदयं पश्येत्, तदा राजपीडां करोति। तथास्तसमये राजपीडा,अवर्षणं तथा तस्करभीतिं करोति। माणिक्य–शङ्ख–सुवर्ण–निर्मलपुष्पराग–मरकत–कुन्दसमानश्चन्द्रमास्तथा शुद्धकान्तिमान्, स्निग्धः, शशाङ्कतनयो(बुधः) यस्मिन् समय उदितौ भवेतां, तदा जनानां हितकारिणौ स्याताम्। विपरीते भयरोगकारिणौ स्याताम्।[३२२]

---

३२० व.सं. श्लो. ८ तः १३
३२१ व.सं. श्लो. १४ तः १५
३२२ व.सं. श्लो. १६,१७




नवग्रह गीताप्रेस, गोरखपुर पृ. ११

SMT. HANSA MEHTA LIBRARY

## १.५.२० गुरुचाराध्याय :

वृद्धवसिष्ठसंहिताग्रन्थे षष्ठाध्याये गुरुचारनामक एकाधिकशत(१०१)श्लोका: सम्मिलिता:।

मासेषु चोर्ज्जादिषु कृत्तिकादिद्वयं द्वयं नक्षत्राणां क्रमेणाश्विन्यादिनक्षत्राणि स्यु:। त्रित्रिनक्षत्राणां नभस्य-इष-तपस्यमासा: (भाद्रपद-अश्विन-कार्त्तिकमासा:)शुक्लान्तयुक्ता: स्यु:। गुरुर्यन्नक्षत्र उदितो भवति, तेनैव तद्वर्षस्य नाम भवेत्।[323]

**तत्र कार्त्तिकमासक्रमेण तेषां च सम्यक् फलम्।**

यदि गुरोर्वर्षारम्भ: कार्त्तिकमासे स्यात्, तदा सित-रक्त-हरित-पीतद्रव्याणां वृद्धि: स्यात्। तथा शकटोपजीविकानां, कृषीवलानां वणिकानां च पीडा भवति। यदि गुरोर्वर्षारम्भो मार्गशीर्षमासे स्यात्, तदा निरन्तरसस्यानां भयं तथा ईतिभयं स्यात्। यदि गुरोर्वर्षारम्भ: पौषमासे स्यात्, तदा नृपा निवृत्तवैरास्तथा चान्यजना रोगेण पीडिता भवन्ति। यदि गुरोर्वर्षारम्भो माघमासे स्यात्, तदा सस्यविवृद्धिर्महदर्घता पौष्टिककर्मप्रचुरमात्रायां स्यात्। जनानां हृद्रोगतो भीतिरेवं देव-पितॄणां पूजावृद्धिर्भवति। यदि गुरोर्वर्षारम्भ: फाल्गुनमासे स्यात्, तदा क्वचित्क्वचित्तद्वदर्घता सस्यवृद्धिर्भवति। सर्वजनानामारोग्यं तथा नृपा: परस्परं हन्तुमुद्यता: स्यु:। यदि गुरोर्वर्षारम्भश्चैत्रमासे स्यात्, तदा स्त्रीजनहानि: स्यात्। भूपा: क्रोधिन: स्यु:। जगति क्षेमं, सुभिक्षं भवति। तथा द्विजसाधुजनानां प्राणिनामतुला प्रीति: स्यात्। यदि गुरोर्वर्षारम्भो वैशाखमासे स्यात्, तदा द्विजपशुसज्जनानां वृद्धि: स्यात्। सर्वे शान्तिसंयुता:, एवं सर्वे द्विजा यज्ञकार्यार्थे निरता: स्यु:। तथा च सस्यसम्पूर्तिर्भवेत्। यदि गुरोर्वर्षारम्भो ज्येष्ठमासे स्यात्, तदा जगति समस्तजना: स्वस्वकर्मणि प्रवृत्ता: स्यु:। तथा स्वस्वज्ञातिषु वैरं कुर्वन्ति। किन्त्ववनीश्वरास्तथैव न कुर्वन्ति। यदि गुरोर्वर्षारम्भ आषाढमासे

---

३२३ व.सं. श्लो. १,२

स्यात्, तदा सर्वसस्यानि प्रचुरमात्रायां पीड्यन्ते। कृमिकीटादीनामतुला वृद्धिर्भवति। किन्त्वपरसस्यं वृद्धिमाप्नोति। यदि गुरोर्वर्षारम्भः श्रावणमासे स्यात्, तदा क्षेमं भवति। अखिलानि सस्यानि पाकमुपयान्ति। अतुलराजक्षोभेन समस्तजनाः पीडिता भवन्ति। यदि गुरोर्वर्षारम्भो भाद्रपदमासे स्यात्, तदा षण्ढास्तद्भक्ता वा निपीड्यन्ते। तथा पूर्वकथितान्यखिलानि सस्यान्युपयान्ति। यदि गुरोर्वर्षारम्भोऽश्विनमासे स्यात्, तदा वृष्टिर्भवति। प्रजानां निरामयं क्षेमं भवति। कुत्रचिदीतिभयमपरसस्यानां भयं न भवति। तथा प्रजापीडा न भवति।[३२४]

नक्षत्रेषु सौम्यगतिर्विचरन् गुरुर्जनानामभयप्रदस्तथा च दक्षिणमार्गेण स्थितो जनानां व्याधिप्रदस्तथा द्विज-क्षत्रियाणां नाशकरः स्यात्।[३२५]

गुरोर्वर्णो यदि वह्निसमानस्तदाग्निभयं स्यात्। गुरोर्वर्णो यदि पीतस्तदा रोगभयं स्यात्। गुरोर्वर्णो यदि हरितस्तदा शत्रुभीतिः स्यात्। गुरोर्वर्णो यदि श्यामस्तदा सततं युद्धं करोति। गुरोर्वर्णो यदि रक्तवर्णस्तदा राजा तथा द्विजानां कामपीडा भवेत्। गुरोर्वर्णो यदि धूम्रवर्णस्तदा वृष्टिभयं स्यात्। गुरोर्वर्णो यदि पिशङ्गस्तदा ईतिभयं स्यात्। गुरोर्वर्णो यदि कांस्यसमानस्तदान्नभीतिः स्यात्। गुरोर्वर्णो यदि क्षिप्रस्तदा नृपनाशो भवेत्। तथा च गुरोर्वर्णो यदि चित्रविचित्रो दृष्टस्तदा नृपेषु युद्धं भवति।[३२६]

कृत्तिकारोहिणीनक्षत्रौ संवत्सरस्य शरीरम्, पूर्वाषाढा-उत्तराषाढानक्षत्रौ तस्य नाभिः, आश्लेषानक्षत्रं तस्य हृदयं तथा मघानक्षत्रं विकसितसुमनो ज्ञेयम्। यदि शरीरसंस्थेषु नक्षत्रेषु क्रूरग्रहास्तदा वायोस्तथाग्निभयं स्यात्। यदि नाभिस्थितेषु नक्षत्रेषु क्रूरग्रहास्तदानर्घभयं स्यात्। यदि हृदि स्थितेषु नक्षत्रेषु क्रूरग्रहास्तदा जनानां सस्यभयं स्यात्। यदि मनःस्थितेषु नक्षत्रेषु

---

३२४ व.सं. श्लो. ३ तः१३

३२५ व.सं. श्लो. १४

३२६ व.सं. श्लो. १५,१६

पापग्रहाः स्थितास्तदा मूलफलानि विनाशं यान्ति। वक्रीग्रहस्थेषूग्रफलं प्राप्नोति। यदि मनःस्थितेषु नक्षत्रेषु सौम्यग्रहाः स्थितास्तदा शुभफलं प्राप्नोति।

तथा यदि मनःस्थितेषु नक्षत्रेषु पापा एवं सौम्यग्रहाः स्थितास्तदा मिश्रफलं प्राप्नोति।[३२७]

**प्रभवादिसंवत्सरगणना** — भगणाश्चतुर्थेन गुणिता गुणनफलं प्राप्नोति। गुणनफलाद् विंशतिर्योगं कृते तस्मांत् षट्त्रिंशतोनकृते यच्छेषं भवति, तेन षष्ठ्या विभाजिते, यच्छेषः तत्प्रभवादिसंवत्सरं ज्ञेयम्।[३२८]

प्रभवादिसंवत्सरनामानि[३२९] —

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| १. | प्रभवः | २. | विभवः | ३. | शुक्लः | ४. | प्रमोदः |
| ५. | प्रजापतिः | ६. | अङ्गिराः | ७. | श्रीमुखः | ८. | भावः |
| ९. | युवा | १०. | धाता | ११. | ईश्वरः | १२. | बहुधान्यः |
| १३ | प्रमाथी | १४. | विक्रमः | १५. | वृषवत्सरः | १६. | चित्रभानुः |
| १७. | सुभानुः | १८. | तारणः | १९. | पार्थिवः | २०. | व्ययः |
| २१. | सर्वजित् | २२. | सर्वधारी | २३. | विरोधी | २४. | विकृतः |
| २५. | खरः | २६. | नन्दनः | २७. | विजयः | २८. | जयः |
| २९. | मन्मथः | ३०. | दुर्मुखः | ३१. | हेमलम्बः | ३२. | विलम्बः |
| ३३. | विकारी | ३४. | शार्वरी | ३५. | प्लवः | ३६. | शुभकृत् |
| ३७. | शोभकृत् | ३८. | क्रोधी | ३९. | विश्वावसुः | ४०. | पराभवः |
| ४१. | प्लवङ्गः | ४२. | कीलकः | ४३. | सौम्यः | ४४. | साधारणः |

---

३२७ व.सं. श्लो. १७ तः१९

३२८ व.सं. श्लो. २०

३२९ व.सं. श्लो. २१ तः २६

SMT. HANSA MEHTA LIBRARY

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ४५. | विरोधकृत् | ४६. | परिधावी | ४७. | प्रमादी | ४८. | आनन्द: |
| ४९. | राक्षस: | ५०. | नल: | ५१. | पिङ्गल: | ५२. | कालयुक्ति |
| ५३. | सिद्धार्थ: | ५४. | रौद्र: | ५५. | दुर्मति: | ५६. | ददुम्भि: |
| ५७. | रुधिरोद्गारी | ५८. | रक्ताक्षी | ५९. | क्रोधन: | ६०. | क्षय: |

अब्दैर्युगं पञ्चभि: स्यात्। षष्ठिवर्षैर्द्वादशयुगानि भवन्ति। तत्र युगस्य पञ्चाब्दनाथा: क्रमेण वह्नि–अर्क–चन्द्र–प्रजापति–शिवा भवन्ति। एकस्मिन् युगे पञ्च संवत्सराणि । प्रभवादिवर्षादयो द्वादशयुगानि सन्ति। द्वादशयुगानामधिपतय:

१. विष्णु: २. सूरि:(गुरु:) ३. इन्द्र: ४. अग्नि: ५. प्रजापति:

६. अहिर्बुध्न्य: ७. पितर: ८. विश्वेदेवा: ९ चन्द्र:१०. इन्द्राग्नि:

११. अश्विनीकुमार: १२. सूर्य: एतानि द्वादशयुगानां स्वामिन: स्यु:।[३३०]

**प्रभवादिसंवत्सरानां फलम्**[३३१] —

१. प्रभवनामकसंवत्सरेऽग्निकोप: स्यात्। पित्तकफादिरोगा उद्भवन्ति। वारिवाहा: स्तोकजलं मुञ्चन्ति। किन्तु सर्वे जना: प्रमोदन्ते।

२. विभवनामकसंवैत्सरेऽधिका वृष्टि:, सस्यवृद्धिस्तथा च जनानुरागो भवेत्। क्षितिपालका: परस्परं युद्धं कुर्वन्ति। किन्तु जनानां दु:खं न भवेत्।

३. शुक्लनामकसंवत्सरे जना अन्योन्यमतिशयं प्रीतिं कुर्वन्ति। प्रपञ्चे नरा: सुन्दर्या रमयन्ति। धरित्री गोधूमशालिनीक्षुमती भवति। तथा जना निवृत्तवैरा: स्यु:।

---

३३० व.सं. श्लो. २७, २८

३३१ व.सं. श्लो. २९ त: ८८

४. प्रमोदवर्षे सज्जना एवं नृपाश्च प्रसन्नतामनुभवन्ति। चौराः पापकर्मणि रताः। तथा पृथ्वी बहुसस्ययुक्ता भवति। तथा च धरित्र्यां सर्वे जना वैररहिताः स्युः।

५. प्रजापतिसंवत्सरे गावः प्रभूतपयसः, सकला धरित्री मेघैर्विसृष्टसलिलैः परिपूर्णवप्रा भवति। आरामसंवृत्ताः पुरौधाः, विचित्रिताङ्गास्तुष्टाः परिपूर्णलोका भवन्ति।

६. अङ्गिरोनामकसंवत्सरे पृथ्वी देवयज्ञैर्युक्ता भवति। पूर्णातिरम्यपुरसंघविचित्राङ्ग्यां विस्तृतजनयुक्तायां पृथिव्यामुपरि सुन्दरवृष्टिद्वारा तडागाः पूर्णा भवन्ति।

७. श्रीमुखसंवत्सरे समस्ता पृथ्वी बहुसस्ययुता, गुल्मयुता, तडागपूर्णा भवति। क्रीडा-वन-फल-पुष्पैः पूर्णत्वेन धरित्री वनितेव भाति।

८. भावसंवत्सरे क्षितौ क्षितीशाः स्वस्था भवन्ति। वापीकूपतडागादिका अतुलाः परिपूर्णा भवन्ति। जना देवताभिः सह स्पर्धां कुर्वन्ति। सुन्दरसस्यसमूहा नानाविधैः पूर्णा भवन्ति। धरित्री सदा निरन्तरशुक-पिक-श्रीकण्ठ-कोकिल-नरकोकिलभ्राजत्षटपदनादमण्डितैर्वनैः सुशोभिता भवति।

९. युवसंवत्सरे युवत्यः प्रमदासक्ताः स्युः। चौरभयं, रोगभयं, व्यालभयं प्रभूतं, तथापि जना दुःखं नानुभवन्ति।। धरित्री गोधूमशालिनीक्षुफलैर्युक्ता स्यात्।

१०. धातृनामकसंवत्सरे सकला धरित्री सर्वजनानामिच्छानुसारं धनप्रदायिनी स्यात्। द्विजाः क्षत्रिया यज्ञक्रिया-उत्सवादिकार्येषु तत्पराः स्युः।

११ ईश्वरनामकसंवत्सरे धात्री धात्रीव निखिलजनान् पोषयति। सर्वे धात्रीपतयः परस्परं क्षुभ्यन्ति।

१२, बहुधान्यसंवत्सरे समस्तधरातलं सततं बहुधान्येन युतं भवति। किन्तु जना बहुधा पित्त-कफ-वायुभिस्तथाविधरोगेण पीडिताः स्युः।

१३ प्रमाथीसंवत्सरे समस्तधरणी रथ–तुरङ्ग–गजादिभिर्बहुभिर्युता स्यात्। कुत्रचित् प्रचुरमात्रायामर्घं न स्यात्। तथा कुत्रचिद् धनमेवं रसः प्रचुरमात्रायां न स्यात्।

१४. विक्रमसंवत्सरे सुजनानां धनं स्वस्वपराक्रमैर्वर्धते। समस्तपृथिव्यां नृपा अनुपमं विक्रमं स्थापयति।

१५. वृषभसंवत्सरे नृपा वृषभा इव युद्धं कुर्वन्ति। बहुविधसस्यसमृद्धिः स्यात्। तथा कृषि–उपयोगिनी वृष्टिर्भवेत्।

१६. चित्रभानुसंवत्सरे नानाविधैः सस्यैर्विचित्रितविचित्रभानौ चित्रवृष्टिर्भवति। नृपाणां परस्परयुद्धे कपालकेशास्थिकबन्धचित्रं भवेत्।

१७. सुभानुसंवत्सरे सूर्यो निरन्तरं तप्तो भवति। पृथिवी मध्यमसस्ययुक्ता भवति। जनाः शस्त्राग्निकोपैः प्रचलन्ति। तथापि तेभ्यो भीतिं नावाप्नुवन्ति।

१८. तारणसंवत्सरे जना दुःखेन(रोगशोकसंकटादिकं) तरन्ति। किन्तु सुपुत्रमित्रैः सहानन्देन प्रमोदन्ते। मेघा यथेप्सितं वर्षन्ति। तथाप्यपरसस्यं सीदति।

१९. पार्थिवसंवत्सरे ये पार्थिवेन्द्रा युद्धेषु विलयं ययुस्ते ते सर्वे सुखिनः स्युः। मेघाः प्रचुरमात्रायां जलं मुञ्चन्ति। तथा ज्वरेभ्यो भीतिः स्यात्।

२०. व्ययनामकसंवत्सरे धरित्री निरन्तरं जलेन युक्ता, सर्वे जना व्ययं कुर्वन्ति। नृपा धर्मरताः, चौरा एवं पापिनः पीडिता भवन्ति।

२१. सर्वजिन्नामकसंवत्सरे समस्तजगति सर्वे जना आनन्दयुक्ताः, सुखिनः स्युः। राजा विचारयुक्तस्तथा बहुदुःखं प्राप्नोति।

२२. सर्वधारीनामकसंवत्सरेऽवनिपालकः प्रजापालनार्थे तत्परः स्यात्। वारिधरा क्वचिदल्पां क्वचिद्बहुलां वर्षां पृथिव्यां मुञ्चन्ति।

२३. विरोधीनामकसंवत्सरे नृपाः क्षोभैः सम्भूताः प्रजाभयं स्यात्। चौरैर्जनानां सर्वस्वमपहृतं भवति। तथा जना विदेशगमनं कुर्वन्ति।

२४ विकृतमानकसंवत्सरे प्रकृतिः विकृतिं प्रयाति, विकृतिस्तथा प्रकृतिमायाति। पृथिव्यां सज्जना राक्षसद्वारा पीडिता भवन्ति।

२५ खरनामकसंवत्सरे नृपाः स्वपराक्रमैः शत्रून् अन्यराष्ट्रान् हन्तुं प्रचलन्ति। रथ–गज–सेनाश्वबलैरावृता धरित्री जनानां आनन्दफलप्रदा स्यात्।

२६ नन्दननामकसंवत्सरे धरित्री सम्पूर्णसस्यामितवारिवाहैः सुन्दरानन्ददा स्यात्। तथा विचित्रफलैर्युता, अधिकपुष्पयुता ,अत्यधिकसस्यादिफलयुता धरा भवति।

२७ विजयसंवत्सरे नृपा अतुलबलसमृद्धा स्युः। नगरमश्वादीनां नाशार्थे नित्यमुद्यतं स्यात्। भुवि प्रचलति, तेऽपि सर्वे चलन्ति। तथा धरित्री सस्यसम्पूर्णरम्या दृश्यते।

२८ जयनामकसंवत्सरे सस्याविरलार्घं स्यात्। किन्तु गो–अज–वृष–अश्व–नागा(गजा) बलाधिकाः स्युः। धराधीशाः–नृपा महारणैश्च सीदन्ति। तथा गौडा एवं गुर्जरदेशजना पीडिता भवन्ति।

२९ मन्मथसंवत्सरे सर्वे विविधान्नपानैर्जृम्भन्ति। पशवो मृगाश्च कामोपचाररताः। शबराश्चौराः संन्यासिनो जनाः पीडिता भवन्ति। तथा लुब्धैः सीदन्ति।

३० दुर्मुखनामकसंवत्सरे सस्यार्धाः प्रलयं प्रयान्ति। नृपाः, मुख्यविप्रजनाः, प्रव्राजक–व्रात(श्रमिक)–किरात–चौर–ब्रह्मचारी –आदयः सर्वे वर्धन्ते।

३१ हेमलम्बिनामकसंवत्सरे पृथ्वी, देवताः,–गवां समूहाः, नृपसमूहाः,–धर्मासक्ताः सर्वे सीदन्ति। विरलार्घसस्यैस्तथावृष्टिभिः सर्वे जनाः क्षुद्भयपीडिताश्च स्युः।

३२ विलम्बिनामकसंवत्सरे शत्रुभयं,रोगभयम्,अल्पवृष्टिर्भवेत्। चौरानां मध्ये युद्धं भवति। प्रजा धनहीना, सत्त्वविहीना तथा चोदरभरणार्थं विदेशगमनं कुर्वन्ति।

३३ विकारिसंवत्सरे मेघा: स्तोकं जलं मुञ्चन्ति। तथापि धरित्री नानाविधसस्यै:पूर्णा भवति। नानाविधवृक्षमूलै: समस्तजना जीवन्ति।

३४. शार्वरीनामकसंवत्सरे पृथिवी सुशोभिता दृश्यन्ते। धरित्री सस्येन पूर्णा तथा जनवृन्दसंकुला स्यात्। यज्ञोत्सुकधरित्री देवताभि: पूर्णा भूपकुलैश्च धर्ममार्गे रता स्यात्।

३५. शुभकृत्संवत्सरे धरित्री शुभा विभाति। अत्यधिकयज्ञमहोत्सवै: सततं युक्ता स्यात्। नृपा नीतिमार्गेन चलन्ति। तथा बहुविधसस्यार्घवृष्टिभि: सकलानां वृद्धिर्भवति।

३६. शोभनसंवत्सरे नृपा विविधसैन्ययुता जृम्भन्ते। धरित्र्यपि सुपुष्पितफलितवनारामतोयांशै: सुशोभिता दृश्यते।

३७. प्लवसंवत्सरे समस्तजना: स्थलजलभवोपायजीविन: स्यु:। समस्ता धरा बहुवृष्टिभिर्जलमध्ये प्लवसदृशा भवति।

३८. क्रोधीसंवत्सरे नृपा: कलहयुक्ता:, धनरहिता भवेयु:। जना: फलमूलभोजनं कुर्वन्ति तथापि प्रजावृद्धिर्भवेत्।

३९. विश्वावसुसंवत्सरे पृथिवी नानाकारैर्विविधसस्ययुता भवति। मेघवृन्दा: प्रचुरमात्रायां जलं मुञ्चन्ति। नानाविधयज्ञानुष्ठानं भवति। तथा अङ्ग–वङ्ग–मगधप्रदेशेषु चौरैर्निहता विचित्रनादैर्युता च स्यात्।

४०. परिभवनामकसंवत्सरे प्रजानृपौ नानाविधक्लेशयुक्तौ स्याताम्। अतुलितसस्यसमृद्धां भूमिं भुक्त्वा प्रभावितौ भवेताम्।

४१. प्लवङ्गनामकसंवत्सरे प्रमदाजना नित्यं पुरुषैर्वैरं कुर्वन्ति। धराधिप: क्षोभितो भवति। पृथिव्यां संघर्ष: स्यात् तथा धरित्री सम्पूर्णफलदायिनी न भवति।

४२. सुकीलनामसंवत्सरे अवृष्टि:, चौर्यभीति;, रोग:, अग्निभयं जनानां भवति। जना

नानाविधविचित्ररोगैः पीडिता भूमौ जीवयामः कथमिति विचारं कुर्वन्ति।

४३. सौम्यनामसंवत्सरे सुवृष्टिः सस्यार्घमधिकं भवति। धरित्री जलेन सुशोभिता दृश्यते। नृपा धर्मप्रसक्ता उत्सवादिषु निरतास्तथान्यजना निरन्तरं स्वस्वमार्गेषु प्रविनष्टदोषा स्युः।

४४. साधारणसंवत्सरे पृथिव्यां मध्यमवृष्ट्यर्घसस्यभयं विविधामयचोरभयं च स्यात्। तथा जना अपि चौर्यभयेन तथा विविधरोगेण पीडिता भवन्ति।

४५. विरोधकृत्संवत्सरे समस्तजनानामीतिभयं तथा कलहो भवेत्। किन्तु पृथिवी सस्यसमृद्धा, तथा निरन्तराविकलफलदायिनी स्यात्।

४६. परिधावीसंवत्सरे शुभफलं प्राप्नोति। अतुलितबहुसस्यवृद्धिर्भवेत्। समस्तपृथिवी रोगरहिता भवति। तथा मध्यमदेशस्य नाशो भवति।

४७. प्रमादीनामसंवत्सरे धान्यानामीतिभयम्, अखिला प्रजा क्षुद्भयकारणात् पीडिता भवति। धनिकानां चोरभयं तथा राजभयं प्रवर्तते।

४८. आनन्दनामसंवत्सरे स्थावरजङ्गमानां विविधान्नपानैरानन्दो भवेत्। तत्रात्यधिकरोगेण कलिङ्ग–वङ्ग–खश–महिषनगरनिवासिनः प्रलयं प्रयान्ति।

४९. राक्षसनामसंवत्सरे रथाश्वहेमाम्बरवृत्तिवतां लोहकाराणां तथाकरजीविनां च वृद्धिर्भवति। तथा ब्राह्मणा नृपाः सुजनाः सुवृत्ता निर्धनाः प्रभवन्ति।

५०. नलनामकसंवत्सरे मृग–अश्व–पक्षि–व्रज–कोकिलाश्च विलयं प्रयान्ति। यद्यपि अन्ये च सर्वे नरगोकुलाद्यास्तथा मध्यदेशीया वृद्धिं प्रयान्ति।

५१. पिङ्गलनामकसंवत्सर ईतिभयं चौर्यभयं स्यात्। किन्तु शत्रुभयं नास्ति। समस्तपृथिव्यां स्तोकजलं भवेत्। तथा ब्राह्मणसज्जनयोरन्योन्यं वैरं भवति।

५२. कालनामकसंवत्सरे सर्वे नृपा निरन्तरवैररहिताः स्युः। विप्रा अध्वरनिरता स्युः। तथा क्वचित् क्वचित् चौरभयं तथा वह्निभयं स्यात्।

५३. सिद्धार्थनामसंवत्सरेऽखिलं सुधातलं बहुविधधान्यार्घसम्पूर्णं भवति। किन्तु विविधामयसर्पभयं भवेत्।

५४. रौद्रसंवत्सरे नृपाः परस्परं युद्ध्यन्ति। तथा परस्परं हन्तुमुद्यताः स्युः। तथा कोङ्कणदेशस्य क्षितिपतेर्निधनं भवेत्।

५५. दुर्मतिनामकसंवत्सरे पर्जन्यः सततमम्बुधाराभिर्वर्षति। तथा कितवचौराः समस्तजनानां सुवर्णादिकं समस्तधनं गृह्णन्ति।

५६. दुन्दुभिनामसंवत्सरे पृथ्वी निरन्तरविविधोत्सवनादपूर्णा भवति। धरित्री विविधफलैर्युता, सस्यपूर्णा भवति। किन्तु जना विविधरोगैर्युक्ताः स्युः।

५७. रुधिरोद्गारीनामसंवत्सरे युद्धे योद्धानां, प्रतियोद्धानामस्त्रेण खण्डिता धरित्री तेषां रक्तमनुदिनं पिबति। तथा धरित्री विरलसस्ययुता भवति।

५८. रक्ताक्षीनामसंवत्सरे नृपा निरन्तरं परस्परक्रोधयुता भवन्ति। किन्तु परस्परं युद्धं न कुर्वन्ति। पृथिव्युत्तमसस्यपूर्णा, किन्तु तदा क्वचिद्धीनसस्या भवति।

५९. क्रोधननामसंवत्सरे धरित्री गोधूमशाल्यादियुक्ता भवति। धरित्री नानाविधोद्यानतडागवप्रैर्युता स्यात्। तथापि जनानां सन्तोषो न स्यात्।

६०. क्षयनामसंवत्सरं नरान् अजान् अश्वखरोष्ट्रपक्षिमृगांश्च नागाखिलभूतराशीन् त्रिभागशेषं कुर्यात्। अनावृष्ट्या तथा नृपाणां युद्धकारणाद् एकतृतीयांशभागनरा विलयं यान्ति।

**मेषादिराशिस्थितगुरोः फलम्**[३३२] —

---

३३२ व.सं. श्लो. ८९ तः १००

यदि गुरुर्मेषराशिगतस्तदा मेषविनाशो भवेत्। अतुलितसस्यसमृद्धिः स्यात्। किन्तु नृपकलहः क्षोभः प्रजायते। यदि गुरुर्वृषभराशौ गतस्तदा बालक-पशु-स्त्रीणां समूहानां नाशो भवति। सततं नृपकलहो भवेत्। तथा पृथिव्यां मध्यमसस्यार्घमुत्पन्नं भवति। यदि गुरुर्मिथुनराशौ स्थितस्तदा नृपकलहो भवेत्। मेघाः कुत्रचित्, कुत्रचिज्जलं वर्षन्ति। तथा च सस्यानां भयं स्यात्। यदि गुरुः कर्कराशौ स्थितस्तदा धरा अतुलितसस्यसमृद्धा भवति। मेघा जलं वर्षन्ति तथा गावः प्रभूतपयांसि ददति। यदि गुरुः सिंहराशौ स्थितस्तदावनीशा विलयं यान्ति। सुजना एवं द्विजा निर्धना भवन्ति। समस्तधरातलेऽनुपमवृष्टिर्भवेत्। तथा पृथिवी सदैव जलेन परिपूर्णा भवति। यदि गुरुः कन्याराशिस्थितस्तदा नृपा अतुलितसम्पत्प्रजायुक्ता भवन्ति। किन्तु द्विजा निरन्तरं यज्ञे निरताः स्युः। यदि गुरुस्तुलाराशिस्थितस्तदा प्रत्येकं वस्तुनिचयमुद्धतमेवं दुर्लभं स्यात्। किन्वितरद्द्रव्यं सुलभं स्यात्। तथोत्तमसस्यार्घवृद्धिर्भवति। यदि गुरुर्वृश्चिकराशिस्थितस्तदाखिलधरा बहुवृष्टिभिः, बहुविधधान्यार्घसम्पूर्णा भवति। सर्वे जीवाः सुखिनो भवन्ति। किन्त्वन्त्यजा विलयं यान्ति। यदि गुरुर्धनुराशिस्थितस्तदा संकर-शबर-निशाचरादिजातीनां निधनं भवेत्। अन्ये जनाः सुखिनो भवन्ति। तथा धरित्र्यम्बुनिकरैः सम्पूर्णजलमयी स्यात्। यदि गुरुर्मकरराशिस्थितस्तदा पृथिव्यामधिकजलवर्षा भवति। वाप्यौघतडागपूर्णा भवति। तथा धरित्री स्थावरजङ्गमशरीरिणामानन्ददायिनी स्यात्। एवमिष्टफलमाप्नोति। यदि गुरुः कुम्भराशिस्थितस्तदा नृपा वैररहिताः स्युः। कलिङ्गगौडदेशवासिनो जनाः पापेन पीडिता भवन्ति। किन्तु धरित्री पुष्पैः फलैरुत्तमसस्यरम्या दृश्यते। यदि गुरुर्मीनराशिस्थितस्तदा पृथ्वी नानाविधोद्यानतडागसस्यमहोत्सवादियज्ञक्रियाद्यैः शोभामाना दृश्यते। नृपाः प्रजाश्च सुखिनो भवति। चन्द्रसमानः शङ्ख-स्फटिक-प्रवाल-नीहार-मुक्ताफलसम एवंविधो गुरुरुदितस्तदा शुभफलदः स्यात्। तथा क्लेशनिवारकश्च भवति।[३३३]

३३३ व.सं. श्लो. १०१




SMT HANSA MEHTA LIBRARY
The M. S. University of Baroda

नवग्रह, गीताप्रेस, गोरखपुर पृ. १३

## १.५.२१ शुक्रचाराध्याय :

वृद्धवसिष्ठसंहिताग्रन्थे सप्तमे शुक्रचारनामकेऽध्याय एकोनविंशति(१९)श्लोकाः सम्मिलिताः।

शुक्राचारे नव वीथयः, त्रयो मार्गाः, तथा षण्मण्डलानि स्युः। नाग-गज-ऐरावत-वृष-गो-जरद्गो-मृग-अज-दहन इति एतानि नववीथीनां नामानि स्युः। उत्तर-मध्य-दक्षिण इति एतेषु मार्गत्रयेषु वीथिमार्गयोरन्तर्गतस्य शुक्रस्य गमनं स्यात्। मध्यमार्गे नियतं मध्यरेखातो गोवीथिर्भवति। वृषभ-ऐरावत-गज-नागादिवीथयः कुबेरादिदिग्भागे उत्तरभागे स्युः। दक्षिणमार्गे जरद्गो-मृग-अज-दहन-वीथयः स्युः। वीथ्यामेकैकस्यां नक्षत्रत्रितयं क्रमेण भवति।[३३४]

अश्विन्यादिनक्षत्रतो द्वादशनक्षत्राणि त्रितयनक्षत्रक्रमेण नाग-गज-ऐरावत-वृषादिवीथिचतुष्टयस्थानान्युत्तरभागे भवन्ति। अर्थात् अश्विनी-भरणी-कृत्तिकानक्षत्राणि नागविथि-अन्तर्गतानि स्युः। रोहिणी-मृगशीर्ष-आर्द्रानक्षत्राणि गजवीथि-अन्तर्गतानि, पुनर्वसु-पुष्य-आश्लेषानक्षत्राणि ऐरावतवीथि-अन्तर्गतानि तथा मघा-पूर्वाफाल्गुनी-उत्तराफाल्गुनीनक्षत्राणि वृषवीथ्यन्तर्गतानि भवन्ति।[३३५]

**अथ नववीथीनां फलम्**[३३६] —

यदि शुक्रो नागवीथ्यां विचरेत्, तदा पश्चिमदिशि वृष्टिनाशकृत् स्यात्। यदि शुक्रो गजवीथ्यां विचरेत्, तदा क्षेमकृत्सुखकरः किन्त्वतुलामर्थवृद्धिं करोति। यदि शुक्र ऐरावतवीथ्यां विचरेत्, तदा सम्पूर्णधरित्री शालीक्षुगोधूमयवादिसस्यपूर्णा शोभायमाना विभाति। किन्तु नृपस्य

३३४ व.सं. श्लो. १ तः ३

३३५ व.सं. श्लो. ४

३३६ व.सं. श्लो. ५ तः ९

नाशं करोति। यदि शुक्रो गोवीथ्यां विचरेत्, तदा धरित्री नानाविधसस्यवृद्धिकारणेन शोभायमाना दृश्यते।

यदि शुक्रो जरद्गोवीथ्यां मृगवीथ्यां वा विचरेत्, तदा मध्यार्घवृष्टिर्महदाहवं च करोति। यदि शुक्रोऽजवीथ्यामग्निवीथ्यां वा विचरेत्, तदा नृपाणां युद्धभयं भवति। जनानामीतिभयम्, अग्निभयमेवं जलभयं स्यात्। तथा च मेघाः क्वचित् क्वचिद् वर्षन्ति। उद्गवीथिस्थितस्य शुक्रस्योदयेऽस्ते वा सुभिक्षं स्यात्। मध्यमवीथिस्थितस्य शुक्रस्य उदयेऽस्ते वा सामान्यं फलं स्यात्। दक्षिणवीथिस्थितस्य शुक्रस्य उदयेऽस्ते वानावृष्टिफलं स्यात्। किन्तु विपरीते सुभिक्षं स्यात्।

स्वातीनक्षत्रतो नक्षत्रत्रयम्- अर्थात् स्वाती-विशाखा-अनुराधा-नक्षत्राणि वा पूर्वदिशि मघानक्षत्रतः पञ्चनक्षत्राणि- अर्थात् मघा-पूर्वाफाल्गुनी-उत्तराफाल्गुनी-हस्त-चित्रानक्षत्राणि वा पश्चिमदिशि शुक्रस्योदयेऽस्ते वा तदा शुक्रोऽनावृष्टिकृत्, विपरीते सुभिक्षकृत् स्यात्। यदि शुक्रः समस्तदिने दृश्येत्, तदा भयकृत्, एवं रोगोद्भयकृत् स्यात्। यदि दिनार्धपश्चाद् दृश्येत्, तदा सेनायाः परस्परं बलभेदकृत् स्यात्। यदि शुक्रो रोहिणीचक्रं, मघानक्षत्रं भिनत्ति, तदा समस्तपृथ्वी कपालास्थिमयी करोति। यदि शुक्रस्य उदयास्त वा कृष्णपक्षस्याष्टम्यां-चतुर्दश्यां-अमावस्यायां भवेत्, तदा समस्तधरित्री जलपूर्णा भवति। यदि गुरुस्तथा शुक्रः परस्परं पूर्वपश्चिमस्थौ सप्तमराशिसंस्थितौ, तदा जनानां रोग-जल-अग्नि-अस्त्र-चौराग्निनिशाचरेभ्यो भयं भवति। सूर्यत अग्रे, पृष्ठे वा शुक्रः स्थितः, किन्तु नीचराशौ शत्रुराशौ वा नो चेत्, तदातिवृष्टिं करोति। बलिनश्चत्वारः पञ्च वा ग्रहा एकस्मिन्राशौ संस्थितास्तदा नृपो भयं प्राप्नोति। तथार्घरोगभयमाप्नोति। यदि द्वौ ग्रहौ वक्रिणौ, तदा नृपसंक्षोभदौ तथा यदि त्रयो ग्रहास्तदा युद्धवृष्टिभयप्रदाः स्युः। यदि चत्वारो ग्रहा वक्रिणः

स्युस्तदा राजान्यत्वं कुर्वन्ति। तथा पञ्चग्रहा वक्रिणः स्युस्तदा राज्य–राष्ट्रविनाशदाः स्युः।[३३७]

वक्रचन्द्रसमानः, कुन्दपुष्पसमानः, कुमुदपुष्पसमानः, स्फटिकसमानः, प्रवाल–वैदूर्य–शङ्ख–दधि–पुष्प–हिमोपमः, मुक्ताफलप्रकरतुल्यः, विशालव्याप्तिसम एवंविधः शुक्रो नराणां शुभदः स्यात्।[३३८]

---

३३७ व.सं. श्लो. १० तः १८

३३८ व.सं. श्लो. १९

# शनिः

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda



नवग्रह, गीताप्रेस, गोरखपुर पृ. ९५

## १.५.२२ शनिचाराध्याय :

वृद्धवसिष्ठसंहिताग्रन्थेऽष्टाध्याये शनिचारनामके षड्(६)श्लोका: सम्मिलिता:।

**अश्विन्यादिनक्षत्रेषु विचरतः शनेः फलम्**[३३९] —

आर्द्रा-हस्त-शतभिषा-स्वाती-विशाखा-श्रवणनक्षत्रेषु शनिर्विचरेत्, तदा पृथ्वी विपुलसुभिक्षयुक्ता स्यात्। किन्तु गौडाश्मकाश्मीरपुलिन्ददेशे हानि: स्यात्। अनुराधा-भरणी-रेवतीनक्षत्रेषु यदि शनिर्विचरेत्, तदा जनानामीतिभयं व्याधिभयं च प्रवर्तते। किन्तु कलिङ्गबाह्लीकदेशस्थितनगरजनानामभिवृद्धि: स्यात्। अहिर्बुध्न्यनक्षत्रे यदि शनिर्याम्ये विचरेत्, तदा नृपकलहोऽवृष्टिश्च स्यात्। अनुक्तनक्षत्रेषु विचरन् शनिर्मध्यमवृष्टिद: स्यात्।

**मेषादिद्वादशराशिस्थितस्य शनेः शुभाशुभफलम्**[३४०] —

यदि शनिर्मेष-कर्क-सिंह-वृश्चिकराशिषु वा विचरेत्, तदा प्रजानां शुभप्रद: स्यात्। कुत्रचित् वृष्टिभयम्, कुत्रचित् रोगभयं तथापि जना: कथंचित् जीवन्ति। यदि शनिर्वृषभ-मिथुन-कन्या-कुम्भ-धनुराशिषु स्वक्षेत्रसंस्थोऽपि -अर्थात् तुला-मकरराशौ वा विचरेत्, तदा शुभप्रद: स्यात्। तथा बङ्गाङ्गकाश्मीरकलिङ्गगौडसौराष्ट्रदेशेष्वशुभप्रद: स्यात्। यदि शनिर्मीनराशौ स्थितस्तदा नृपा: प्रक्षुभ्यन्ति। पृथ्वी प्रचलिता भवति। दस्युवर्गो हर्षितो भवति। बुद्धिमज्जनानां बुद्धिर्नष्टा भवति। जनपदहरणं स्यात्। पयोदा विचित्रवर्षां कुर्वन्ति। सूर्यचन्द्रयो रश्मिकिरणा मन्दा भवेयु:। प्रचण्डा वाता वान्ति। तथा समस्तजगत् चक्राकारमिव भ्रमति।

---

३३९ व.सं. श्लो. १ त: ३

३४० व.सं. श्लो. ४ त: ६



SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

नवग्रह, गीताप्रेस, गोरखपुर पृ. १७

## १.५.२३ राहुचाराध्याय :

वृद्धवसिष्ठसंहिताग्रन्थे नवमेऽध्याये राहुचारनामके द्विषष्ठी(६२) श्लोकाः सम्मिलिताः।

प्रच्छन्नं रूपं धृत्वा राहुः सुधाप्रदान आगतः। एतत्सर्वं विष्णुर्ज्ञात्वा चक्रेण तस्य शीर्षं चिच्छेद। अथ शिरो नत्वा विस्मिते सदसि राहुर्हरिमुवाच – दातव्या ग्रहसमता, गतोऽस्मि, मां रक्ष, तव शरणम्। अमृतं पीतमतस्तं राहुमष्टमग्रहत्वस्थानं दत्त्वा विससर्ज। ब्रह्मणा वरदानेन सः सर्वपर्वणि चन्द्रमसं तुदति। शरविक्षेपवशात् सततं दूरादूरगतं षण्मासाभ्यन्तरितं प्रायेण ग्रहणं सम्भवति। असौ राहुर्दनुजत्वाद् भुजङ्गाकारेण गृह्णाति। भूगोलेऽधोभागे सदा भ्रमन् दर्पणसदृशं रविं ग्रसति। अखिलधरणीच्छायोद्भूता चन्दमुपरिस्थं छादयति, तदा शीघ्रगतित्वेन रविमुपरिस्थं स्थगयति। पश्चात्पश्चिमतः शीघ्रमागत्य चन्द्रं ग्रसति।[३४१]

गणितस्कन्धात् ज्ञात्वा सृष्ट्यादेररिष्टपर्वपर्यन्तसमूहानां सप्तभिरवशिष्टपर्वेशाः कथ्यन्ते। तेषां नामानि ब्रह्मा-चन्द्रमस्-इन्द्र-कुबेर-वरुण-अग्नि-यम-एते स्युः। एतेषां सप्त पर्वेशाणां फलानि क्रमेण कथितानि।[३४२]

ब्रह्मपर्वे द्विज-गो-पशूनां सम्यग्वृद्धिरपरिमिता स्यात्। चन्द्रमसः पर्वेऽवृष्टिः, जनानां भीतिस्तथा च सज्जनानां हानिः स्यात्। ऐन्द्रपर्वे शारदीयसस्यानां नाशो भवति। नृपकलह एवं सुवृष्टिः स्यात्। कुबेरपर्वे धनिकानां धनहानिर्भवेत्। तथातुला वृष्टिः स्यात्। वरुणपर्वे समस्तजनानां वृद्धिः क्षेमकरी तथा नृपहानिः स्यात्। अग्निपर्वे अग्निभयम्, अतुला वृष्टिस्तथा नृपकलहः स्यात्। याम्यपर्वे दुर्भिक्षं स्यात्। तथा लोकानां सततं भीतिकरं स्यात्। एतदुक्तपर्वाधिपफलं सूर्यचन्द्रयोर्ग्रहणे ज्ञेयम्। यद्येकस्मिन्मासे सूर्यचन्द्रयोर्ग्रहणं भवेत्,

---

३४१ व.सं. श्लो. १ तः ६

३४२ व.सं. श्लो. ७,८

तदातङ्कानर्घभयं तथा नृपकलहो भवेत्। उत्तरायणे यदि सूर्यग्रहणं, चन्द्रग्रहणं वा भवति, तदा द्विज–सज्जन–नृपहानिर्भवेत्। दक्षिणायने परेषां हानिर्ज्ञेया। सूर्यचन्द्रयोर्ग्रहणं ग्रस्तोदयं, ग्रस्तास्तं वा तदा शारदीयसस्यानां नाशस्तथा नृपनाशो भवति। यदि सम्पूर्णग्रहणं भवेत्, तदा क्षुद्भयमेवं रोगभयमाप्नोति।[३४३]

**सूर्यचन्द्रयोर्दशग्रासानां नामानि, फलानि च[३४४] —-**

सव्य–अपसव्य–लेह–ग्रसन–निरोध–अवमर्दन–आमर्द–आघ्रात–मध्यतम–तमोमय– एते सूर्यचन्द्रयोर्दशग्रासा: कथ्यन्ते।

१. यदि सूर्यचन्द्रयोर्ग्रहणकाले राहोर्दक्षिणभागगतो गमनं जगति शुभं भवति। अर्थात् सव्यनामा ग्रास: शुभप्रद: स्यात्।

२. यदि सूर्यचन्द्रयोर्ग्रहणकाले राहोर्वामभागर्ते गमनं - अर्थात् अपसव्यनाम्ना ग्रासे क्षितीशानां संक्षोभ: प्रजायते।

३. यदि राहो: सूर्यचन्द्रमण्डलयो: परितो जिह्वासमानो लीढ: स ग्रासो लेहनामा ग्रासो ज्ञेय:। य: समस्तजनानां प्रीतिद: स्यात्। तथा सर्वसस्यानां सुवृष्टिद: स्यात्।

४. यदि सूर्यचन्द्रयोर्ग्रहणे सूर्यचन्द्रबिम्बमर्धादूनभागं ग्रस्येत्, तदा ग्रसननामा ग्रासे जगति विविधभयं स्यात्। तदा स्पर्शविमर्दान्मोक्षविमर्दनमधिकं भवेत्।

५. यदि राहु: सूर्यचन्द्रमण्डलयोरधिकमण्डलं पीत्वा विलम्बेन मोक्षो भवेत्, तदा निरोधनामा यो ग्रास: स सर्वभूतानामनिष्टकारी स्यात्।

६. विमर्दनामा ग्रास: सर्वप्राणिनां हानिकारक: स्यात्। तथा मगध–गौड–किरात–द्रविडदेशानां नगरजनानां नियमेन रोगप्रदानं करोति।

---

३४३ व.सं. श्लो. ९ त: १२

३४४ व.सं. श्लो. १३ त: २५

७. यदि सूर्यग्रहणस्य, चन्द्रग्रहणस्य वा पश्चाद् चक्राकारेणेव राहुर्दृश्यते। स चामर्दनामा विज्ञेय:, य: समस्तराष्ट्रस्य नाशकर: स्यात्।

८. यदि मुकुरोपरि निश्वासानिलेन मलिनदर्पणवत् सूर्यचन्द्रयोर्मण्डलं दृश्येत्, तदा आघ्रातनामा ग्रास: सर्वप्राणिनां कृते शुभप्रद: स्यात्।

९. यदि मण्डलस्य मध्यभागे तम:प्रविष्टस्तथा सर्वमण्डलपरितो निर्मलस्तदा मध्यमतमो नामा ग्रासो मध्यमदेशस्य नाशकरो भवति।

१०. तमोमयग्रासे सूर्यचन्द्रमण्डलस्य क्रान्तभागेऽधिकस्तथा च मध्यभागेऽल्पो दृश्येत् यदि राहुस्तदा सस्यानामीतिभयं तथा च प्राणिनां चौर्यभयमधिकं भवति।

यदि ग्रहणकालिकस्य राहो: श्वेतवर्णस्तदा क्षेमं सुभिक्षं भवति। एवं विप्रमुख्यानां पीडा भवति। यदि ग्रहणकालिकराहोरग्निसमानवर्णस्तदाग्निभयमेवमग्न्युपजीविनां पीडाकरो भवति। यदि ग्रहणकालिकराहोर्हरितवर्णस्तदा रोगभीतिरेवं सस्यानामीतिरोगभयं स्यात्। यदि ग्रहणकालिकराहो: कपिलवर्णस्तदा शीघ्रगत्या प्राणिनां भयं तथा शबरजातीनां नाशो भवेत्। यदि ग्रहणकालिकराहोररुणवर्णस्तदा दुर्भिक्षं तथा विहङ्गसमुदायानां पीडा भवति। यदि ग्रहणकालिकराहोर्धूम्रसमानवर्णस्तदा सस्यानां क्षेमकरस्तथा च मन्दवृष्टिद: स्यात्। यदि ग्रहणकालिकराहो: कपोतसमानवर्ण:, रक्तवर्ण:, श्यामवर्णो वा तदा रोगस्तथा च दुर्भिक्षं स्यात्। यदि ग्रहणकालिकराहोरतिकृष्णवर्णस्तदा शूद्राणां व्याधिकरस्तथा च नृपाणां भीतिकारक: स्यात्। यदि ग्रहणकालिकराहोर्मरकतसमानवर्ण:, पीतवर्णस्तदा वैश्यानां नाशकरस्तथा च सुभिक्षकर: स्यात्। यदि ग्रहणकालिकराहोर्गैरिकसदृशो वर्णस्तदा युद्धं भवेत्। यदि ग्रहणकालिकराहोर्विद्युत्सदृशो वर्णस्तदाग्निभयं करोति। यदि ग्रहणकालिकराहुर्दूर्वादलसमान:, हरिद्रासमानो वा पीतवर्णस्तदा जगति वायुरोगभयं स्यात्। यदि ग्रहणकालिकराहो:, पङ्केन दूषितराहो: प्रात:कालीनसूर्यसम:, कमलदलसमानवर्ण:,

इन्द्रधनुषसदृशवर्णस्तदा क्षत्रियकुलनाशकरो तथा वृष्टिनाशकरः स्यात्। ग्रहणसमये यद्यतिवृष्टिः, पवनोत्पातो भवति, तदा क्षुधाभयम्, आतङ्को मरकभीतिर्विपुला स्यात्।[345]

सूर्यश्चन्द्रेण सहैकस्मिन् राशौ स्थितः, अल्पांशान्तरे भौमस्य शराभावः, तदा स ग्रस्त इति कथ्यते। यदि राहुणा भौमो ग्रस्तस्तदा अवन्तीदेशस्थिता जनाः, तथा कावेरी-नर्मदतट-आश्रितजनाः, कौसलदेशनिवसनो जनाश्च विलयं यान्ति। यदि राहुणा बुधो ग्रस्तस्तदा नेपालवासिन-सरयु-सिन्धुतीराश्रिताः स्त्री-विद्वत्-सज्जन-शिशवो विविधरोगैश्च पीड्यन्ते। यदि राहुणा गुरुर्ग्रस्तस्तदा विद्वांसस्तेषां मित्राणि, समुद्रतीराश्रिता डामरभूतविकारैः प्रकाशिताद्यैश्च विलयं यान्ति। यदि राहुणा शुक्रो ग्रस्तस्तदा दशार्णजाः, कैकयाः, पर्वतस्थितास्तथा आर्यावर्तजनाः सुखिनो भवन्ति। जले निवसिनां पीडा भवन्ति। यदि राहुणा शनिर्ग्रस्तस्तदा सौराष्ट्राः, संकराः, कैवर्ताः, बर्बरा जातयो नष्टाः स्युः। कुत्सितधान्यं विलयं याति। तथा धनिकानां प्रभूतं धनं नष्टं भवति।[346]

**कार्त्तिकादिद्वादशमासेषु ग्रहणफलम्**[347] —

यदि कार्त्तिकमासे ग्रहणं, तदा जनानां कृशानोर्भीतिस्तथा शत्रोर्भयं स्यात्। तथा तत् काम्बोज-काश्मीर-मागध-शूरसेन-द्रविडान् निहन्ति। मार्गशीर्षमासे सुभिक्षं क्षेम अतिवृष्टिः स्यात्। किन्तु रोगप्रदं स्यात्। तथा च काश्मीर-कौसल-कान्स-पौण्ड्रान्, वनजन्तूनां वा पीडां करोति। पौषमासेऽमावस्यायां सूर्यग्रहणं, पौर्णिमायां चन्द्रग्रहणं यदि भवेत्, तदा राजभयं, द्विजक्षत्रजनोपतापस्त्वनर्घवृष्टिः स्यात्, तथा च विदेह-पौण्ड्र-अग्निगोत्रप्रभवास्तथा च गौडानां ध्वंसो भवेत् । माघमासे यदि ग्रहणं(सूर्यस्य चन्द्रस्य वा) तदा गज-अश्वसमूहाः, द्विजदेवभक्ताः, धर्मरतास्तथा मातृपितृभक्ताः पीडिता भवन्ति। तथा प्रचुरां सस्यार्घवृष्टिं

---

३४५ व.सं. श्लो. २६ तः ३२
३४६ व.सं. श्लो. ३३ तः ३८
३४७ व.सं. श्लो. ३९ तः ५०

करोति। फाल्गुनमासे ग्रहणं ब्राह्मणसज्जनानां तथा काम्बोज-बाह्लीक-कलिङ्गदेशस्थितनगरजनानां हानिप्रदं स्यात्। नृपविरोधस्तथा सस्यकरमेवं सुवृष्टिकारकं भवेत्। चैत्रमासे ग्रहणं रूपोपजीविनां(वेश्यादीनां), सम्पूर्णपण्यजीविनां, हास्यज्ञानां, शिल्पज्ञानां तथा लेखकानां पीडाप्रदं भवेत्। किन्तु क्वचित् क्वचित् मन्दवर्षां करोति।

वैशाखमासे ग्रहणे कार्पास-मुद्ग-तिलानां विनाशो भवति। कलाज्ञ-इक्ष्वाकु-योधाश्च पीडिता भवन्ति। किन्तु सुभिक्षं भवति। ज्येष्ठमासे राज्ञी-समुत्कर्षः, ब्राह्मणानां प्रगतिः, सस्यानां च वृद्धिर्भवति। उत्तरदिक्स्थितजनाश्चेदिकिरातनिषादजनानां ध्वंसो भवति। तथा च सुवृष्टिः स्यात्। आषाढमासे ग्रहणं तदा तडाग-वापी-नदी-दीर्घिका-वप्रा जलेन परिपूर्णा भवन्ति। तथा च काश्मीर-गान्धार-पुलिन्द-चीन-देशानां नगरजना लयं प्रयान्ति। तथा चाल्पजनाः सन्तुष्टा भवेयुः। श्रावणमासे ग्रहणं काम्बोज-मागध-शूरसेन-पुलिन्द-चीन-कौरवांश्च निहन्ति तथा इन्द्रोऽल्पवर्षां करोति।

भाद्रपदमासे ग्रहणं म्लेच्छ-सौराष्ट्र-कलिङ्ग-वङ्ग-वंश-सौवीर-किरातान् नाशयति, स्त्रीणां गर्भं नाशयति। तथा च पृथिव्यां सुवृष्टिर्भवति। अश्विनमासे ग्रहणे काम्बोज-चीन-यवनदेशस्थितजनाः, शल्यचिकित्सकाः, त्रैर्गतिकाः,दर्दुराः, मागधदेशस्थितजनाः, पौण्ड्रदेशस्थितजनास्तथा च भिषजा निहन्यन्ते।

**सूर्यचन्द्रयोर्दशामोक्षाणां नामानि, फलानि च**[३४८] —

दक्षिणहनु-वामहनु-दक्षिणकुक्षि-वामकुक्षि-दक्षिणपायु-वामपायु-सञ्छर्दन-जरण-मध्य- विदारण -अन्त्यविदारणनामका एता दश चन्द्रभानोर्मोक्षप्रभेदाः स्युः।

---

३४८ व.सं. श्लो. ५१ तः ६२

१. दक्षिणहनुः – यदि चन्द्रग्रहणे राहुरग्निकोणे निवर्तितः, तदा दक्षिणहनुनामा मोक्षभेदः स्यात्। तत्र रोगभयं सस्यनाशोऽतिवृष्टिस्तथा राजपीडा भवति।

२. वामहनुः – यदि पूर्वोत्तरराहुरीशानकोणं गत्वा निवर्तितस्तदा वामहनुनामा मोक्षभेदः स्यात्। तत्र शस्त्रभयं रोगभयं राजहानिस्तथा च वृष्टिः स्यात्।

३. दक्षिणकुक्षिः – यदि राहुर्दक्षिणपार्श्वगतो दक्षिणपार्श्वे निवर्तितस्तदा दक्षिणकुक्षिनामा मोक्षप्रभेदः। तत्र नृपतिकुलेभ्यः पीडा भवति तथा शत्रुसमुदायाः पीडामनुभवन्ति।

४. वामकुक्षिः – यदि राहुरुत्तरभागे विचरन्, उत्तरभागे निवर्तितस्तदा वामकुक्षिनामा प्रभेदो स्यात्। तत्र स्त्रीणां गर्भनाशस्तथा मध्यमरूपेण सस्योत्पत्तिः स्यात्।

५. दक्षिणपायुः – यदि राहुर्नैर्ऋत्यकोणे गतो नैर्ऋत्यकोणे निवर्तितः, तदा दक्षिणपायुनामा प्रभेदः स्यात्। तत्र बहुविधसस्यरोगास्तथापरसस्यं च नाशकरं भवति।

६. वामपायुः – यदि राहुर्वायव्यकोणे गतो वायव्यकोणे मुक्तो भवति, तदा उत्तरपार्श्वाख्यप्रभेदो भवेत्। तत्र नानाप्रकारेण नृपविरोध एवं विविधरोगा भवन्ति।

७. संच्छर्दनम् – यदि चन्द्रबिम्बस्य पूर्वभागे स्पर्शं कृत्वा प्राच्यामेव मोक्षः, तदा संच्छर्दननाममोक्षः सर्वजन्तूनां सुभिक्षदः स्यात्। अत्र पूर्वभागे स्पर्श एवं पूर्वभाग एव मोक्षो भवति।

८. जरणम् – चन्द्रबिम्बस्य पूर्वभागे स्पर्शं कृत्वा प्रतीच्यामेव मोक्षो भवेत्, तदा जरणनामा मोक्षः प्राणिनां विनाशकृत् स्यात्।

९. मध्यविदारणम् – यदि ग्रहणारम्भकाले मण्डलस्य मध्यभागे विकासः(प्रकाशः), तदा मध्यविदरणनाममोक्षः सततं कलहं करोति। किन्त्वत्यधिकवर्षां सुभिक्षं च करोति।

१०. अन्त्यविदरणम् – यदि ग्रहणकाले चन्द्रस्य प्रान्तर्भागो मध्यभागापेक्षया निर्मलः,

तदा अन्त्यविदरणनाममोक्षः कथ्यते। स मध्यान्तदेशनाशं करोति तथा च सस्यस्य विनाशं करोति।

एते पूर्वकथिताश्चन्द्रग्रहणस्य दशविधमोक्षविचाराः सूर्यग्रहणेऽपि स्युः। तत्र पूर्वदिक्स्थाने पश्चिमा दिक् तथा पश्चिमदिक्स्थाने पूर्वा दिक्, एवमेव उत्तरदिक्स्थाने दक्षिणादिक्, तथा दक्षिणदिक्स्थाने उत्तरा दिग् ज्ञेया। एतत्प्रकारेण दिग्वैपरीत्यं कृत्वा दशविधमोक्षलक्षणं कल्प्यते।



SMT. HANSA MEHTA LIBRARY
The M.S. University of Baroda

नवग्रह, गीताप्रेस, गोरखपुर पृ. १८

## १.५.२४ केतुचाराध्याय :

वृद्धवसिष्ठसंहिताग्रन्थे दशमे केतुचारनामकेऽध्याये पञ्चाशत्(५०) श्लोकाः सम्मिलिताः।

दिव्यान्तरिक्षपृथिव्यामुत्पन्नास्त्रिविधा जगति केतव उत्पन्ना भवन्ति। अतः केतोरुदयास्ता गाणितिकरीत्या ज्ञातुं न शक्यन्ते।[३४९]

एकोत्तरशतभेदाः, सहस्रभेदा वा औत्पातिकाः केतोर्दृश्यन्ते। तत्र बहवस्तथैको वा केतुर्भवति। गगने नक्षत्रग्रहोत्पन्नो दिव्यनामा केतुर्महाफलदायकः स्यात्। परिवेष-इन्द्रधनुष-उल्का-गन्धर्वनगराणि-निर्घात- एते अन्तरिक्षविकारोत्पन्ना अन्तरिक्षकेतव इति ख्याताः। ते मध्यमफलदाः स्युः। पृथिव्यामुत्पन्नाः केतवो भौमकेतुरिति नाम्ना ख्याताः। ते चरस्थिरा वस्तुसम्भवा अधमफलप्रदाः स्युः। एतत्प्रकारेण केतोस्त्रिविधाः प्रकारास्तथा फलान्युक्तानि। वर्षे मासे पक्षे क्रमशः स्वस्वपरिणामं दर्शयन्ति।[३५०]

स्निग्धः, प्रसन्नरूपः श्वेतकान्तिसमः, ह्रस्वः सौम्यकेतुरुदयास्तसमये सुभिक्षप्रदः सौख्यप्रदश्च स्यात्। धूम्रवर्णवान् धूमसंज्ञककेतुर्दोषप्रदः स्यात्। इन्द्रधनुःसमानः, स्थूलकान्तिमान्, बहुशिखायुतः, विद्युत्-मणि-हार-सुवर्णकान्तिसमानः केतुः सम्यगर्थभीतिदः स्यात्। महाभयानकः, पश्चिमदिशि, पश्चिमदिक्स्वामी, शुकमुखसमानः, मध्याह्निकपुष्पकान्तिसमः, वह्निसुतो रक्तवर्णः केतू रूक्षः स्यात्। अग्निकोणे ये केतवो दृश्यन्ते, ते सर्वे केतवो मृत्युसुताः, वक्रशिखाः, कृष्णाः, रूक्षाः प्रजानां नाशकर्तारस्तथा भयप्रदाः स्युः। यदि याम्यायां (दक्षिणदिशि) केतुरुदितो भवेत्, तदा जनानां मृत्युभयं भवति। ते दर्पणसदृशा सरश्मयो द्वात्रिंशत्केतवो क्षितितनयाः कथिताः। क्षुद्भयदाः, शिरःसहिताः,

---

३४९ व.सं. श्लो. १

३५० व.सं. श्लो. २ तः ५

यमस्य पुत्राः, मृत्युदाः, तैलकान्तिसमाश्चन्द्रस्य पुत्राः केतवः कुन्दपुष्पसमानाः, चन्द्ररश्मिसमानाः, रजतनिभाः कथ्यन्ते। उत्तरभाग उदितः केतुः प्राणिनां सुभिक्षकारकः स्यात्। ब्रह्मदण्डकान्तिसमस्त्रिशिखस्त्रिवर्णयुवतो ब्रह्मसुतः स्यात्। ब्रह्मदण्डनामानः केतवः शान्तिकराः, अनियतदिग्प्रभवाः, शनितनयास्तारास्थाः शुक्ला ऋजवश्च षट्संख्याकाः स्युः। द्वित्रिदिनैर्दृश्यमानः शुभदायको गुरोः पुत्रो विकचनामा ख्यातः केतुः स्निग्धः; शुक्लस्ताराश्रितो दृश्येत्, तदा रोगभयकारी स्यात्। दक्षिणदिश्युदितः केतुर्निरन्तरं पापदः स्यात्, स बुधस्य पुत्रः, चौरेति नाम्ना ख्यातः शुक्लः सूक्ष्मो यथेष्टदिक्प्रभवः स्यात्। सर्वप्राणिनां निरन्तरं रोगभयकारकाः पञ्चपञ्चाशद् भौमस्य पुत्राः केतवः कौजेय इति नाम्ना ख्याता रक्तवर्णसमानाः, अग्निसमानकान्तिदाः, त्रिशूलधराः स्युः। दक्षिणदिश्युदिता क्षुद्भयदा षष्टिसंख्यकाः राहुसुतास्तामसकीलकसंज्ञकाः सूर्यमण्डले दृश्येयुः। तेषां सम्पूर्णं सम्यक्फलं सूर्यचारे कथितम्। अग्निकोण उदिता अग्निसुता विंशत्यधिकशतसंख्यकाः स्युः। प्रलयकालीनाग्निसमः, अत्यधिकजाज्ज्वल्यमानः, अग्निकान्तिसमः केतुः पृथिव्यां वह्निभयप्रदः स्यात्। स शुक्रस्य पुत्रः केतुः, अरुणवर्णः, श्यामनिभः, विविधरूपसंकीर्णः स्यात्। शस्त्रक्षुद्भयकारकास्ते सप्तोत्तरसप्तिसंख्यकाः स्युः। दण्डकसंज्ञका अष्टसंख्यकास्तारासमानाः प्रजापतेस्तनयाः कथिताः। ये द्वात्रिंशद् वंशगुल्मलताकान्तिसमाः कङ्काख्या वरुणभवाः। विधातृसुता द्विचत्वारिंशोत्तरशताधिकाः पापदाः स्युः। कालोत्पन्नाः कबन्धकान्तिदाः षण्णवतिसंख्यकाः केतवः शशिवत्प्रभासमेता राजान्यत्वं प्रकुर्वते। तन्नामानः केतवो जगति दुःख–रोग–भयप्रदाः। निर्मलताराकाराः केतवो दश दिक्षु समुद्भवाः स्युः। एतत्प्रकारेण सहस्रभेदाः पापरूपा विशेषनामानः कथिताः। पश्चिमदिश्युदितस्तथोत्तरदिशि नम्रश्च सौम्यनामा केतुः स्यात्। पूर्वदिश्युदितः, दक्षिणनम्रः, अतिस्निग्धः, श्वेतवर्णो यः केतुर्याम्यकेतुनामा ख्यातः। अत्यधिकसुभिक्षं करोति। यो रूक्षः स क्षुद्भयदायी मरकभयं

करोति। धूमनिभो, याम्यायां बृहत्तनुः, स्निग्धः कपालकेतुः स्यात्। दिग्विदिक्प्रभवः, क्षुन्मरकावृष्टिरोगकरः स्यात्। यो रूक्षनामा केतुः प्राच्यदिक्संभूतः प्रदक्षिणक्रमेण चक्रवद् भ्रमति। चक्रकेतू रात्रौ दिने च कपालकेतुसमानं फलं प्रददाति। तथा च यः पश्चिमतः सम्भूतो याम्यायामप्रदक्षिणक्रमेण भ्रमति। धूमनिभो विषमाख्यः केतुर्भूभारमपनयति। कतिपयदिवसं गत्वा धूम्रकान्तिसमानो यः केतुः पुनर्वक्रीगमनं करोति। यश्चक्राख्यकेतुः सम्पूर्णजगति नृपकलहोद्भवं कृत्वा विलयं करोति। महाशकटाकारः श्यामवर्णो दीर्घः केतुर्गगनं त्रिभागं कृत्वा गमनं करोति। धूमकेतुर्ऋजुवक्रगतिं कुरुते, क्रमशो जगतस्त्रिभागहरः, गतिरहितः,तस्य प्रमाणवर्णाकृतिर्न भवेत्। ग्रहनक्षत्रेषु गमनं कृत्वा यः केतुरशुभफलदो नास्ति। स शुभफलप्रदः। राज्ञामुपकरणेषु, देवगृहे, पर्वतेषु, वृक्षेषु नियतं दर्शनमुपैति। स नियमेन विनाशं करोति। कुमुदकान्तिसमानः कुमुदाख्यकेतुः षड्भिर्दिवसैः पश्चिमदिशि द्रष्टव्यः स्यात्। पूर्व-उत्तरदिशि यदि यो दृश्येत्, तदातुलं सुभिक्षं करोति। यः केतुस्तारोपरि याम्यायां दिशि सकृद्दृष्टो मणिकेतुः कथ्यते। यः केतुरुदयस्य वा समये क्षीरधारेव दृश्येत्, स शुभदो भवेत्। तथा जलधारेव हि ऋज्व्या नतया शिखया परेण दृष्टो जलकेतुर्जलसदृशः सर्वप्राणीनां सुभिक्षं करोति। स मर्कटलाङ्गूलकान्तिसमानः कचसन्निभो वा स्यात्। सर्पाकारसदृशस्तेन सर्पस्य तथा बहुरोगस्य भयं स्यात्। अपरोऽपि पद्मकेतुः पद्मनिभः पद्मगर्भसंकाशः स्यात्। स नृपतीनां क्षेमकरस्तथा सर्वजन्तूनां सुभिक्षदः स्यात्। आवर्त्ताख्यः केतुः प्रादक्षिण्येन दीप्तिमाञ्छुक्लः स्यात्। स शुभदः स्यात्। केतूनां परस्परं परिवर्तनेनात्यधिकरोगभयमीतिकरः स्यात्। सम्पूर्णगगनमाक्रम्य धूम्रकान्तिसमानः केतुः संवर्त्ताख्यः स्यात्। शूलाग्रस्त्वितरो केतुर्जगति भयप्रदः स्यात्। यदि स श्वेतकान्तिसमानस्तदा शुभदस्तथा यदि कृष्णवर्णस्तदा जगत्यशुभप्रदः स्यात्।[३५१]

---

३५१ व.सं. श्लो. ६ त: ४०

**अथाश्विन्यादिनक्षत्रेषूदितानां केतूनां फलम्[३५२] —**

यदि केतुरश्विनीनक्षत्र उदितस्तदा स अश्वजीविनां नाशं करोति। यदि केतुर्भरणीनक्षत्र उदितस्तदा स म्लेच्छाधिपतिं नाशयति। यदि केतुः कृत्तिकानक्षत्र उदितस्तदा स कलिङ्गाधिपतेर्नाशं करोति। यदि केतुर्रोहिणीनक्षत्र उदितस्तदा स अत्यधिकबलवतां शूरसेनदेशस्य नृपस्य नाशं करोति। यदि केतुर्मृगशीर्षनक्षत्र उदितस्तदा स औशीनरमुख्यपतिं नाशयति। यदि केतुरार्द्रानक्षत्र उदितस्तदा स जलजन्तूनां नाशं करोति। यदि केतुः पुनर्वसुनक्षत्र उदितस्तदा स अश्मकदेशाधिपतिं नाशयति। यदि केतुः पुष्यनक्षत्र उदितस्तदा स मगधपतिं नाशयति। यदि केतुरश्लेषानक्षत्र उदितस्तदा सआर्याधिपतिं नाशयति। यदि केतुर्मघानक्षत्र उदितस्तदा स पाण्ड्याधिपतिं नाशयति। यदि केतुः पूर्वाफाल्गुनीनक्षत्र उदितस्तदा स उज्जयिन्यधिपतिं नाशयति। यदि केतुरुत्तराफाल्गुनीनक्षत्र उदितस्तदा स समस्तदण्डनायकान् नाशयति। यदि केतुर्हस्तनक्षत्र उदितस्तदा स धनिकान् नाशयति। यदि केतुश्चित्रानक्षत्र उदितस्तदा स शैलोत्पन्नजनान् नाशयति। यदि केतुः स्वातीनक्षत्र उदितस्तदा स काम्बोजनृपतिमुख्यं नाशयति। यदि केतुर्विशाखानक्षत्र उदितस्तदा स इक्ष्वाकुवंशस्य नाशं करोति। यदि केतुरनुराधानक्षत्र उदितस्तदा स खशस्य तथा गौडदेशस्य नृपं नाशयति। यदि केतुर्ज्येष्ठानक्षत्र उदितस्तदा स सर्वमण्डलाधीशं हन्ति। यदि केतुर्मूलनक्षत्र उदितस्तदा स मद्राधिपतिं नाशयति। यदि केतुः पूर्वाषापढानक्षत्र उदितस्तदा स कलिङ्गदेशाधिपतिं नाशयति। यदि केतुरुत्तराषाढानक्षत्र उदितस्तदा स गुर्जरदेशाधिपतिं नाशयति। यदि केतुरभिजिन्नक्षत्र उदितस्तदा स कोङ्कणदेशं तथा निशाचरान् नाशयति। यदि केतुः श्रवणनक्षत्र उदितस्तदा स कैकयाधिपतिं नाशयति। यदि केतुर्धनिष्ठानक्षत्र उदितस्तदा स समस्तद्रविडजनान् नाशयति। यदि केतुः शतभिषानक्षत्र उदितस्तदा स नैमिषनृपतिं हन्ति। यदि केतुः पूर्वाभाद्रपदानक्षत्र

---

३५२ व.सं. श्लो. ४१ तः ५०

उदितस्तदा स पाञ्चालान् नाशयति। यदि केतुरुत्तराभाद्रपदानक्षत्र उदितस्तदा स संकरजातीनां, किरातानां तथा कोणोत्पन्नजनानां नाशं करोति। यदि केतू रेवतीनक्षत्र उदितस्तदा स द्विजानां-सज्जनानां तथा धर्ममार्गस्थितजनानां नाशं करोति।एतत्प्रकारेणाश्विन्यादिनक्षत्रेषूदितस्य केतोर्जातकानां विविधं फलं ज्ञेयम्।

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

# वास्तुपुरुषे देवताविन्यासः




वास्तुराजवल्लभः, अ. २, पृ. 33

एकाशीतिपद-वास्तुमण्डलम्  (वसिष्ठसंहितानुसारेण)

SMT. HANSA MEHTA LIBRARY
M. S. University of Baroda

पू.




द

प.

व.सं., अ-३८, श्लो. १८७ न: २१५

# गृहे उपकरणव्यवस्था (वसिष्ठसंहितानुसारेण)




व.सं., अ.३८ श्लो. १६७, ८: १६८, १६९, १७०

# आयविचारः

## (वसिष्ठसंहितानुसारेण)




व.सं. अ. ३८ श्लो., १६४ ते १६६, १६७, १७० ते १७३
[illegible] अ. ३ पृ. ४४

## वत्सचक्रम् (वसिष्ठसंहितानुसारेण)




वास्तुराजवल्लभः अ. १ पृ. 30, व.सं. अ. ३८ श्लो. ५८